
THE POETIC LIGHT



THE POETIC LIGHT

KĀVYAPRAKĀŚA OF MAMMAṬA

VOL. I

[Ullāsas I-VI]

Text with Translation

&

Sampradāyaprakāśinī of Śrīvidyācakravartin

R. C. DWIVEDI, *M.A., Ph.D.*,

Sāhityācārya, Darśanācārya

PROFESSOR AND HEAD OF THE DEPARTMENT OF SANSKRIT

UNIVERSITY OF UDAIPUR

MOTILAL BANARSIDASS

Delhi : : Varanasi : : Patna


Indological Publishers & Booksellers
Head Office : BUNGALOW ROAD, JAWAHAR NAGAR, DELHI-7
Branches : 1. CHOWK, VARANASI-1 (U.P.)
2. ASHOK-RAJPATH, PATNA-4 (BIHAR)

First Edition : *Delhi*, 1967
Second Revised Edition : *Delhi*, 1977
Price: Rs. 30.00 Paper
Rs. 40.00 Cloth

Printed in India

BY SHANTILAL JAIN, AT SHRI JAINENDRA PRESS, A-45, PHASE-I, INDUSTRIAL AREA, NARAINA, NEW DELHI-28 AND PUBLISHED BY SUNDARLAL JAIN, FOR MOTILAL BANARSIDASS, BUNGALOW ROAD, JAWAHAR NAGAR, DELHI-7

To
Padmabhushan
Dr. V. Raghavan



PREFACE TO THE SECOND EDITION

It is a dear delight to find that my works including the Poetic Light and the Alaṁkārasarvasvasañjīvinī are now due for the second edition within such a short period. I feel greatly encouraged by the welcome these works have received in the world of Sanskrit studies. There has been some delay in issuing this second edition of the Kāvyaprakāśa revised with the spontaneous help of my pupil colleagues, Dr. M.C. Pathak in the Department of Sanskrit and Shri V. C. Shrivastava in the Department of English of this University. Dr. Pathak studiously went through the Sanskrit Text correcting a number of mistakes and Mr. Shrivastava, who is currently engaged in his researches in the field of comparative literature, read with me the English translation of the obstruse text of Mammaṭa suggesting informed improvements here and there. As a result, a better uniformity in the translation of technical terms has been achieved.

I really regret that my varied academic pursuits, resulting in a number of other publications, have held up the completion of a comparative and critical study of the contribution and contents of the Kāvyaprakāśa. Lala Shri Sundarlal Jain, who has always bestowed fatherly affection on me, continues to remind me of my promise to bring out the third volume at an early date.

Meanwhile my wanderings in the highways and byways of Sanskrit criticism have byproduced a number of research papers which I wish to bring out first under the old advertised title, namely, the Studies in the Alaṁkāraśāstra. I know this again will be some kind of a diversion from the study of the Kāvyaprakāśa in depth. But then, this will keep me on the main track of literary criticism and off from the allurements of philosophy, even if for a short while. I am sure the will of my readers and continuing goading by Lalaji will ultimately prevail in bending me to complete and publish the third volume on the Kāvyaprakāśa.

The outstanding contributions of Padmabhushan Dr. V. Raghvan, the doyen of Indologists, have always been a source of inspiration to me. Through his works, he is our *guru* in the field of literary criticism. To him I dedicate this work with devotion and love.

R. C. Dwivedi

Analytical Table of Contents

First Flash


Second Flash

Third Flash

Fourth Flash

Fifth Flash

Sixth Flash



THE POETIC LIGHT

KĀVYAPRAKĀŚA OF MAMMAṬA

[*Text with English Translation, and Saṁpradāya-prakāśinī Ṭīkā by Śrīvidyācakravartin*]

प्रथम उल्लासः

ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति—

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् ।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति ।। १ ।।

नियतिशक्त्या नियतरूपा, सुखदुःखमोहस्वभावा, परमाण्वाद्युपादान-कर्मादिसहकारिकारणपरतन्त्रा, षड्रसा न च हृद्यैव तैः, तादृशी ब्रह्मणो निर्मितिर्निर्माणम् । एतद्विलक्षणा तु कविवाङ्निर्मितिः । अतो जयति । जयत्यर्थेन च नमस्कार आक्षिप्यत इति तां प्रत्यस्मि प्रणत इति लभ्यते ।

श्रीविद्याचक्रवर्तिप्रणीता सम्प्रदायप्रकाशिनी

नामरूपात्मकं विश्वं यस्य लीलामयं वपुः ।
प्रकाशाय नमस्तस्मै सविमर्शाय शम्भवे ।।
स्वरूपज्योतिषो वाचः परायाः प्रसरोर्मयः ।
आविर्भवन्तु मे वक्त्रादर्थयाथात्म्यदीपिकाः ।।
श्रीचक्रवर्तिकविना सम्प्रदायप्रकाशिनी ।
टीका काव्यप्रकाशस्य बृहतीयं विरच्यते ।।
नेह सन्तन्यतेऽस्माभिर्वृथा सन्दर्भडम्बरः ।
व्याख्येयवस्तुयाथात्म्यप्रकाशैकपरायणैः ।।
सन्तो मामनुगृह्णन्तु येऽधिका ये च मे समाः ।
अन्ये यथेष्टं चेष्टन्तां तानहं वेद्मि तत्त्वतः ।।

वस्तुनिर्देशमेवेष्टदेवतानुसन्धानात्मकमभिसन्धायाह वृत्तिकारः—**ग्रन्थारम्भ** इत्यादिना । ग्रन्थस्याविघ्नेन परिसमाप्तिः प्रचयावाप्तिश्च विघ्नानां विघातः । समुचितेत्यनेनेष्टत्वे सत्यप्यधिकृतायां देवतायां प्रतिपत्तिगौरवार्हत्वमनुसन्धत्ते । काव्यमीमांसाशास्त्रारम्भे हि कविवाग्रूपा देवतैवाधिकृतेति सम्यगुचिता । परामृशति नमस्कर्तव्यत्वेनानुसन्धत्ते ।

नियतीति । नियतिर्नियामिका शक्तिः । यदुक्तं तान्त्रिकैः —'**नियतिर्नियमनरूपे**'ति । परतन्त्रशब्दोऽयमायत्तमात्रवचनः, यथा मत्परतन्त्रस्त्वत्परतन्त्र इति ।

FIRST FLASH

At the commencement of the work, the author calls to mind the appropriate and favourite deity to ward off impediments :

1. Supreme is the poet's Speech which projects a creation, free from the laws of *niyati* (destiny), constituted by pure delight, independent of anything else, and charming on account of nine (or novel) sentiments.

Formed into a definite shape by the power of *niyati* (destiny), characterised by pleasure, pain and delusion, dependent on material causes such as atoms and auxiliary causes such as *karman* (action), possessed of (only) six flavours and not invariably pleasant by these—such is the creation or production of the Creator. But different from this, however, is the creation of poet's Speech. Hence it is supreme. The sense of (the word) 'is supreme' implies salutation. Thus the meaning 'I am bowing down to her' is obtained.

अतो नान्यपदेन पौनरुक्त्यम् । आदधती तेषु तेषु वस्तुषु नूतनत्वेन निदधती न पुनः कुर्वतीति व्याख्येयं, निर्मितिं कुर्वतीति पौनरुक्त्यप्रसङ्गात् । जयति विश्वस्मादुत्कृष्यते ।

अत्रार्थसामर्थ्यात् प्रतियोगित्वेन स्फुरन्तीं ब्रह्मणो निर्मितिं शब्दमारोप्य व्याचष्टे—**नियतिशक्त्ये**त्यादि । सुखदुःखमोहाः सत्त्वादिगुणवृत्तयः । विश्व तत्स्वभावमिति सांख्याः । कारणपरतन्त्रेत्येतत् प्रत्येकमभिसम्बध्यते । परमाण्वाद्युपादानकारणपरतन्त्रा कर्मादिसहकारिकारणपरतन्त्रा । आदिशब्दद्वयेन द्व्यणुकादि कालादि चोपसंगृह्यते । अयं वैशेषिकादिमतोपन्यासः । नवरसरुचिरामित्यत्र व्यतिरेकद्वयं प्राधान्येन विवक्षितम् । अतो वाक्यं विभिद्य व्याचष्टे—**षड्रसा न च हृद्यैव तैरिति** । रसा मधुरादयः । मधुरव्यतिरिक्तेन रसान्तरेणाहृद्या चेत्यवकाराशयः । अथ व्यतिरेकं प्रकृतनिर्मितौ योजयति—**एतद्विलक्षणा त्विति** । तथाहि—नास्या नियमः कश्चित, 'कमलमनम्भसी' त्यादाव-

इहाभिधेयं सप्रयोजनमित्याह—

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे ।। २ ।।

कालिदासादीनामिव यशः, श्रीहर्षादेर्धावकादीनामिव धनं, राजादिगतोचिताचारपरिज्ञानम्, आदित्यादेर्मयूरादीनामिवानर्थनिवारणं, सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दं, प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः मित्रसम्मितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोस्तु गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत् काव्यं लोकोत्तरवर्णनानिपुणकविकर्म तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य रामादिवद्वर्तितव्यं न रावणादिवदित्युपदेशं च कवेः सहृदयस्य च यथायोगं करोतीति सर्वथा तत्र यतनीयम् ।

नियमसहस्रसंदर्शनात् । न च दुःखमोहात्मकत्वम्, अलौकिकसुखप्रकाशघनत्वात् । नाप्यन्यपारतन्त्र्यं, प्रतिभामात्रप्रवृत्तत्वात् । न चात्र षडेव रसाः, शृङ्गारादिनवरसनैरन्तर्यात् । न चैतेष्वन्यतमेनाप्यरुचिरत्वं, बीभत्सेनापि नामामृतायमानत्वात् । अतो जयति । विश्वं हि ब्रह्मनिर्माणान्तर्वर्ति । अतो विश्वोत्कर्षित्वमुपपद्यत इति भावः । ननु नमस्कारप्रस्तुतावुत्कर्षकथनं न सङ्गच्छत इत्यत आह—**जयत्यर्थेन चेति** । आक्षिप्यते सामर्थ्यादानीयते । इतिर्हेतौ । यतो विश्वोत्कर्षिणी, अतस्तां प्रत्यस्मि प्रणत इत्यस्यार्थस्य लब्धिः । इह नियतिकृतेत्यादौ विमतानेकदर्शनोपन्यासः । यत्र यत्र दर्शने यादृग्विश्वं सर्वस्मादेवास्माद् वैलक्षण्यं दर्शयितुं, काव्यस्य सर्वदर्शनपार्षदत्वं द्योतयितुं चेत्युपपन्नतमः । यत्तु सान्धिविग्रहिको 'नियतिः कर्मापरपर्याय' इति व्याख्यत्, तत् **'कर्मादिसहकारिकारणे'**त्यादिवृत्तिग्रन्थतात्पर्यपर्यालोचनविधुरत्वादविचारिताभिधानम् । अत्र चादिसूत्रे वस्त्वलङ्काररसस्वरूपः प्रतिपिपादयिषितस्त्रिस्कन्धकोऽर्थः प्रतीयमानो ग्रन्थकृतोपक्षिप्तो मन्तव्यः । तथाहि—जयत्यर्थेन नमस्कारलक्षणं वस्तु, ब्रह्मनिर्मितेः शब्देनानुपादानाद् व्यतिरेकालङ्कारः, देवताविषया रतिश्च व्यङ्ग्यतया प्रथते ।।

अथ द्वितीयसूत्रमवतारयति—**इहेति** ।

काव्यं यशस इति । कृत् करणम् । वित् वेदनम् । युक् योजनम् । भावे क्विप् ।

क्रियाभिसम्बन्धस्वारस्याय विभक्तीर्विपरिणमयन् व्याचष्टे—**कालिदासादीनामिव यश** इत्यादिना । धावको रत्नावलीनाटिकाप्रणयनसहायः । राजादीत्या-

The subject-matter herein is possessed of purposes—thus states (the author in the following verse):

2. Poetry leads to fame, procurement of wealth, knowledge of the ways of the world, cessation of the inauspicious, immediate bliss *par excellence*, (and) imparts advice in the manner of a beloved.

Poetry, the creation of a poet skilled in extra-ordinary (aesthetic) description, is distinct from the scriptures like the Vedas as well as the *śāstras* in which the word (injunction) is prominent and which are like a master, and from historical and legendary works and others which stress sense as their purport and which are like a friend, on account of predominance of the operation which renders the word and sense subservient to (the manifestation of) sentiment. That (poetry) leads the poet or the aesthete, as the case may be, to fame as (in the case) of Kālidāsa and others; wealth as (in the case) of Bāṇa and others from Śrīharṣa and others; thorough knowledge of the etiquette belonging to kings and others; destruction of mishaps as (in the case) of Mayūra and others from the Sun and others; the invariably immediate bliss, which is the crown of all purposes, which arises from the relishing of sentiments, where-in all other objects of cognition wither away; and advice that one should behave like Rāma and others, and not like Rāvaṇa and others; after creating (in us) the taste (for poetry) in the manner of a beloved. Therefore, by all means one should strive after (the creation and appreciation of) it.

दिशब्दाद् गुरुमित्रकान्तादिपरिग्रहः । **सकलेति** । निर्वृतित्वादेव सकलप्रयोजनमौलिभूतत्वं, यशःप्रभृतेस्तां प्रति शेषत्वात् । विगलितेति परत्वप्रकाशनम् । नहि लौकिके सुखे वेद्यान्तरं न प्रतीयते । यथा चात्र वेद्यान्तरविगलनं तथा चतुर्थे दर्शयिष्यते । करोतीति प्रतिवाक्यं समन्वयः । धर्माद्युपदेशलक्षणं तु प्रयोजनं यथा कान्तासम्मितत्वेन करोति, तथोपदर्शयितुमाह—**प्रभुसम्मिते**त्यादि । यानि हि वेदादीनि शासनाच्छास्त्राणि, तान्युपदेश्यानामिष्टानिष्टपर्यालोचननैरपेक्ष्येण प्रभुवदुपदिशन्ति, शब्दप्रधानकत्वात् । **मित्रसम्मिते**त्यादि । ये पुनरितिहस्माहेति पुरावृत्तोपवर्णनरूपाः पुराणादय इतिहासास्ते मित्रवद्, अर्थतात्पर्यवत्त्वात् । **शब्दा-**

अस्य कारणमाह—

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ॥३॥

शक्तिः कवित्वबीजरूपः संस्कारविशेषः। यां विना काव्यं न प्रसरेत्, प्रसृतं वोपहसनीयं स्यात्। लोकस्य स्थावरजङ्गमात्मकलोकवृत्तस्य, शास्त्राणां छन्दोव्याकरणाभिधानकोशकलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्रन्थानां, काव्यानां च महाकविसम्बन्धिनाम्, आदिग्रहणादितिहासादीनां च, विमर्शनाद् व्युत्पत्तिः, काव्यं कर्तुं विवेचयितुं च ये जानन्ति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिरिति त्रयः समुदिताः नतु व्यस्ताः तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुर्नतु हेतवः।

र्थयोस्तु गुणभावेनेत्यादि। तदुभयविलक्षणं तु यत् काव्यं तत् सुन्दरवस्तूपवर्णनेन सरसतामुत्पाद्योपदेश्यमभिमुखीकुर्वत् प्राणवल्लभाप्रख्यतया मृदुललितसरसहृदयङ्गमं दुर्लङ्घ्यतयोपदिशति, शब्दमर्थं चोपसर्जनीकृत्य रसाङ्गभूते व्यञ्जनव्यापार एव प्रवणत्वात्। **रघुवंश**प्रमुखं हि काव्यमेकवाक्यतया निष्कृष्यावधारितं रामादिवद् वर्तितव्यं न रावणादिवदिति बह्वीभिरुपपत्तिभिः सर्वप्रकाराभिराममुपदिशति। अवान्तरप्रकरणशोऽपि विचारितं महाराजस्य दिलीपस्य पूज्यायां धेनौ प्रमादादपि पूजाव्यतिक्रमे सन्ततिप्रतिबन्धं, दशरथस्य मृगयाव्यसनेन देहावसानसमये शापहेतुकां महासुतवियोगविपदम्, अग्निवर्णस्यातिकामितया व्यापदं च हेयतया, धेन्वाराधनादिना च सुकृतेन कल्यसन्तानादिकल्याणोपचयं चोपादेयतयोपदिशतीति। कवेः सहृदयस्य चेत्यधिकारिकथनम्। **यथायोगमिति**। योगो योग्यता तामनतिक्रम्य। अत्रायमाशयः—यशोऽर्थोऽनर्थक्षतिश्चाविशेषेणोभयोरपि। व्यवहारोपदेशौ तु ग्रथनादर्वाक् कवेः, अपरिज्ञातव्यवहारोपदेशस्याकवित्वप्रसङ्गात् परस्तात्। सहृदयस्य निर्वृतिकाले कविरपि सहृदय एवेति द्वयोरपि परस्तादेवेति। काव्यं यशस इत्युक्त्वा विधावपर्यवसानादपरिपूर्णं वाक्यं विधिपर्यवसानेन पूरयति —**इति सर्वथे**त्यादिना। **सर्वथेति**। एषु विशिष्टेषु प्रयोजनेष्वन्यतमसिद्धावपि यतनीयं, समुदायसिद्धौ यतनीयमेवेति भावः। अत्र सान्धिविग्रहिकः इति सर्वथेत्यादिवाक्यशेषमग्रिमकारिकासङ्गत्यर्थतया यदवोचत् तदयुक्तम्। तथा हि—

**"वाक्यं सर्वं परार्थत्वाद् बोधनीये हि वस्तुनि ।
नानुत्पाद्य प्रवृत्तिं वा निवृत्तिं वोपशाम्यति ॥"**

इति नीत्या प्रवर्तकत्वाभावे पूर्वकारिकाया वाक्यत्वमेव न परिपूर्यते। कथमग्रिमकारिकासङ्गत्यर्थता वाक्यशेषस्य सङ्गच्छताम्। न चैतदनुवादरूपं वाक्यम्। अधिकारिप्रवर्तनायैव प्रयोजनादिप्रतिपादनपरत्वात्। एवमादिषु व्याख्यातारतम्यं स्वयमेव सचेतसो विचिन्वन्तु। नास्माभिः प्रतिकारिकमुद्घाट्यते ग्रन्थविस्तरभयादित्यलम्।

(Thus having stated its purpose) the author propounds its cause :

3. Poetic imagination, proficiency resulting from a study of the world, sciences, poetical compositions and the like, practice under the guidance of those who know poetry—these constitute (conjointly) the cause of its origin.

Poetic imagination is a peculiar latent impression which forms the seed of poetry, failing which poetry would not spring up, or even if it were to spring up, it would be ridiculous. Erudition follows upon the close study of the world i.e. the ways of the inanimate and animate world, of the sciences i.e. the theoretical treatises on metrics, grammar, lexicography of words, arts, the group of four (values of human life), elephants, horses, swords and the like, of poetical works, i.e. the writings of great poets, and of historical works etc. as implied by the use of '*ādi*'. Repeated exercise lies in the composition and formation (of poetry) under the supervision of those who know how to write and judge poetry. Thus, these three cumulatively, but not separately, constitute the cause, but not the causes, of origination, i.e. composition and excellence of poetry.

एवं प्रयोजनकथनेन प्ररोचितयोरधिकारिणोरुपायजिज्ञासायां सूत्रं—**शक्ति-रित्यादि**। शक्तिर्निपुणता अभ्यास इति त्रयमेतत् सङ्घातवृत्ति काव्यस्य हेतुरिति पिण्डितार्थः।

तदिदं व्याचष्टे—**शक्तिः कवित्वबीजे**त्यादिना। संस्कारविशेषः, बुद्धेरिति शेषः। यामिमां शक्तिमभिव्यक्तां प्रतिभामाचक्षते। तथा हि—

"स्मृतिर्व्यतीतविषया मतिरागामिगोचरा।
बुद्धिस्तात्कालिकी ज्ञेया प्रज्ञा त्रैकालिकी मता॥
प्रज्ञां नवनवोन्मेषशालिनीं प्रतिभां विदुः।
द्वे वर्त्मनी गिरो देव्याः शास्त्रं च कविकर्म च॥
प्रज्ञोपज्ञं तयोराद्यं प्रतिभोद्भवमन्तिमम्।"

इति। नन्वप्रत्यक्षा शक्तिः कथं निश्चीयत इत्यत आह—**यां विने**त्यादि। कस्यचिद् बुद्धिमतः स्वभ्यस्तस्यापि न चतुष्पदीमात्रेऽपि सन्दर्भप्रसरः। कस्यचित्

एवमस्य कारणमुक्त्वा स्वरूपमाह—

तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ।

दोषगुणालङ्कारा वक्ष्यन्ते । क्वापीत्यनेनैतदाह—यत् सर्वत्र सालङ्कारौ, क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः । यथा—

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥ १ ॥

[Śilābhaṭṭārikā, acc. to Sūktimuktāvalī]

प्रभूतोऽपि प्रसरः सहृदयैरुपहस्यते । उभावपि खल्विमौ शक्तिदरिद्रौ । यस्य तु प्रसरोऽनुपहास्यत्वं च सन्दर्भे स शक्तिमानिति यावत् । अतः प्रभूतोऽपि प्रसरः सहृदयोपहास्यश्चेदकाव्यमेवेति सिद्धम् । लोकशास्त्रेत्यत्र लोकशब्दो लोकवद्भिस्तृतं लोकवृत्तमुपलक्षयति । लोकानामवेक्षणस्याशक्यत्वात् । अनेनैवाशयेनोक्तं **वामनेन 'लोकवृत्तं लोक'** इति । तदेतदभिप्रेत्याह—**स्थावरजङ्गमात्मकलोकवृत्तस्येति ।** शक्तिमतो लोकवृत्तपरिज्ञाने सति यानि काव्ये साक्षादुपयोगीनि शास्त्रादीनि तानि विशेषतो दर्शयति—**छन्दोव्याकरणे**त्यादिना । छन्दोऽवच्छेदविशेषः । तेन विना वाचां निबन्धनमेव न स्यादिति प्रथमतो निर्देशः । गद्यकाव्येऽपि छन्दोग्रन्थोऽनुसर्तव्य एव । अथ निबन्धनान्तःपतितानां पदानां परिशुद्धयै व्याकरणम् । परिशुद्धेष्वपि पदेषु सन्दर्भानुगुणाननुगुणत्वविवेचनायाभिधानकोशाः । अथार्थशुद्धये कलाचतुर्वर्गाद्या विमर्शनीयाः यदाह—

"न स शब्दो न तद् वाच्यं न सा विद्या न सा कला ।
जायेत यन्न काव्याङ्गमहो भारो महान् कवेः ॥"

इति । काव्यज्ञपदेन कवेः सहृदयस्य च परिग्रहं दर्शयति—**काव्यं कर्तुं विवेचयितुं चे**त्यादि । कर्तुरुपदेशेन ग्रथने, विवेचयितुस्तु योजने प्रवृत्तिः । निर्माणे समुल्लासे चेत्युद्भवशब्दार्थ उद्घाटितः । इति शब्दस्यैकीकारद्योतकत्वमाविष्कर्तुमाह—**इति त्रयः समुदिताः न तु व्यस्ता** इति । **न** तु हेतव इति प्रत्ययस्य संख्याप्राधान्यं दर्शितम् ।

एवमुपाये ज्ञाते सत्युपेयस्वरूपविवेचनमवसरागतमित्याह—**एवमस्येति ।** स्वमसाधारणं रूपं लक्षणमित्यर्थः ।

तददोषावित्यादि । शब्दार्थौ धर्मिणौ । अदोषत्वादयो धर्माः । सत्यपि

Thus having stated its cause the author defines its nature:

4ab. It (i.e. poetry) consists of word and sense, which are without blemishes, possessed of excellences, and are, rarely, devoid of figures.

The blemishes, excellences and figures, will be explained later on. By the use of 'rarely' (*kvāpi*) the author means that word and sense are often everywhere possessed of figures, but there will be no loss of poetical character even in the absence of a distinct figure in some cases. As (in the following illustration):

Who deprived me of my virginhood that same, indeed, is my bridegroom; those same are the nights of (the spring-month of) *Caitra* (March-April); and those same are the luxuriant Kadamba-breezes, fragrant with the blooming Mālatī flowers; and I, too, am what I was. Yet my heart longs for indulging in sports of love, there beneath the cane-arbour on the banks of the Narmadā. 1

गुणालङ्कारपौष्कल्ये दोषस्य लवोऽप्यकाव्यतायै कल्पत इत्यवश्यहेयत्वेन दोषाणां प्रथममुपादानम् । गुणा रसे समवायिनो धर्माः । अलङ्काराः संयोगवृत्तयः । अनलङ्कृती इति नञीषदर्थे । अनेन गुणालङ्कारयोर्भेदोऽप्यासूचितः । यतः शब्दार्थयोः परिस्फुटगुणयोरेव काव्यत्वम् । क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः । तदिति विशेष्यपदेन प्रथमोल्लासे सामान्यतः चतुर्थादिषु त्रिषूल्लासेषु विशेषतो लक्षयिष्यमाणं काव्यमुद्दिष्टम् । शब्दार्थौ द्वितीयतृतीययोः, दोषाः सप्तमे, अष्टमे गुणाः, नवमदशमयोः शब्दार्थालङ्कारावित्युल्लासदशकार्थ इहोपक्षिप्तः ।

यः कौमारहर इति । कौमारहरः प्रथमपरिभोगेन कौमारमपनीतवान् । मालतीवत् सुरभयः मालतीसुरभयः । कदम्बशब्द इह धूलीकदम्बाख्ये तद्विशेषे वर्तते, यो वसन्ते समुल्लसति । कदम्बमात्रस्य चैत्रक्षपास्वसम्भवात् । यः कौमारेति वाक्यचतुष्टयेऽपि तद्वृत्तैरुत्कण्ठाकारणाभावः अनुत्कण्ठाकारणपौष्कल्यं चोक्तम् । तथापि चेतः समुत्कण्ठत इत्युत्कण्ठालक्षणकार्योत्पत्तिरनुत्कण्ठारूपकार्यानुत्पत्तिश्च, अतः साधकबाधकप्रमाणाभावाद् विभावनाविशेषोक्त्योः सन्देहसङ्करः । कारणाभावकार्याभावयोश्च विरुद्धोपलब्धिमुखेनाभिधानादस्फुटत्वम् ।

अत्र हि स्फुटो न कश्चिदलङ्कारः । रसस्य हि प्राधान्यान्नालङ्कारता ।
तद्भेदान् क्रमेणाह—

इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः ॥४॥

इदमिति काव्यम् । बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः । ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावितवाच्यव्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य । यथा—

निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि ! दूति ! बान्धवजनस्याज्ञातपीडागमे !
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥ २ ॥

[Amaruśataka, 105]

अत्र तदन्तिकमेव रन्तुं गतासीति प्राधान्येन अधमपदेन व्यज्यते ॥

तदेतदभिसन्धायाह—**अत्र हि स्फुटो न कश्चिदिति** । अत्रालङ्कारचर्चास्माभि**रलङ्कारसर्वस्वसञ्जीविन्याम**लङ्कारसर्वस्वटीकायां वितत्योपरचितेति तत एवावधार्यम् । ननु विभावादिभिरिह स्फुटमेवाभिव्यज्यते रसः । अतः कथं न रसवदलङ्कार इत्यत आह—**रसस्य हीति** । यत्र रसो गुणीभवति, तत्रासौ रसवदलङ्कारः । प्राधान्ये त्वलङ्कार्य एव न त्वलङ्कार इत्याशयः । यथा चैवं व्यवस्था तथा पञ्चमे दर्शयिष्यति ॥

विशेषलक्षणस्य प्राप्तोऽवसर इत्याह—**तद्भेदानिति** ।

इदमुत्तममिति । वाच्यादतिशयिनि व्यङ्ग्ये उत्तमं, स ध्वनिरित्युक्तः । ध्वन्याचार्यैरिति शेषः । यदैवेत्थमुत्तमत्वं तदैव ध्वनिव्यवहार इति यावत् ।

पूर्वकारिकायां तदिति निर्दिष्टस्यापीह बुद्धिसन्निधानादिदमिति परामर्श इत्यभिप्रेत्याह—**इदमिति काव्यमिति** । बुधैर्वैयाकरणैरिति सर्वाभ्युपगतं प्रामाण्यमुद्घाटितम् । प्रथमे विद्वांसस्ते, व्याकरणमूलत्वात् सर्वविद्यानाम् । **प्रधानभूतेति** । अर्थप्रतीतौ प्रधानभूतं स्फुटत्यस्मादर्थ इति निरुक्त्यार्थस्फुटीकरणात् स्फोटाख्यं पदात्मकं यदस्ति व्यङ्ग्यं तद्व्यञ्जनक्षमस्याक्षरात्मनः शब्दस्य ध्वनिरिति व्यवहारः कृतः । प्रत्येकसमुदायाभ्यां वर्णैरर्थप्रतीत्यनुपपत्त्या हि स्फोटं कल्पयन्ति ते । **न्यग्भावितेति** । न्यग्भावितवाच्यः उपसर्जनीकृतवाच्यो यो

Here there is no distinct figure. For, the *rasa* being principal cannot constitute the figure (viz. *Rasavat*).

The author states its divisions in order :

4cd. This is best when the suggested meaning far excels the expressed sense ; it is called *dhvani* by the learned.

'This' means a poem. By the learned i.e. the grammarians, the designation '*dhvani*' is given to a (non-eternal, physical) word suggestive of the suggested sense in the form of *sphoṭa* (i.e. the eternal ideal form of word) which is the principal. Hence by others also, who follow their theory, (the designation *dhvani* is given) to the pair of word and sense such as are capable of suggesting a sense that has subordinated the expressed sense. As in :

The sandal on the slope of (your) breasts is completely washed off; the redness of lower lip is clean washed out; the eyes are without collyrium at their far ends, horripilated is this slender body of yours. O liar, O ye messenger, who cannot realize the agony that overtakes (me) your kinswoman, from here you had gone to the well for a bath, but not to that wretch! 2

Here you had certainly gone to him in order to dally (with him)—this is suggested prominently by the word 'wretch'.

व्यङ्ग्योऽर्थस्तद्व्यञ्जनक्षमस्य शब्दस्यार्थस्य च । अतो नायं स्वकपोलकल्पितो ध्वनिव्यवहार इति भावः ।

निश्शेषेत्यादि । दूरमत्यन्तम् । अज्ञातपीडेत्यत्र पीडाशब्दस्यागमशब्देन सह समस्तस्यापि न बान्धवशब्दसम्बन्धे शक्तिशैथिल्यं, सम्बन्धित्वेन नित्यसापेक्षत्वात् । यदाह—

"सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः प्रवर्तते ।
स्वार्थवत् सा व्यपेक्षा स्ववृत्तावपि न हीयते ॥"

इति । अत्र वापीस्नानविधिरूपे वाच्ये तन्निषेधरूपो व्यङ्ग्यः, तदन्तिकगमननिषेधरूपे च वाच्ये गमनविधिरूपो व्यङ्ग्यश्चात्यन्तविरोधाद् भेदप्रसिद्धये दर्शितः ।

अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ।

अतादृशि वाच्यादनतिशायिनि । यथा—

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ॥ ३ ॥

[K. A. VII. 39]

अत्र वञ्जुललतागृहे दत्तसङ्केता नागतेति व्यङ्ग्यं गुणीभवति, तदपेक्षया वाच्यस्यैव चमत्कारकारित्वात् ।

शब्दचित्रं वाच्यचित्रमव्यङ्ग्यमवरं स्मृतम् ॥ ५ ॥

चित्रमिति गुणालङ्कारयुक्तम् । अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थरहितम् । अवरमधमम् । यथा—

स्वच्छन्दोच्चलदच्छकच्छकुहरच्छातेतराम्भश्छटा-
मूर्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः ।
भिन्द्यादुद्यदुदारदर्दुरदरीदीर्घादरिद्रद्रुम-
द्रोहोद्रेकमयोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ॥ ४ ॥

अतादृशीति । व्यङ्ग्ये त्वतादृशि मध्यमं सद् गुणीभूतव्यङ्ग्यं कथितमित्यनुषज्यते ।

ग्रामतरुणमिति । ग्रामग्रहणेन प्रकाशपरिचयाभावो द्योत्यते । मुहुः पश्यन्त्या इति दर्शनावृत्त्या तत्राभिनिवेशः । नितरां मालिन्ये मुहुर्दर्शनं हेतुः प्रतिदर्शनं मालिन्यमुत्कृष्यत इति यावत् । पश्यन्त्या भवतीति च वर्तमानव्यपदेशेन दर्शनमलिनीभावयोरपरिसमाप्तिः । अत्र वञ्जुलमञ्जरीसनाथकरं पश्यन्त्या मुखमालिन्यं नितरामाविर्भवतीति वाच्यं चमत्काराय कल्पते । तदप्रामाणिकं मा भूदिति तदुपपादकत्वेन वञ्जुललतागृहे दत्तसङ्केता न समागतेति व्यङ्ग्यं गुणीभवति ।

शब्दचित्रमिति ।

अव्यङ्ग्यमित्यत्र नञ ईषदर्थत्वं प्रकाशयितुमाह—**स्फुटप्रतीयमानार्थरहितमिति** ।

स्वच्छन्देत्यादि । स्वच्छन्दमुच्चलन्तीभिः, अच्छाभिः कच्छकुहरेषु छातेतराभिरतुच्छाभिरम्भश्छटाभिर्मूर्छन्मोहा विगलदज्ञाना ये महर्षयस्तैर्हर्षेण

5ab. But when the suggested meaning is unlike that (i.e. is not principal), it (poetry) is called mediocre wherein the suggested becomes subordinate.

'Unlike that' means 'not far excelling the expressed sense.' For example:

The facial lustre of the young girl, as she repeatedly looks at the village youth with a cluster of fresh Aśoka flowers, grows extremely dark. 3

Here, (the young girl) having fixed an appointment (to meet) in the Aśoka bower did not turn up—this suggested meaning has become subordinate. For, as compared with it, the expressed sense itself is more charming.

5cd. But, the portrait of the word and the portrait of the expressed sense, that is devoid of the suggested meaning, is known as the lowest (kind of poetry).

'*Citra*' (portrait) means possessed of excellences and figures. 'Devoid of the suggested meaning (*avyaṅgya*)' means bereft of a distinct suggested meaning. *Avara* means lowest. For example:

May the Mandākinī at once remove your dullness (the Mandākinī) in which are performed with pleasure ablutions and daily rites by great seers whose delusion is being washed off by the continuous jets of water, which is spurting up at its will, is clear and violent in the crevices of the banks; whose valley contains large jumping frogs and whose pride is great on account of the lofty waves rising high owing to the collapse of tall and stupendous trees. 4

विहितं स्नानरूपमाह्निकं यस्यां सा। उद्यन्त्युदारा दर्दुरा मण्डूका यासु तासु दरीषु दीर्घाणामदरिद्राणां फलकुसुमसमृद्धानां द्रुमाणां द्रोहः पातनाद्यपकारस्तदुद्रेकमयस्तदुत्कर्षप्रचुरः ऊर्मीणां मेदुरः पुष्कलो मदो यस्याः सा मन्दाकिनी वो मन्दतां भिन्द्यादिति योजना। अत्र छेकवृत्त्यनुप्रासप्राचुर्येऽपि स्फुटप्रतीयमानार्थाभावादधमत्वम्।

विनिर्गतं मानदमात्ममन्दिराद् भवत्युपश्रुत्य यदृच्छयापि यम्।
ससम्भ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियामरावती ॥५॥

[Menṭha's Hayagrīvavadha]

इति काव्यप्रकाशे प्रयोजनकारणस्वरूपविशेषनिर्णयो नाम
प्रथम उल्लासः

विनिर्गतमिति । मानदमिति । संश्रितानां सम्मन्तारं द्विषां मानं खण्डयितारं हयग्रीवं यदृच्छया जिगमिषाभिसन्धिमन्तरेणापि लीलामात्रेण मन्दिरात् संचलितमुपश्रुत्य सिद्धचारणादिमुखात् प्रच्छन्नमाकर्ण्य ससम्भ्रमेणेन्द्रेण द्रुतं पातितार्गला संघटितकवाटा सत्यमरावती भिया निमीलिताक्षीव भवति । अत्र स्थायिनो भावस्य शब्देनोपादानाद् 'व्यभिचारिरसस्थायिभावानां शब्दवाच्यते'ति वक्ष्यमाणमनौचित्यमुत्प्रेक्षाकृतं चमत्कारमपकर्षति ॥

इति संस्कृतसार्वभौमप्राकृतपृथ्वीश्वरशौरसेनीशिरोमणिमागधीमकरध्वजपैशाचीपरमेश्वरापभ्रंशराजहंसालङ्कारिकचक्रवर्त्तिध्वनिप्रस्थानपरमाचार्यकाव्यमीमांसाप्रभाकरकविसहृदयशिरोमणिसहजसर्वज्ञपरमयोगीश्वरश्रीमत्त्रिभुवनविद्याचक्रवर्त्तिवंशावतंसमहाकविश्रीविद्याचक्रवर्त्तिकृतौ
सम्प्रदायप्रकाशिन्यां काव्यप्रकाशबृहट्टीकायां
प्रथम उल्लासः ।

Having heard about him, the destroyer of the pride (of his enemies), having gone out of his palace just for fun, Amarāvatī (the city of gods), whose bolt is quickly swung down by Indra in a flurry, appears as having closed her eyes through fear. 5

Thus (ends) the First Flash in the Poetic Light, named the 'Determination of the Purpose, Cause, Nature and Varieties of Poetry.'

द्वितीय उल्लासः

क्रमेण शब्दार्थयोः स्वरूपमाह—

स्याद् वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्तथा ।

अत्रेति काव्ये । एषां रूपं वक्ष्यते ।

वाच्यादयस्तदर्थाः स्युः

वाच्यलक्ष्यव्यङ्ग्याः ।

तात्पर्यार्थोऽपि केषुचित् ॥६॥

आकाङ्क्षासन्निधियोग्यतावशाद् वक्ष्यमाणरूपाणां पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि वाक्यार्थः समुल्लसतीत्यभिहितान्वयवादिनां मतम् । वाच्य एव वाक्यार्थ इत्यन्विताभिधानवादिनः ।

इत्थं प्रथमोल्लासेन सोपायप्रयोजनं काव्यस्वरूपमुक्त्वा धर्मिणोः शब्दार्थयोर्लक्षणमवसरप्राप्तमित्याह वृत्तिकारः **क्रमेणेति । 'तददोषौ शब्दार्थावि'**ति सूत्रे येन क्रमेणोद्देशस्तदतिक्रमे कारणाभावात् तेनेत्यर्थः ।

ननु शास्त्रादौ नास्ति व्यञ्जकाख्यः शब्दः, अतः कथमेवमुद्देशः कृत इत्यत आह—**अत्रेति काव्य** इति । अनन्यत्रभावः सप्तम्या द्योत्यते । यथा काव्ये व्यञ्जकसद्भावस्तथोपपादयिष्यति । **एषां रूपमिति** । शब्दभेदनिर्देशे हि सहचरितार्थभेदजिज्ञासोद्रिच्यत इति अर्थमपि भेदेन निर्दिश्य समनन्तरं वक्ष्यत इत्यर्थः । वाचको लाक्षणिक इत्युद्देशेनैव सामान्यात्मकः स्वशब्दार्थांश उक्तः । विशेषस्तु वक्तव्यतयावशिष्ट इत्यभिप्रेत्याह—**एषां रूपमिति** । इतरथा स्वरूपमित्युद्दिष्टस्य प्रतिनिर्देशोऽपि तथैव स्यात् ।

वाचकादिशब्दत्रये सम्बन्धित्वेन ये वाच्यादयोऽर्थाः प्रतीयन्ते, तानयमादिशब्दः परामृशतीत्यभिप्रायेणाह—**वाच्यलक्ष्यव्यङ्ग्या** इति ।

ननु तात्पर्यार्थेन सह चत्वारोऽर्थभेदाः किं नोद्दिश्यन्त इत्यत आह—**तात्पर्यार्थोऽपीति** । केषुचिदिति, मतेष्विति शेषः ।

तत्र तावदभिहितान्वयवादिनां मतमुपन्यस्यति—**आकाङ्क्षे**त्यादिना । तात्पर्यार्थः समुल्लसति अबाधितत्वेन प्रकाशत इति । प्रतिज्ञातस्य कारणभेदात् पदार्थतो भेदं दर्शयति—**आकाङ्क्षासन्निधियोग्यतावशादिति** । सङ्केतग्रहणा-

SECOND FLASH

Now the author states the nature of word and sense in order:

6ab. Word, here, would be of three kinds—expressive, indicative and suggestive.

'Here' means in poetry. The characteristic of these (three kinds of words) will be described later.

6c. The expressed and others would be their senses.

That is, expressed, indicated and suggested.

6d. There is also the purport-sense in the opinion of some.

When owing to the force of expectancy, compatibility and proximity, after the word-meanings, whose nature will be explained later, have been correlated there springs up the purport sense, which possesses a special form and which, though not the sense of (individual) words, is yet the sense of the sentence—this is the view of those who hold that the correlation is of the expressed words (*abhihitānvayavādins*). The primary sense itself is the sense of the sentence—thus hold the theorists of 'expression of the correlated meaning' (*anvitābhidhāna*).

श्राद्धि पदार्थः प्रतीयते । तात्पर्यार्थस्त्वाकाङ्क्षादिवशात् । आकाङ्क्षा प्रतिपत्तुर्जिज्ञासा । तामिमां शब्दार्थापर्यवसानोत्थापितां शब्दार्थधर्मत्वेनोपचरन्ति । यदुक्तम्—

"आकाङ्क्षा प्रतिपत्तुर्हि जिज्ञासानवसानतः ।
सा हि शब्दार्थयोर्जाता तद्धर्म उपचर्यते ॥"

इति । आकाङ्क्षितस्य योग्यस्य चानन्तर्यं सन्निधिः । स सम्भवे शब्दव्यपेक्षकः । असम्भवे तु बुद्धिव्यपेक्षकः । यदाह—

"यस्य येनाभिसम्बन्धो दूरस्थस्यापि तेन सः ।
अर्थतो ह्यसमानानामानन्तर्यमकारणम् ॥"

इति । योग्यता बाधप्रतीत्यभावः । सत्यपि कारणभेदे यदि प्रतीतौ योगपद्य

सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते ।

तत्र वाच्यस्य यथा—

माए घरोवअरणं अज्ज खु णत्थित्ति साहिअं तुमए ।
ता भण किं करणिज्जं एमेअ ण वासरो ठाइ ॥ ६ ॥

अत्र स्वैरविहारार्थिनीति व्यज्यते ।

लक्ष्यस्य यथा—

साहेन्ती सहि ! सुहअं खणे खणे दूमिआसि मज्झ कए ।
सब्भावणेहकरणिज्जसरिसअं दाव विरइअं तुमए ॥ ७ ॥

अत्र मत्प्रियं रमयन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यम् । तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यङ्ग्यम् ।

व्यङ्ग्यस्य यथा—

उअ णिच्चलणिप्फन्दा बिसिणीपत्तम्मि रेअइ वलाआ ।
णिम्मलमरगअभाअणपडिट्ठिआ सङ्खसिप्पि व्व ॥ ८ ॥

[Gāthāsaptaśatī I-4]

तदैकशक्तिक्रोडीकारान्न भेदसिद्धिरिति शङ्कित्वा कालभेदं दर्शयितुमाह—**वक्ष्यमाणरूपाणामिति** । 'जात्यादिर्जातिरेव वे'ति रूपमेषां वक्ष्यते । एषां समन्वये पदैर्हि पदार्थाः पूर्वं प्रतीयन्ते । अथ संसर्गावसरे हि तात्पर्यार्थावगमः । अथ स्वरूपभेदं दर्शयति— **विशेषवपुरिति** । अविशिष्टो हि पदार्थः, अयं तु संसृष्टतया विशेषवपुः । प्रतीतितोऽपि भेदं दर्शयति—**अपदार्थोऽपि वाक्यार्थ** इति । पदस्यायमर्थो न भवति, अपितु पदसमष्टिरूपस्य वाक्यस्येति । न चायमुल्लासो विपर्यासरूपः, अपि तूपदर्शितैः कारणकालादिरूपैर्भेदैः सम्यग्रूप एवेति समुपसर्गाशयः । अभिहितान्वयवादिनामिति बहुवचनेन प्रेक्षावद्बहुत्वमासूचितम् । अथ मतान्तरमुपक्षिपति—**वाच्य एवे**त्यादि । मतमित्यनुषज्यते । वाच्यः पदार्थः । अन्विताभिधानवादिन इत्येकवचनेन बह्वनुग्रहाभावो ध्वनितः । प्रपञ्चोऽस्य पञ्चमे भविष्यति ।

य एते वाच्यादयस्त्रयोऽर्थास्तेषां काव्योपयोगितालक्षणं विशेषं दर्शयितुमाह-**सर्वेषामिति** । प्रायशः न तु सर्वदा । व्यञ्जकत्वमपीत्यपिशब्दाद् वाच्यादिरूपेणावस्थानमपि । इष्यते, ध्वन्याचार्यैरिति शेषः ।

माए घरेति ।

मातर्गृहोपकरणमद्य खलु नास्तीति कथितं (साधितं) त्वया ।
तद् भण किं करणीयमेवमेव न वासरस्तिष्ठति ॥

मातरित्यनुशयाभिव्यञ्जिकया सम्बोधनकाक्वा प्रवृत्तावक्षमत्वाभिनयो व्यज्यते ।

7ab. Generally all the senses are admitted to be suggestive also.

There, (the suggestiveness) of the expressed sense is as in the following:

Mother, you have said that there are, indeed, no household provisions for the day; so tell what should be done. The day would not stay on thus. 6

Here, the girl is desirous of wanton sport — this is suggested.

(The suggestiveness) of the indicated (sense) as in the following:

In persuading the cherished one, you are, O friend, put to trouble every moment for my sake. You have, indeed, acted in a manner befitting sympathy and affection. 7

Here, you have acted inimically by dallying with my lover—this is the indicated sense. And by that the disclosure of the guiltiness belonging to the lustful lovers is suggested.

(The suggestiveness) of the suggested (sense) as in the following:

Lo, steady and throbless shines the crane on the lotus leaf, as though it were a conch-shell placed on a plate of spotless emerald. 8

गृहोपकरणमित्यवश्यकर्तव्यत्वम् । अद्य खल्विति अद्यतनत्वाच्छङ्कानवकाशः । कथितं त्वया, न तु मया व्याज उत्पादितः । तद् भणेति स्वस्य कर्तव्याज्ञानाभिनयः । एवमेव न वासरस्तिष्ठतीति क्षणमात्रमपि विलम्बानर्हता ।

साहेन्तीति ।

साधयन्ती सखि ! सुभगं क्षणे क्षणे दूनितासि मम कृते ।
सद्भावस्नेहकरणीयसदृशं तावद् विरचितं त्वया ॥

अत्र कैतवोपचारान्मुख्यार्थबाधे विपरीतलक्षणयैवमर्थो भवतीत्याह—**अत्र मत्प्रियमित्यादि** । त्वया तावदित्थं कृतमिति योऽयमाक्षेपः, स तस्याप्यपराधमाविष्करोति । तदिह व्यङ्ग्यमित्याह—तेन चेति ।

उव णिच्चलेति ।

पश्य निश्चलनिष्पन्दा बिसिनीपत्रे राजते बलाका ।
निर्मलमरकतभाजनप्रतिष्ठिता शङ्खशुक्तिरिव ॥

अत्र निष्पन्दत्वेनाश्वस्तत्वं, तेन च जनरहितत्वम्, अतः सङ्केतस्थानमिति कयापि कञ्चित् प्रत्युच्यते। अथवा मिथ्या वदसि, न त्वमत्रागतोऽभूरिति व्यज्यते ॥

वाचकादीनां क्रमेण स्वरूपमाह—

साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचकः ॥ ७ ॥

इहागृहीतसङ्केतस्य शब्दादर्थविशेषप्रतिपत्तेरभावात् सङ्केतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन सङ्केतो गृह्यते स तस्य वाचकः।

सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा।

यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव, तथाप्यानन्त्याद् व्यभिचाराच्च तत्र सङ्केतः कर्तुं न युज्यत इति, गौः शुक्लश्चलो डित्थ इत्यादीनां शब्दानां विषयविभागो न प्राप्नोतीति च तदुपाधावेव सङ्केतः।

निश्चलेति शरीरस्य निष्पन्देति च मानसस्य क्षोभस्याभावकथनम्। अतो निर्मल-मरकतेति न वर्णमात्रसाम्यम्, अपि त्वचेतनस्थिताचेतनवस्तुवत् स्तैमित्यं च विवक्षितम्।

अत्र व्यङ्ग्यस्य व्यञ्जकतां प्रतीतिकक्ष्याक्रमेणोपदर्शयति—**अत्र निष्पन्देत्यादि**। केनापि काञ्चित् प्रतीत्यपि योजनार्हतायां कयापि कञ्चिदित्यादि-योजना नायिकारब्धस्य शृङ्गारस्य प्रकर्षप्रकाशनाय। सम्भोगाच्च विप्रलम्भः प्रकृष्यत इति तत्परत्वेनापि योजयति—**अथवा मिथ्येत्यादि**। इत्थं वाचकादय-स्त्रयः शब्दास्त्रयश्च वाच्यादयोऽर्थाः, त्रयाणामपि प्रतिस्वं व्यञ्जकत्वमित्युद्देश-त्रयम्। तत्र शब्दार्थयोः स्वरूपमिहोल्लासे लक्षयति। अर्थस्य व्यञ्जकत्वं तु तृतीये।

अथ '**एषां रूपं वक्ष्यत**' इति यत् प्रतिज्ञातं तस्यायमवसर इत्याह—**वाचकादीनामिति**।

साक्षात् सङ्केतितमिति। अभिधत्त इति। अभिधानमिह लक्षणव्यञ्जन-व्यतिरेकेण प्रतिपादनमात्रम्। इतरथा ह्यभिधया प्रतिपादको वाचकः वाचकस्य व्यापारोऽभिधेत्यन्योन्याश्रयता स्यात्।

ननु सङ्केत एव तावद् विमतिः, कथं सङ्केतितार्थसिद्धिः, कथं वा तन्नि-बन्धना वाचकतेत्यत आह—**इहागृहीतेत्यादि**। इह लोकव्यवहारे। **अर्थविशेष-प्रतिपत्तेरिति**। अज्ञातसङ्केतस्याप्यर्थसामान्यप्रतिपत्तिरस्तीति तद् व्यावर्तयितुं विशेषग्रहणम्। अर्थविशेषो जातिगुणादिः। सङ्केतसहाय एवेत्येवकारेण न पुनरन्यथेति नियमः प्रत्याय्यते। अत्रायमाशयः—ये हि कृतकशब्दवादिनस्तेषा

Here by throblessness is suggested the state of confidence. And by that the solitude (of the place). Hence this is the place of (our) appointment—this is hinted at by some (woman) to some (man). Or, you are telling a lie, you had not been here—this is suggested (by a woman to a man).

Now the author states the nature of the expressive word and others in order:

7cd. That is the expressive word which conveys a meaning that is directly conventional.

Here, for want of comprehension of the meaning of a word, whose convention is not grasped, a word conveys a particular meaning only when aided by convention. Hence that word is expressive of that meaning in which an unimpeded convention is ascertained.

8ab. The conventional meaning is four-fold, viz. the universal and others, or only the universal.

Even though an individual alone is competent for activity and passivity on account of its capacity for performing a fruitful function, yet it is not compatible to establish the convention there (i.e. in an individual) on account of (the errors of) infinitum and anomaly also, because the classification would not obtain in the case of words like 'a bull' 'white' 'moving' and '*Dittha*'. Hence there is convention only in respect of the attribute (of an individual).

मर्थेषु शब्दानां पारमेश्वरः सङ्केतोऽभिमतः। ये पुनर्नित्यशब्दवादिनस्तैरपि शब्दार्थयोर्नित्येऽपि सम्बन्धे सम्बन्धज्ञानं सङ्केतितत्वेनाभ्युपगन्तव्यं सम्बन्धज्ञानमन्तरेण शब्दार्थविशेषाप्रतिपत्तेरिति। इतिः प्रकारे। उक्तेन प्रकारेण सङ्केतसिद्धौ सङ्केतितस्यार्थस्याव्यवधानेन प्रतिपादकः शब्दो वाचकः।

ननु कोऽयं सङ्केतितोऽर्थः, यस्य साक्षात्प्रतिपादकः शब्दो वाचकत्वेन निर्णयितेत्यत आह—**सङ्केतितश्चतुर्भेद** इति। सङ्केतितः, अर्थ इत्यनुषज्यते जात्यादिरित्यत्रादिशब्देन गुणक्रियायदृच्छाः संगृह्यन्ते। जात्यादिर्जातिरेव वेति मतद्वयम्। वाशब्दात् तद्वदपोहयोर्विकल्पना। वक्ष्यति हि—'तद्वानपोहो वा शब्दार्थः' इति।

तत्र जात्यादिरिति मतमाक्षेपपुरस्कारेण प्रतिष्ठापयति—**यद्यप्यर्थक्रिये**त्यादिना। यद्यपीत्यर्धाङ्गीकारे। अर्थक्रिया आनयनबन्धनादिरूपा। प्रवृत्ति-

उपाधिश्च द्विविधः वस्तुधर्मो वक्तृयदृच्छासन्निवेशितश्च। वस्तुधर्मश्च द्विविधः सिद्धः साध्यश्च। सिद्धोऽपि द्विविधः पदार्थस्य प्राणप्रदो विशेषाधान-हेतुश्च। आद्यो जातिः। उक्तं हि वाक्यपदीये—"गौः स्वरूपेण न गौर्नाप्यगौः गोत्वाभिसम्बन्धात्तु गौः" इति।

द्वितीयो गुणः। शुक्लादिना हि लब्धसत्ताकं वस्तु विशेष्यते। साध्यः पूर्वापरीभूतावयवक्रियारूपः।

डित्थादिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन सन्निवेश्यत इति संज्ञारूपो यदृच्छात्मकः। गौः शुक्ल-श्चलो डित्थ इति 'चतुष्टयी शब्दानां प्रवृत्तिरिति' महाभाष्यकारः। परमाणु-त्वादीनां तु गुणमध्यपाठात् पारिभाषिकं गुणत्वम्। गुणक्रियायदृच्छानां वस्तुत

निवृत्ती अर्थाक्षिप्तपुरुषसम्बन्धिन्यौ। गामानयेत्यादिव्यवहारे हि व्यक्तिरेव खल्वानयनबन्धनार्थक्रियार्हा पुरुषप्रवृत्तिनिवृत्तियोग्या दृश्यते, न तु जात्यादिः। अतः संकेतफलभूतप्रवृत्तिनिवृत्तिशालिनी व्यक्तिरेव सङ्केतितार्थो भवितुमर्हति, न तु निष्फला जात्यादय इत्याक्षेपनिष्कर्षः। तदेतत् समाधत्ते—**तथाप्यानन्त्या-**दित्यादि। उक्तनयेन व्यक्तिरेव सङ्केतफलभागिनी, अथाप्यनुगतरूपापुरस्कारेण शृङ्गग्राहिकया यदि व्यक्तिमात्रे सङ्केतः क्रियेत तदैकस्यां कृतः परत्र न प्रवर्तेत इत्यानन्त्यदोष आपतेदित्यर्थः। ननु सङ्केतकृतामप्यानन्त्याद् भूतभविष्यद्व्यक्त्य-वच्छेदकत्वमुपपद्यते, स्वसङ्केतितासु च व्यक्तिषु व्यवहारः सम्भवतीति कथमा-नन्त्यदोष इत्यत आह—**व्यभिचाराच्चेति**। अत्रैतदाकूतं—यदि स्वसङ्केतितासु सर्वत्र व्यवहारसम्भवादानन्त्यमदोषं मन्यसे, तदा गामानयेति स्वसङ्केतितगवा-नयनाय वृद्धेन नियुक्तो नियोज्यः स्वसङ्केतितामितरामानयेदिति व्यभिचारश्च प्रसजेदिति। इत्थमानन्त्यव्यभिचारदोषौ दुरुत्तरौ, अतो न तत्र सङ्केतः कर्तुं युज्यत इत्यर्थः। अथदोषान्तरमाह—**गौः शुक्ल** इत्यादि। समनन्तरोपदर्शितेन दोषद्वयेन सङ्केतकरणानुपपत्तिर्दर्शिता। निरूप्यमाणेन तु दोषेण कृतेऽपि सङ्केते व्यवहारा-नुपपत्तिः। अस्यैव विभागस्य द्योतनाय सङ्केतः कर्तुं न युज्यत इति इतिकारः। **विषयविभाग** इति। अयं जातिवचनः, अयं गुणवचन इत्येवमादिरूपः। न प्राप्नोति, प्राप्तिर्योग्यता, अयोग्यः स्यादित्यर्थः। न पुनरवाप्तिः प्राप्तिः कर्मा-भावात्। गौः शुक्ल इत्यादिषु जातिगुणादिवचनेषु यदि व्यक्तिमात्रं सङ्केति-तार्थत्वेनाङ्गीक्रियेत तदा जातिगुणादिविभागो न प्रतीयेत, अपि तु व्यक्ति-र्व्यक्तिरित्युक्तप्रायता स्यात्। अतो जात्यादावेव सङ्केतो न्याय्य इत्याह—तदुपा-

And the attribute is two-fold—the inherent property of a thing and the one applied to it by the free will of the speaker. The inherent property of a thing is also two-fold—that which is accomplished and that which is being accomplished. The accomplished again is two-fold—that which gives life to an entity and the one which endows it with a speciality. There, the first is the universal. For it is said in the Vākyapadīya: "A cow is not a cow by its own self, nor even non-cow, but it is a cow on account of its relation with cowness."

The second is quality. For, a thing, which has come into existence, is differentiated by a quality such as white. The property, which is being accomplished, is of the form of an action, parts of which are prior and posterior (i. e. are in regular sequence).

The (ideal) form of words, like *Dittha*, which is completely apprehended by the impression of the last letter, and which is divested of successive order, is imposed by the speaker at his will on the entities like *Dittha* as an attribute. Hence that attribute, which is characterised by the free will, is known as proper name. "There is a four-fold currency of words as (instanced) in Cow, White, Moving and *Dittha*"—So says the author of the Mahābhāṣya. But the characteristic of being a quality of the atoms etc. is technical owing to their having been listed among qualities. Qualities, actions and proper names, though uniform in reality, appear to be diverse on

---

घावेवेति। उपाधौ कृतः सङ्केतः उपहितायां व्यक्तौ प्रवृत्तिनिवृत्ती जनयिष्यतीति भावः। तमुपाधिं विभज्य दर्शयति—**उपाधिश्चेति**। वस्तुधर्मः वस्तुषु नैसर्गिकतया विद्यमानो धर्मः। **वक्तृयदृच्छेति**। वस्तुष्वविद्यमानोऽपि वक्त्रा स्वेच्छया परिकल्पितः। **सिद्धोऽपीति**। सिद्धसाध्यतया द्विधा स्थिते वस्तुधर्मे सिद्धः पदार्थस्य प्राणप्रदत्वेन विशेषाधानहेतुत्वेन च द्विविधः। **आद्य** इति। प्राणप्रद इति य उपाधिः स जातिरित्यर्थः। प्राणप्रद इव प्राणप्रदः, यं विना वस्तुनः स्वरूपमेव न सिध्येदित्यर्थः। उक्तार्थे प्रामाणिकसंवादं दर्शयति—**उक्तं हीति**। वाक्यपदीये वाक्यानि पदानि चाधिकृत्य कृते ग्रन्थे। भर्तृहरिणेति शेषः। स्वरूपेण जात्यभिव्यञ्जकसास्नादिविशेषानुल्लिखितेन पिण्डमात्रेणोपलक्ष्यमाणः न गौः गौरिति व्यवहर्तुं न शक्यते। नाप्यगौः न चागौरश्वादिरित्यपि। अतोऽन्वयव्यतिरेकाभ्यां जातिरेव स्वरूपसिद्धिहेतुरित्याह—**गोत्वाभिसम्बन्धात्त्विति**।

एकरूपाणामपि आश्रयभेदाद् भेद इव लक्ष्यते, यथैकस्य मुखस्य खड्गमुकुरतैलाद्यालम्बनभेदात्।

हिमपयःशङ्खाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्लः इत्याद्यभिन्नाभिधानप्रत्ययोत्पत्तिसन्ततिस्तत् शुक्लत्वादि सामान्यम्। गुडतण्डुलादिपाकादिष्वेवमेव पाकत्वादि। बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा डित्थत्वाद्यस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ये।

तद्वानपोहो वा शब्दार्थः कैश्चिदुक्त इति ग्रन्थगौरवभयात् प्रकृतानुपयोगित्वाच्च न दर्शितम्।

द्वितीय इति। द्वितीयो विशेषाधानहेतुरुपाधिः। तस्य विशेषाधायितां विविच्य दर्शयति—**शुक्लादिना हीति**। जात्या सिद्धस्वरूपं हि वस्तु शुक्लादयो विशिषन्ति। तृतीयमुपाधिं विवेचयति—**साध्यः पूर्वेति**। साध्यः क्रियारूपः। ननु पचतीत्यादौ स्थालीसम्मार्जनाद्यवस्रावणान्ता बहवः परिस्पन्दा दृश्यन्ते। का तत्र क्रिया नामेत्यत आह—**पूर्वापरीभूतावयवेति**। न हि पचतीत्यादौ क्लेदादिमात्रं क्रिया, अपितु पूर्वापरीभूताः सर्व एवावयवाः। यदुक्तं—

"कालानुपाति यद्रूपं धात्वर्थस्य क्रियेति तद्"

इति। चतुर्थं विवेचयति—**डित्थादिशब्दानामित्यादि**। अन्ते भवा अन्त्या, तया निर्ज्ञेयम्। उत्तरोत्तरवर्णोच्चारणकाले हि पूर्वपूर्वविनाशे डित्थादिशब्दानां स्वरूपमन्तेभवया तत्तद्वर्णसंस्कारसध्रीचीनया बुद्ध्यैव निर्गृह्यते। ननु यदि तदापि वर्णेषु क्रमः, तर्हि स एव समुदायानुपपत्तिलक्षणो दोष इत्यत आह—**संहृतक्रममिति**। उच्चारणकालप्रतीतस्यानुसन्धानसमयेऽनुपयोगाद् विरोधाच्च क्रमस्या-(न्य?न्त्य) बुद्धावुपसंहारः। स्वरूपं वर्णसमुदायात्मकम्। यदृच्छया प्रवृत्तिनिवृत्तिनैरपेक्ष्येण स्वातन्त्र्येण। उपाधित्वेन व्यवहारावच्छेदकत्वेन। सन्निवेश्यते प्रामाणिकत्वेनोपाधीयते। इतिः प्रकारे। संज्ञारूप इति न विशेषणम् अव्यभिचारात्, अपि तु यदृच्छात्मकः संज्ञारूप एवेति ज्ञाप्यते। इतिः प्रकारे। उक्तेन प्रकारेण। चतुष्टयी प्रवृत्तिरित्यन्वयः। चतुष्टयी चतुरवयवा। उक्तगुणलक्षणाव्याप्तिशङ्कां शमयितुमाह—**परमाणुत्वादीनामिति**। यद्यपि परमाणुः स्वरूपेण न परमाणुरित्याद्युपदर्शितयुक्त्या परमाणुत्वादीनां जातित्वमेवेति युक्तम्। अथाप्याचार्येण गुणमध्ये पठितत्वाद् गुण इति परिभाषैव अतो नाव्याप्तिः काचिदिति यावत्। अथ जातिरेवेति मतमाक्षेपपुरस्कारेणोपन्यस्यति—**गुणक्रियायदृच्छेत्यादि**। यदृच्छेति यदृच्छाशब्दनिर्देशो भीमसेनो भीम इत्यादाविव प्रतीतलक्षणया। **एकरूपाणामिति**। शुक्लतरः शुक्लतमः गच्छतितरां गच्छति-

account of the diversity of the substratum. As the same face (appears to be different) due to the difference of receptacles such as a sword, a mirror and oil.

That is the universal, such as whiteness, by virtue of which there is an identical stream of expression and cognition, such as (this is) white, (that is) white in respect of white etc., which are, in reality, different in different substrata such as snow, milk and conch-shell. In the same manner is the (universal) cookingness and the like in the cooking and the like of jaggery, rice, etc. And in the words, *Ḍittha* etc., which are uttered by a child, an old man, a parrot, etc., or in the objects *Ḍittha* and the like, that are changing from moment to moment, there is the universal *Ḍitthaness* and the like. Hence, universal alone is the ground for the convention of words— thus hold others (namely, the *Mīmāṁsakas*).

The meaning of a word has been mentioned by some to be one qualified by that (viz. the universal) or exclusion from what it is not (according to the Logicians and Buddhists respectively). But this has not been treated here for fear of swelling the bulk of the work and due to its irrelevance for the matter in hand.

तमामित्यादिना रूपभेदेन वस्तुतो रहितानामपि। आश्रयभेदात् शङ्खशकुन्तादेराश्रयस्य वैमल्यशीघ्रत्वादितारतम्यविशेषात्। अत एव भेदाभासतां प्रकाशयितुं भेद इवेत्युपन्यासः। यद्यपि गुणक्रियादौ शुक्लतरः शुक्लतमः गच्छतितरां गच्छतितमामित्यादिकस्य रूपभेदस्यानुभवसिद्धत्वाद् न गुणत्वक्रियात्वादिर्जातिः कल्पयितुं शक्यते, अनुगतरूपाभावे तदसम्भवात्। यत्र हि जातिः सम्भविनी, न तत्र तारतम्यव्यवहारः। न हि गोतरो गोतम इति व्यवहारोऽस्ति। इत्थं गुणत्वादिजातौ येयमनुपपत्तिः सोऽयमनुपपत्त्याभास एव, शुक्लतरः शुक्लतम इत्यादेर्भेदस्याश्रयवैमल्यतारतम्योपाधिकत्वात्। अतो हिमपयःशङ्खादिषु शुक्लिम्न एकरूपत्वान्नाशक्यकल्पना जातिरित्याशयः। एकरूपस्याप्युपाधितो भेदं दृष्टान्तेन द्रढयति **यथैकस्येत्यादि**। खड्गादीनि मुखस्य प्रतिबिम्बनालम्बनानि। खड्गालम्बनं श्यामतया, मुकुरालम्बनमुज्ज्वलतया, तैलालम्बनं तु स्निग्धतया मुखमाभाति। न त्वेतावता मुखे रूपवैविध्यमिति भावः। इत्थं गुणक्रियादिषु तारतम्याभावसिद्धौ न्यायतो जातिमवस्थापयति—**हिमपयश्शङ्खादीत्यादिना**। **परमार्थत** इति। न हि य एव

स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते ॥ ८ ॥

स इति साक्षात् सङ्केतितः । अस्येति शब्दस्य ॥

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् ।

अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया ॥ ९ ॥

कर्मणि कुशल इत्यादौ दर्भग्रहणाद्ययोगाद् गङ्गायां घोष इत्यादौ च गङ्गादीनां घोषाद्यधिकरणत्वासम्भवाद् मुख्यार्थस्य बाधे, विवेचकत्वादौ सामीप्यादौ च सम्बन्धे, रूढितः प्रसिद्धेः, तथा गङ्गातटे घोष इत्यादेः प्रयोगाद् येषां तथा न प्रतिपत्तिस्तेषां पावनत्वादीनां धर्माणां तथा प्रतिपादनात्मनः प्रयोजनाच्च मुख्येनामुख्योऽर्थो लक्ष्यते यत् स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा ।

हिमाश्रयः शुक्लः स एव क्षीराश्रय इति प्रतिवस्तु भिन्ना एव गुणव्यक्तयः । भिन्नासु च येयमभिन्ना संज्ञा हिमस्यापि गुणः शुक्लः पयसोऽपि गुणः शुक्ल इत्यादिरूपा, यश्चासावभिन्नः प्रत्ययः, तदुभयं नाहेतुकमुपपद्यते, यश्चास्य हेतुः स जातिरिति भावः । क्रियासु जातिं साधयति—**गुडतण्डुलेति** । गुडतण्डुलादीत्यादिशब्दात् क्रियावदन्तरं पाकादीत्यादिशब्दाच्च क्रियान्तरमुपसंगृह्यते । अथ डित्थादौ शब्देऽर्थे च नानात्वसाधनपुरस्कारेण जातिमायोजयति—**बालवृद्धेति प्रतिक्षणमिति** च । अर्थस्य प्रतिक्षणं भेदो वैनाशिकादिदर्शनाश्रयणात् । डि(त्थादित्वम?) त्थत्वाद्यस्ति । डित्थादिषु शब्देष्वर्थेषु वा परमार्थतो भिन्नेषु यद्वशेन डित्थो डित्थ इत्याद्यभिन्नाभिधानप्रत्ययोदयः, तद् डित्थत्वादिसामान्यमिति यत उपपत्तिरतोऽस्तीति भावः । मतमेतदुपसंहरति—**इति सर्वेषां शब्दानामि**त्यादि । **तद्वानिति** । तच्छब्देन सामान्यप्रत्यवमर्शः । तद्वान् सामान्यवान् । जातिविशिष्टा व्यक्तिरित्यर्थः । अपोहो व्यावृत्तिः गौरित्यादावगवादिव्यावृत्तिमेव ह्यर्थमाहुरितरे जात्यभावात् । प्रस्तावं सञ्चुकोचयिषुराह—**ग्रन्थगौरवभयादिति** । गौरवमपि ग्रन्थस्याङ्गीकर्तव्यमेव स्याद् यद्युपयुज्येत प्रकृते । तदपि नास्तीत्याह —**प्रकृतानुपयोगित्वाच्चेति** ।

स मुख्य इति । यो हि जात्यादिरूपः संकेतितार्थः स मुख्यस्तत्प्रतिपादकः शब्दव्यापारोऽभिधेति ।

सूत्रान्तरव्यवहितौ सर्वनामपरामर्शनीयौ शब्दतो दर्शयति—**स इति साक्षात्सङ्केतित** इति, **अस्येति शब्दस्येति** च ॥

इत्थं **वाचकं** शब्दं वाच्यमर्थमभिधालक्षणं व्यापारं च परिपाट्या प्रसाध्य लाक्षणिकस्य लक्ष्यस्य च स्वरूपनिरूपणं लक्षणास्वरूपनिरूपणैकायत्तमिति तामेवादौ निरूपयति —**मुख्यार्थबाधे** इत्यादि । मुख्यार्थबाधे तद्योग इति निमित्तार्थे

8cd. That is the primary meaning; there the primary function of this (i.e. the word) is called denotation.

'That' means what is directly conventional. 'Of this' means of the word.

9. Indication is that superimposed function whereby another meaning is conveyed either through usage or motive, when there is incompatibility of the primary meaning as well as its interconnection.

When owing to the absence of (logical) connection with the fetching of the grass etc. as in the cases like 'expert in work', and owing to the impossibility of Gaṅgā and the like being the site of a hamlet and the like in the cases such as 'a hamlet on the Gaṅgā' there is the incompatibility of the primary meaning, and when there is the connection such as discrimination and proximity (respectively in the above cases), through usage i.e. through universal apprehension (in the first case), similarly through motive in the form of conveying in that manner those properties of coolness and holiness etc. which would not be so conveyed by the use of 'a hamlet on the bank of the Gaṅgā' (in the second case), that superimposed function of a word abiding in the intermediate sense, is indication conveying the secondary meaning through the primary.

सप्तम्यौ । अतः प्रयोजनादिति पञ्चमीसमानार्थतया क्रियाभिसम्बन्धः । तद्योग इति तच्छब्देन सन्निहितो मुख्यार्थः परामृश्यते । मुख्यार्थेन सह लक्ष्यस्य सम्बन्धे विद्यमान इत्यर्थः । रूढितोऽथेत्यथशब्दो लक्षणाद्वयविभागप्रथनाय । उभयी हि लक्षणा रूढा चारूढा च । मुख्यार्थबाधः सम्बन्धश्चोभयोरपि साधारणः । रूढि-प्रयोजने तु यथास्वं व्यवतिष्ठेते । यत् सेत्यत्र यदित्यव्ययं यत इत्यर्थे । यतो व्यापाराल्लक्षयति शब्दः सा लक्षणेत्यर्थः । न तु यल्लक्ष्यते सा लक्षणेति लक्ष्यार्थ-विशेषणतया योज्यम् । तथा च सति यल्लक्ष्यं सा लक्षणेत्यायातम् । न ह्येषा लक्षणा । लक्ष्यत्वं ह्यर्थस्य धर्मः लक्षणा तु शब्दस्य । अतो यतो व्यापाराल्लक्ष-यति शब्दः, सा लक्षणेत्यवस्थितम् ।

स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम् ।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥ १० ॥

'कुन्ताः प्रविशन्ति' 'यष्टयः प्रविशन्ती'त्यादौ कुन्तादिभिरात्मनः प्रवेशसिद्ध्यर्थं स्वसंयोगिनः पुरुषा आक्षिप्यन्ते । तत उपादानेनेयं लक्षणा ।

'गौरनुबन्ध्य' इत्यादौ श्रुतिचोदितमनुबन्धनं कथं मे स्यादिति जात्या व्यक्तिराक्षिप्यते, न तु शब्देनोच्यते,

"विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे"

इतिन्यायादित्युपादानलक्षणा नोदाहर्तव्या । न ह्यत्र प्रयोजनमस्ति, न वा रूढिरियम् । व्यक्त्यविनाभावित्वात् तु जात्या व्यक्तिराक्षिप्यते । यथा क्रियतामित्यत्र कर्ता, कुर्वित्यत्र कर्म, प्रविश पिण्डीमित्यादौ गृहं भक्षयेत्यादि च ।

तदेतत् सोदाहरणं व्याचष्टे—कर्मणि **कुशल** इत्यादि । **दर्भग्रहणेति** । कुशलपदनिरुक्तिः कुशान् लातीति । लक्षणान्तरार्थमुदाहरणान्तरं—**गङ्गायां घोष** इत्यादि । बाध इति । अभिमतवाक्यार्थाननुप्रवेशो मुख्यस्यार्थस्य बाधः । विवेचकत्वादौ सामीप्यादौ चेति विभागेन सम्बन्धः कथितः । तथेत्यथशब्दप्रतिबिम्बतया विभागो द्योतितः । ननु **'गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः', 'स्वायत्तश्च शब्दप्रयोग'** इति न मुख्यपरित्यागो युक्तः, अमुख्याश्रयणं त्वयुक्ततरमिति कथं लक्षणावृत्तिरुपादेयेत्यत आह—**गङ्गातटे घोष इत्यादेरि**त्यादि । येषां तथेति तथा प्रतिपादनात्मन इति चोभयत्रापि तथेत्यनेन मुख्यातिशायिता प्रत्याय्यते । मुख्यप्रयोगसमकक्ष्यकं चेत् प्रयोजनं तदा नेष्यत एव लक्षणा । यत्तत् प्रयोजनं न मुख्याश्रयणे लभ्यते, तच्चेदमुख्याश्रयणे लभ्येत, ततो लक्षणेष्यत इति भावः । स आरोपित इति तदो व्यापारविशेषणतां सामानाधिकरण्येन दर्शयता यदोऽपि तत्परामर्शकत्वमासूचितम् । अतो यल्लक्ष्यत इति यदो लक्ष्यार्थविशेषणता ग्रन्थकृतोऽभिमता ज्ञायते । व्यापार इति क्रियाशब्दविवृतिः । सान्तरार्थनिष्ठ इति आरोपितत्वोपपादनाय । निरन्तरार्थनिष्ठो व्यापारो नारोपितः, सान्तरार्थनिष्ठस्त्वारोपित इति यावत् । मुख्यव्यवहितत्वाल्लक्ष्यः सान्तरार्थः । मुख्यार्थबाधं सम्बन्धं रूढियोजनयोरन्यतरच्च निमित्तत्वेनाश्रित्य मुख्येनामुख्याक्षेपो लक्षणेति निष्कर्षः ।

तामिमां शाखां द्विधा ख्यापयितुमाह — **स्वसिद्धय** इति । सा लक्षणा उपादानं लक्षणं चेति द्विधोक्ता, उपादानलक्षणा लक्षणलक्षणा चेति द्विधा सोक्तेत्यर्थः । यथायोगमनयोर्लक्षणकथनं—**स्वसिद्धय** इति **परार्थमिति** च । स्वसिद्धय इति स्वशब्द आत्मीयवचनः । आत्मीयस्य वाक्यानुप्रवेशस्य सिद्धये परस्य स्वसम्बन्धिन आक्षेपः सामर्थ्यादानयनमुपादानलक्षणेत्यर्थः ।

10. Assumption of another (i.e. secondary meaning) to establish itself (i.e. primary meaning) and the surrender of itself (i.e. primary meaning) are *inclusive indication* and *exclusive indication* (respectively). Thus, that pure indication alone is two-fold.

In cases like 'Lances enter' and 'Staffs enter' the (words) lances and others point to persons connected with them in order to make their own entrance possible. Therefore, this indication is by inclusion (of the primary meaning).

In cases like 'A bull should be immolated' the individua (bull) is implied by the universal (bullness) for the reason 'how can the immolation, enjoined by the Veda, be possible in my case ?' But (the individual bull) is not denoted by the word on account of the rule—"Denotation would not go to (express) the qualified when its power has been exhausted in (expressing) the qualification." But this (viz. a bull should not be immolated) should not be quoted as an example of inclusive indication. For, there is no motive here. Nor is this usage. The individual is implied by the universal on account of the universal being invariably connected with the individual. As for example, an agent is implied in "Let (it) be done", and the object is implied in "Do". And in cases like

---

तदेतत् सोदाहरणं व्याचष्टे—**कुन्ताः प्रविशन्तीत्यादि** । आत्मनः प्रवेशेति स्वशब्दस्यात्मीयवचनता प्रकाशिता । सूत्रे पराक्षेप इत्यत्र न परमात्रस्याक्षेपः, अपि तु स्वसम्बन्धिन इत्याशयेनोपन्यस्तं **स्वसंयोगिन** इति । निर्ब्रुवन्नेव लक्षणां निगमयति—**तत उपादानेति** । यतः कुन्तादिभिरपरित्यक्तस्वरूपैरेव स्वसंयोगिन आक्षिप्यन्ते, अतः स्वरूपोपादानेनैव प्रवृत्तत्वादुपादानलक्षणेति । अथाविषये य उपादानलक्षणाधिया भ्रान्तास्तानुपहसन् विषयमस्याः सम्यग् विवेचयति — **गौरनुबन्ध्य इत्यादाविति** । स्वकीयस्यानुबन्धनस्य सिद्धये जात्या व्यक्तिराक्षिप्यते । अनेन स्वसिद्धये पराक्षेप इति लक्षणं योजितम् । ननु व्यक्तावप्यभिधाङ्गीकारात् सापि वाच्यैवास्तु किं लक्षणयेत्यत आह—**न तु शब्देनेति** । तत्र हेतुमाह—**विशेष्यं नाभिधा गच्छेदिति** । गौरित्यत्र विशेष्यभूतां व्यक्तिमभिधा न गोचरयेत् । कुतः, क्षीणशक्तिर्विशेषणे विशेषणभूते गोत्व एव क्षीणसामर्थ्यत्वात् । गौरनुबन्ध्य इत्यादौ हि जातेः पदार्थत्वाद् गोत्वे चोदितमनुबन्धनं

'पीनो देवदत्तो दिवा न भुङ्क्त' इत्यत्र च रात्रिभोजनं न लक्ष्यते, श्रुतार्थापत्तेर्दृष्टार्थापत्तेर्वा तस्य विषयत्वात् ।

गङ्गायां घोष इत्यत्र तटस्य घोषधिकरणतासिद्धये गङ्गाशब्दः स्वार्थमर्पयतीत्येवमादौ लक्षणेनैषा लक्षणा । उभयरूपा चेयं शुद्धा उपचारेणामिश्रत्वात् । अनयोर्भेदयोर्लक्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यम् । तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसम्प्रत्ययः । गङ्गासम्बन्धमात्रप्रतीतौ तु गङ्गातटे घोष इति मुख्यशब्दाभिधानाल्लक्षणाया को भेदः ।

व्यक्तिमनाक्षिप्य न घटते । न च व्यक्तेर्वाच्यत्वं युक्तम् । **नागृहीतविशेषणा विशेष्यबुद्धिरि'**ति न्यायाद् विशेषणभूतायां जातावेव शक्तेरुपक्षयात् । यदुक्तम्—

"भवेद् विशेष्यधीरेव नागृहीतविशेषणा ।
अतो जातिर्हि शब्दार्थो व्यक्तेस्त्वनवसानतः ॥"

इति । अनया दिशा यत् कैश्चिद् उपादानलक्षणेयमुदाहृता, तदयुक्तमित्याह—**इत्युपादानलक्षणा नोदाहर्तव्येति** । तत्र हेतुमाह—**नह्यत्र प्रयोजनमस्ति न वा रूढिरियमिति** । किमियं प्रयोजनलक्षणा उत रूढा । न तावदाद्या, प्रयोजनाभावात् । मुख्यार्थधर्माणां हि लक्ष्यगतत्वप्रतीतिर्लक्षणायां प्रयोजनम् । न ह्येतत् प्रकृते सम्भवति जातेरधर्मकत्वादिति भावः । नापि रूढा । रूढायां हि मुख्यार्थस्य स्थगनमेव । इह तु प्रतीताया जातेर्वाक्यार्थानुप्रवेशाय प्रयास इति कथं रूढिलक्षणा । तर्ह्यभिधालक्षणयोर्द्वयोरप्यनुपपत्तौ व्यक्तिप्रतीतेः का गतिरित्यत आह—**व्यक्त्यविनाभावित्वादिति** । द्विविधो ह्याक्षेपः लक्षणामूलोऽविनाभावमूलश्च । इहाविनाभावमूलेनैवार्थान्तरप्रतीतिर्न लक्षणामूलेनेति यावत् । विषयान्तरेऽपि लक्षणानैरपेक्ष्येणाविनाभावेनैवाक्षेपसिद्धिं दर्शयति—**यथा क्रियतामित्यत्रे**त्यादि । अत्र हि कर्मैव लकारस्यार्थः । तत् तु स्वात्मन्यपर्यवसानात् कर्तारमाक्षिपति । तथा कुर्वित्यत्र कर्ता कर्माक्षिपति । अथ क्रियाकारकविशेषयोर्मिथोऽप्याक्षेपकत्वं दर्शयति—**प्रविश पिण्डीमित्यादि** । प्रसङ्गादर्थापत्तावपि लक्षणाभ्रमो न कार्य इत्याह—**पीनो देवदत्त** इति । शब्दप्रमाणाधिगतस्यार्थस्यानुपपत्तावर्थान्तरकल्पनं श्रुतार्थापत्तिः । प्रत्यक्षादिप्रमाणान्तराधिगतस्यार्थस्य त्वन्या ।

एवमुपादानलक्षणाया विषयं यथावद् विभज्य लक्षणलक्षणामुदाहृत्य दर्शयति — **गङ्गायां घोष** इत्यादि । तटस्य घोषाधिकरणतासिद्धये स्वार्थम-

"Enter", "Sweet-ball" etc. words like "a house" and "eat" are understood.

And in the example "The fat Devadatta does not eat by day" the eating at night is not indicated. For, that (example) is a case of verbal presumption or factual presumption.

In the example, "A hamlet on the Gaṅgā", the word Gaṅgā surrenders its meaning in order to establish the bank as the location of the hamlet. Thus, in such cases the indication is by exclusion. And this two-fold (indication) is pure as it is not mixed with fancied identification founded on resemblance.

In these two divisions (of *indication*) there is no separateness amounting to distinction between the indicated (sense) and the indicative. For, when the words like Gaṅgā and the like convey (the sense of) the bank and the like, the apprehension of the motive which is sought to be established is obtained only after the comprehension of the identity (of the Gaṅgā with the bank). If (by the use of indication) merely a relation with Gaṅgā (viz. stream) were to be apprehended then what difference would there be of indication and a direct mode of expression—"A hamlet on the bank of Gaṅgā"?

र्पयति त्यजति । इदं परार्थं स्वसमर्पणमिति लक्षणयोजनम् । परार्थं तटादेर्घोषाधिकरणतादिप्रयोजनसिद्धये स्वात्मनस्त्यागः। लक्षणेनैषा **लक्षणेति** । लक्षणमुपलक्षणं तेनोपलक्षितत्वाल्लक्षणलक्षणेत्यर्थः । अथ शुद्धैवेति सौत्रं पदं व्याचष्टे—**उभयरूपा चेयमित्यादि** । मुख्यलक्ष्ययोर्हि ताद्रूप्यप्रतीतिः शुद्धता । शुद्धौ हेतुमाह—**उपाचारेणामिश्रत्वादिति**। गौर्वाहीक इत्यादिवद् भेदेन प्रतीतयोरैक्यारोपणमुपचारः । तदेवानुपचरितत्वमुपपादयति — **अनयोर्भेदयोरिति** । अनयोः उपादानलक्षणमूलयोः। ताटस्थ्यमुपचरितत्वम् । ताटस्थ्यस्य भेदरूपत्वान्न तदिहास्तीत्यर्थः । ताटस्थ्याभावमन्वयतो दर्शयति तावत्—**तटादीनामिति** । गङ्गादिशब्देनैव हि तटादिप्रतिपादनं ताद्रूप्यप्रतिपत्तये । ताद्रूप्यप्रतिपत्तावेव हि गङ्गादिधर्मधर्मित्वेन तटादिप्रतीतिलक्षणस्य प्रयोजनस्य सम्यक्प्रतीतिः । व्यतिरेकतोऽपि दर्शयति—**गङ्गासम्बन्धे**त्यादि । भेदो विशेष इत्यर्थः ।

सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा ।

आरोप्यमाणः आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणा सारोपा ।

विषय्यन्तः कृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका ॥ ११ ॥

विषयिणारोप्यमाणेनान्तःकृते निगीर्णे अन्यस्मिन् आरोपविषये सति सा साध्यवसानिका स्यात् ।

भेदाविमौ च सादृश्यात् सम्बन्धान्तरतस्तथा ।
गौणौ शुद्धौ च विज्ञेयौ

इमावारोपाध्यवसानरूपौ । सादृश्यहेतू भेदौ गौर्वाहीक इत्यत्र गौरियमित्यत्र च । अत्र हि स्वार्थसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनिमित्तत्वमुपयान्तीति केचित् । स्वार्थसहचारिगुणभेदेन परार्थगता गुणा एव लक्ष्यन्ते, न तु परार्थोऽभिधीयते इत्यन्ये । साधारणगुणाश्रयणेन परार्थ एव लक्ष्यत इत्यपरे । उक्तं चान्यत्र—

अथ लक्षणान्तरमाह—**सारोपान्या त्विति ।** अन्या शुद्धातः । तुशब्दो वैधर्म्यद्योतनाय ।

तदेतद् व्याचष्टे—**आरोप्यमाण** इत्यादि । विषयविषयिणावारोपप्रस्तावात् तन्निबन्धनावित्यभिप्रेत्य आरोप्यमाण आरोपविषयश्चेत्युक्तम् । आरोप्यमाण इति विषयिशब्दोऽपि व्याख्यातः । आयुर्घृतमित्यादौ हि आयुष्टवाद्यारोपस्य विषयो घृतादिः । आयुरादिरेवारोप्यमाणो विषयी । अनपह्नुतभेदाविति तुशब्दद्योत्यं शुद्धलक्षणातो वैधर्म्यम् । सामानाधिकरण्येनेति तथाशब्दार्थः । निर्दिश्येते इति लटा सौत्रस्योक्ताविति पदस्य भूतार्थतायामविवक्षा दर्शिता । आयुर्घृतमित्यादौ हि शब्दद्वयेन भेदतः प्रतीतयोरैक्यस्यारोपितत्वप्रतीतेरियं सारोपा ।

अस्या एव विशेषान्तरमाह—**विषय्यन्तरित्यादि** । आयुरेवेदमित्यादौ हि आरोपविषयिणायुषा विषयो घृतादिरपह्नूयते । अतः साध्यवसानेयम् । अध्यवसानं निश्चयज्ञानम् । तदिह अतस्मिंस्तदेवेत्ययथसरूपम् ।

द्वयोरपि द्वैविध्यं दर्शयति—**भेदाविमौ चेति** । सादृश्याद् गौणो सम्बन्धान्तरतः शुद्धाविति विभागः ।

स्त्रीलिङ्गान्तत्वेन निर्दिष्योर्भेदावित्यनेन सह सामानाधिकरण्यस्वारस्यायाह—**आरोपाध्यवसानरूपाविति** । गौणावुदाहर्तुमाह—**सादृश्यहेतू** इत्यादि ।

11ab. But another (variety) is the superimponent indication wherein are expressed the object superimposed (*viṣayin*) as also the substratum of superimposition (*viṣaya*).

Where the object superimposed and the substratum of superimposition are stated in the same case-ending with their distinction non-suppressed—that indication is superimponent.

11cd. Wherein the other (viz. substratum of superimposition) is swallowed by the thing superimposed—that would be introsusceptive (indication).

When the other, namely, the substratum of superimposition, is put within or swallowed by the object which is being superimposed, that would be introsusceptive (indication).

12abc. And these two divisions (of indication), arising from resemblance and from some other relation, should be known as qualitative (i.e. as divisions of *Gauṇī Lakṣaṇā*) and pure (i.e. as divisions of *Śuddhā Lakṣaṇā*).

These two divisions (of *gauṇī lakṣaṇā*), characterised by the superimposition and introsusception and caused by resemblance, are (respectively) instanced in "Vāhīka is a bull" and "This is a bull".

Here, for instance, the qualities like dullness and stupidity, associated with the primary sense, though indicated, serve the purpose of using the word '*Gauḥ*' to express the other meaning (*i.e. Vāhīka*) — thus hold some. Owing to their identity with the qualities associated with the primary sense, the qualities belonging to the other object (i.e. *Vāhīka*) alone are indicated, but the other object is not expressed—so say others. On account of being the substratum of common qualities the other object itself is indicated—thus maintain others.

गौर्वाहीक इति गौणसारोपा । गौरयमिति गौणसाध्यवसाना । अतः सादृश्यसम्बन्धप्रवृत्तौ लक्षणाविशेष एवायं, न तु गौणी नाम वृत्त्यन्तरं किञ्चिदिति भावः । अत्राचार्यविमतीरुपन्यस्यति—**अत्र हि स्वार्थेत्यादि** । गौर्वाहीक इत्यत्र गोशब्देन स्वार्थों गौरभिधीयते । तस्य वाहीकविशेषणत्वानुपपत्तौ गोसहचारिणो

"अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते ।
लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता ॥"

[Tantravārttika. I. IV. 22]

इति । अविनाभावोऽत्र सम्बन्धमात्रं, न तु नान्तरीयकत्वम् । तत्त्वे हि मञ्चाः क्रोशन्तीत्यादौ लक्षणा न स्यात् । अविनाभावे चाक्षेपेणैव सिद्धे लक्षणाया नोपयोग इत्युक्तम् । आयुर्घृतम्, आयुरेवेदमित्यादौ च सादृश्यादन्यत् कार्यकारणभावादि सम्बन्धान्तरम् । एवमादौ च कार्यकारणभावादिलक्षणसम्बन्धपूर्वमारोपाध्यवसाने ।

अत्र गौणभेदयोर्भेदेऽपि ताद्रूप्यप्रतीतिः सर्वथैवाभेदावगमश्च प्रयोजनं, शुद्धभेदयोस्त्वन्यवैलक्षण्येनाव्यभिचारेण च कार्यकारित्वादि ।

क्वचित् तादर्थ्यादुपचारः, यथेन्द्रार्था स्थूणा इन्द्रः । क्वचित् स्वस्वामिभावाद्, यथा राजकीयः पुरुषो राजा । क्वचिदवयवावयविभावाद्, यथा अग्रहस्त इत्यत्राग्रमात्रेऽवयवे हस्तः । क्वचित् तात्कर्म्याद्, यथा अतक्षा तक्षणात् तक्षा ।

गुणा जाड्यमान्द्यादयो लक्ष्यन्ते । अथ लक्षितानिमान् प्रवृत्तिनिमित्तीकृत्य वाहीकोऽभिधीयत इत्येकं मतम् । त्रिरेवं व्यापारकल्पनामसहमानानां पुनर्मतं—**स्वार्थसहचारीति** । स्वार्थसहचारिगुणसाजात्यसम्बन्धाद् वाहीकगुणा एव गोशब्देन लक्ष्यन्ते, न तु वाहीकोऽभिधीयते । स हि स्वगुणैरविनाभावेनाक्षिप्यत इत्याह—**न तु परार्थे** इति । अथ सिद्धान्तः—**साधारणगुणेति** । गुणसाधारण्यं सम्बन्धमाश्रित्य परार्थ एव लक्ष्यते ।

उक्तार्थे प्रामाणिकसंवादायाह—**अभिधेयाविनाभूतेति** । अविनाभूतस्यार्थस्य प्रतीतिरित्यर्थः ।

नन्वविनाभावे लक्षणा गुणयोगे गौणीति भेदोऽत्र प्रतीयते, कथमभेदसंवादकत्वेन दर्शिता कारिकेत्यत आह—**अविनाभावोऽत्रेति** । नान्तरीयकत्वमपृथग्भावः । **तत्त्वे हीति** । अविनाभावपदस्य नान्तरीयकार्थत्वेऽभ्युपगत इत्यर्थः । **लक्षणा न स्यादिति** । अविनाभावाभावादिति शेषः । दोषान्तरमाह—**अविनाभावे चेति** । **उक्तमिति** । गौरनुबन्ध्य इति प्रस्तावे । अथ शुद्धलक्षणाद्वयमुदाहरति—**आयुर्घृतम् आयुरेवेदमिति** । अथ यत्र येन धर्मेण प्रवृत्तिर्लक्षणायास्तत्र तेनैव तद्व्यपदेशो भवतीति व्युत्पादयति—**एवमादौ च कार्येति पूर्वमारोपेति** च । भेदचतुष्टयेऽपि प्रयोजनं विविच्य दर्शयति लक्षणाविवेचनस्य तदर्थत्वात्—**अत्र गौणभेदयोर्भेदेऽपीत्यादि** । भेदेऽपि मुख्यलक्ष्ययोर्भेदप्रतीतावपीत्यर्थः । ताद्रूप्यप्रतीतिः सारोपायाम् । सर्वथैवाभेदागमः साध्यवसानायाम् । भेदेन प्रतीतयोर्गोवाहीकयोरभेदारोपरूपया लक्षणया ताद्रूप्यादिः प्रयोजनत्वेन प्रत्याय्यत इति

And it is said elsewhere—"Indication is said to be the cognition of what is connected with the primary sense. It is but desirable to admit the process to be qualitative on account of the connection (of the expressed sense, viz. bull) with the qualities of what is under indication (viz. *Vāhīka*)."

Here 'the state of not being without' (*avinābhāva*) means connection in general, but not an invariable relation. For, if it were so, there would be no indication in such cases as "The cots cry"; and if invariable relation were to exist then the assumption (or inference) alone will do, there will be no use of indication.

In cases such as "Ghee is life", "This is life itself", there is a relation other than similarity, like the relation of cause and effect. And in such cases the superimposition and introsusception are based on relations such as the one found in cause and effect.

Here in the two varieties of qualitative (indication), cognition of identity despite difference in substratum and the cognition of complete identity (respectively) is the purpose. But in the two varieties of pure (indication) the capability of bringing about the result in a way distinct from others and without fail (is the purpose).

In some cases the secondary application is owing to subserviency; for example, sacrificial post for Indra is called Indra. In some cases (it is) owing to the relation of oneself with one's master; for example, an officer of a king is (called) the king. In some cases (it is) owing to the relation of the parts with the whole; for example, in the foremost hand (i.e. palm). Here the word 'hand' stands for its foremost part only. In some cases (it is) owing to the sameness of occupations, for example, a non-carpenter (by caste) is, owing to the carpentry, called carpenter.

भाव: । **शुद्धभेदयोस्त्विति** । घृतायुरादिकयोरभेदावगमः शुद्धिः । तत्र प्रयोजक-मन्यदेवेति भाव: । अन्यवैलक्षण्येनाव्यभिचारेणेति च विभागेन प्रयोजनोक्तिः । अथोपचारप्रवृत्तौ सम्बन्धवैविध्यं दर्शयति—**यथेन्द्रार्थाः स्थूणा** इत्यादि । या हि

लक्षणा तेन षड्विधा ॥ १२ ॥

आद्यभेदाभ्यां सह ।

सा च—

व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने ।

प्रयोजनं हि व्यञ्जनव्यापारगम्यमेव ।

तच्च गूढमगूढं वा

तच्चेति व्यङ्ग्यम् । गूढं यथा—

मुखं विकसितस्मितं वशितवक्रिम प्रेक्षणं
समुच्चलितविभ्रमा गतिरपास्तसंस्था मतिः ।
उरो मुकुलितस्तनं जघनमंसबन्धोद्धुरं
बतेन्दुवदनातनौ तरुणिमोद्गमो मोदते ॥ ९ ॥

[Ruma, acc. to Sūktimuktāvalī]

अगूढं यथा—

श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम् ।
उपदिशति कामिनीनां यौवनमद एव ललितानि ॥ १० ॥

[Ravigupta's Subhāṣita]

यज्ञे इन्द्रार्थं निखन्यन्ते तासामिन्द्र इत्येवोपचारः । राजपुरुषस्य राजत्वोपचारः स्वस्वामिभावात् । स्वशब्द आत्मीयवचनः, इह भृत्यपरः । भृत्यस्वामिभावादित्यर्थः । हस्ताग्रमात्रस्य हस्त इत्युपचारः अवयवावयविभावात् । तस्य मुख्यस्य कर्म तक्षणाद्यस्यास्तीति तत्कर्मा, तस्य भावस्तात्कर्म्यम् । तक्षा स्थपतिः ।

अथ लक्षणोपसंहारः—**लक्षणा तेनेति ।**

व्यवहितं भेदद्वयं स्मारयति—**आद्यभेदाभ्यामिति** । उपादानलक्षणा लक्षणलक्षणा गौणसारोपा गौणसाध्यवसाना शुद्धसारोपा शुद्धसाध्यवसाना चेति । लक्षणाप्रघट्टकोऽयमस्माभिर्लघुटीकायां विततय विवेचित इति ततोऽवधार्यः । इहापि यथोपयोगमुक्तः ।

ननु षड्विधाप्यसौ रूढा चारूढा चेति द्विधोपदर्शिता । तत्र कतरस्याः कतर उपयोग इत्यत आह—**सा च व्यङ्ग्येन रहितेत्यादि** । अतो रूढलक्षणाया हेयत्वेन विवेचनं कृतम्, अरूढायास्तूपादेयतयेति मन्तव्यम् ।

ननु प्रयोजने सति कथमियं व्यङ्ग्यसहितेत्यत आह—**प्रयोजनं हीति ।** हिर्हेतौ । प्रयोजनस्य व्यञ्जनव्यापारैकसमधिगम्यत्वादित्यर्थः ।

12d. Indication, therefore, is sixfold.

Along with the first two divisions (viz. Śuddhā upādāna-Lakṣaṇā and Śuddhā Lakṣaṇa-Lakṣaṇā) indication is of six kinds.

That again—

13ab. is without a suggested sense when there is usage, but is possessed of a suggested sense where there is a motive.

For, the motive can be apprehended only through the function of suggestion.

13c. And that (suggested sense) is either concealed or non-concealed.

'That' refers to the suggested sense. To illustrate the concealed (suggested sense):

The face has a blooming smile. The glance has mastered the slant; the gait displays sportive movements. The mind has lost steadiness. The bosom has budding breasts. The hips are heavy on account of well-developed parts. Indeed, in the body of this girl of moon-like face, the advent of youth is rejoicing. 9

To illustrate the non-concealed (suggested sense):

By an acquaintance with wealth even dullards become proficient in the ways of the wise. Intoxication of youth itself teaches charms to young ladies. 10

यदेतदेवं व्यङ्ग्यत्वेन प्रतिज्ञातं प्रयोजनं, तस्य यथायोगं ध्वनिगुणीभूत-व्यङ्ग्योपयोगितामुपक्षेप्तुं द्वैविध्यं दर्शयति—**तच्च गूढमित्यादि** ।

मुखं विकसितेति । विकसितत्वेन प्रसृतत्वं, वशीकृतत्वेनायत्तत्वं, समुच्चलने-नातिप्रकाश इत्यादिर्लक्ष्यते । अत्रैतदाकूतं—यत्र वाच्यायमानत्वेन झटिति प्रतीतिर्लक्ष्यस्य तत्र व्यङ्ग्यमगूढमिति, अत्र तु गूढम् ।

श्रीपरिचयादिति । ललितानि विलासाः ।

वाच्यायमानतां व्यङ्ग्यस्य दर्शयति—**अत्रोपदिशतीति** । उपदिशतीत्यत्र शिक्षयतीत्यर्थो वाच्यकल्पः ।

अत्रोपदिशतीति ।

तदेषा कथिता त्रिधा ॥ १३ ॥

अव्यङ्ग्या गूढागूढव्यङ्ग्या च ।

तद्भूर्लाक्षणिकः

शब्द इति सम्बध्यते । तद्भूस्तदाश्रयः ।

तत्र व्यापारो व्यञ्जनात्मकः ।

कुत इत्याह—

यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ॥ १४ ॥

फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ।

प्रयोजनप्रतिपिपादयिषया यत्र लक्षणाशब्दप्रयोगस्तत्र नान्यतस्तत्प्रतिपत्तिः अपि तु तस्मादेव शब्दात् । न चात्र व्यञ्जनादृतेऽन्यो व्यापारः । तथा हि—

नाभिधा समयाभावात्

गङ्गायां घोष इत्यादौ ये पावनत्वादयो धर्मास्तटादौ प्रतीयन्ते न तत्र गङ्गादिशब्दाः संकेतिताः ।

ननु लक्षणाभेदप्रस्तावे व्यङ्ग्यभेदोपवर्णनं कथमुपयुज्यत इत्यत आह—**तदेषा कथितेति** । यतः इत्थं व्यङ्ग्यस्याभावो रूढलक्षणायां, यतश्चारूढायां गूढतागूढता च, तत इयम् अव्यङ्ग्या गूढव्यङ्ग्या अगूढव्यङ्ग्या चेति त्रिधा कथितेत्यर्थः ।

अथ वृत्तिं वृत्तिमति योजयति—**तद्भूर्लाक्षणिक** इति ।

स्याद्वाचक इत्यादिसूत्रस्थस्य शब्दशब्दस्य दूरान्तरितत्वात् सम्बन्धमनुस्मारयति—**शब्द इति सम्बध्यत** इति । तद्भूरित्यत्र ततो भवतीति भ्रमो मा भूदित्याह—**तदाश्रय** इति । तस्या लक्षणावृत्तेराश्रयोऽधिष्ठानम् ।

इत्थं लक्षणावृत्तिर्निरूपिता । क्रमागता व्यञ्जनवृत्तिस्तु निरूपणीया । सा चाभिधामूलतया लक्षणामूलतया च प्रथते । तत्राभिधामूलायाः प्रतीतिक्रमेण प्राथम्येऽपि लक्षणामूलायाः स्थूलतया सुज्ञानतामभिसन्धाय तन्मूलां प्रथमतः प्रस्तौति—**तत्र व्यापार** इत्यादि । तत्रेति प्रयोजने ।

ननु समन्वयसमनन्तरभाविनि प्रयोजने शाब्दत्वमेव तावत् कथम् । शाब्दत्वे वा कथमभिधाद्यविषयत्वमिति शङ्कामुत्थापयन् सूत्रमवतारयितुमाह—**कुत इत्याहेति** ।

यस्य प्रतीतिमिति । यस्येति निस्सामान्यत्वप्रकाशनेन लक्षणावृत्तेः प्रयो-

Here from the word "teaches" (an effortless learning of amorous charms is understood clearly, as if it were expressly stated).

13d. Thus, it is stated to be three-fold.

(i) Without a suggested sense, (ii) with a concealed suggested sense, and (iii) with a non-concealed suggested sense.

14a. The abode of that *Lakṣaṇā* is the indicative (word).

The "word" is to be connected (with the word indicative). "The abode of that" means the support of that.

14b. There (i.e. in the indicative word) the function is in the form of suggestion.

Why ? To this the author replies.

14cd., 15ab. In respect of the fruit (i.e. motive), which is known from the (indicative) word alone, and for whose apprehension the indication is resorted to, there is no other function except suggestion.

When a word is used indicatively with the intention to convey a certain purpose, there its apprehension is not from any other ground but from that word alone. And in such a case there is no other function except suggestion. To explain the same :

15c. It is not denotation, on account of the absence of convention.

The words Gaṅgā and the like have no convention with reference to those properties, like holiness etc., which are apprehended as belonging to the bank and the like in cases such as "A hamlet on the Gaṅgā".

जनैकप्राणतामाविष्करोति । समुपास्यते, गत्यन्तराभावाद् गतित्वेनाश्रीयत इति यावत् । एवम्भूतं लक्षणासमुपासनं फलस्य शब्दैकसमधिगम्यत्वे हेतुः । शब्दत एव हि प्रयोजनप्रतिपत्तये वृत्त्यन्तरकल्पनम् । तच्चेदशाब्दमङ्गीक्रियेत, तन्मूलहानिरेव लक्षणायाः स्यादिति भावः । **अत्रेति** । अदसः यत्प्रतियोगिता विवक्ष्यते तत्रेत्यर्थः ।

ननु कथं नापरा क्रियेत्यत आह—**नाभिधेत्यादि** । समयः सङ्केतः ।

हेत्वभावान्न लक्षणा ॥ १५ ॥

मुख्यार्थबाधादित्रयं हेतुः । तथा च—

लक्ष्यं न मुख्यं नाप्यत्र बाधो योगः फलेन नो ।
न प्रयोजनमेतस्मिन् न च शब्दः स्खलद्गतिः ॥ १६ ॥

यथा गङ्गाशब्दः स्रोतसि सबाध इति तटं लक्षयति, तद्वद् यदि तटेऽपि सबाधः स्यात् तत् प्रयोजनं लक्षयेत् । न च तटं मुख्योऽर्थः । नाप्यत्र बाधः । न च गङ्गाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयैः सम्बन्धः । नापि प्रयोजने लक्ष्ये किञ्चित् प्रयोजनम् । नापि गङ्गाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुं समर्थः ।

एवमप्यनवस्था स्याद् या मूलक्षयकारिणी ।

एवमपि प्रयोजनं चेल्लक्ष्यते तत् प्रयोजनान्तरेण तदपि प्रयोजनान्तरेणेति प्रकृताप्रतीतिकृद् अनवस्था भवेत् ।

ननु पावनत्वादिधर्मयुक्तमेव तटं लक्ष्यते । गङ्गायास्तटे घोष इत्यतोऽधिकस्यार्थस्य प्रतिपत्तिश्च प्रयोजनमिति विशिष्टे लक्षणा । तत् किं व्यञ्जनेनेत्यत आह—

तदभावं विविच्य दर्शयति—**गङ्गायामि**त्यादि । धर्माः मुख्यार्थसमवायिनः । न हि पावनत्वादिस्रोतोधर्माणां तटगतत्वेन प्रतिपत्तौ गङ्गादिशब्दाः सङ्केतिताः ।

लक्षणां निराचिख्यासुराह—**हेत्वभावादि**त्यादि ।

तमेव हेत्वभावं वितत्य दर्शयति—**लक्ष्यं न मुख्यमि**त्यादि । मुख्यार्थसंभवस्तद्बाधो मुख्येन सहान्यस्य सम्बन्धः प्रयोजनं स्खलद्गतित्वं चेति इयती लक्षणायां या सामग्री सा वाक्यपञ्चकेन परिपाट्या निरस्ता ।

तदेतद् व्याचष्टे—यथा गङ्गाशब्द इत्यादिना । प्रयोजने हि लक्ष्ये तटस्य मुख्यार्थत्वं बाधश्च न्याय्यः । न च तदुभयमपि सम्भवति । समयाभावान्न मुख्यार्थता । घोषाधिकरणत्वसम्भवान्न बाधः । न च गङ्गाशब्दाभिधेयत्वेनाभिमतस्य स्रोतोधर्मैः पावनत्वादिभिर्लक्ष्यसम्मतैः सम्बन्धः । नापि प्रयोजनान्तरं प्रयोजनत्वेन सम्भवति । नापि गङ्गाशब्दस्य तट इव पावनत्वादौ स्खलद्गतित्वं, स्वार्थसमवायित्वात् । इत्थं न लक्षणायाः शङ्काङ्कुरस्याप्यवकाशः ।

अथापि चेदभ्युपगम्येत, तदा प्रथमलक्षणाया मूलोच्छेदि दुरन्तं दोषान्तर-

15d. Nor is it indication for want of the (three-fold) cause.

The cause means the triad beginning with the incompatibility of the primary meaning and thus:

16. The indicated sense is not the primary one; neither is incompatibility, nor any connection with the fruit; there is no motive herein; and the word (Gaṅgā) does not fail in its expressive power.

Just as the word Gaṅgā indicates the bank because it is incompatible in (its primary sense of) the stream so also if it were incompatible with reference to the bank also then it would (further) indicate the purpose. But the bank is not the primary meaning (of the word Gaṅgā), nor is there any incompatibility, and there is no connection of the bank, which is the (indicated) sense of the word Gaṅgā, with the holiness which are to be (further) indicated. Nor is there any purpose with reference to the purpose which is supposed to be indicated. Besides, the word Gaṅgā, unlike the word bank, is not unable to convey the purpose.

17ab. Even in this way there would be *ad infinitum* which will strike at the very root.

"Even in this way" means if the purpose were to be indicated it would be indicated by another purpose, that too by (yet) another purpose, and thus would result a *regressus ad infinitum* causing the non-apprehension of the matter in hand.

One may say—The bank as possessed of the qualities, such as holiness, is itself indicated (by the word Gaṅgā); and the purpose (for such indication) is the cognition of an additional meaning than what is obtained by saying: "A hamlet on the bank of the Gaṅgā", thus the indication is in the qualified (object). Then what is the need of suggestion ? To this the author replies:

मापतेदित्याह—**एवमपीति** । प्रकृताप्रतीतिकृदिति मूलक्षयेत्यस्य विवृतिः । प्रकृतलक्षणाया ज्ञप्तिप्रतिबन्धकारिण्यनवस्था प्रसजेत् । उत्पत्तिज्ञप्त्योरन्यतर-प्रतिबन्धकत्वाभावे हि नानवस्थादोषः । यथा बीजाङ्कुरादौ ।

अथ विशिष्टे लक्षणेति मतं दूषयितुं प्रस्तौति—**ननु पावनत्वादीति** ।

प्रयोजनेन सहितं लक्षणीयं न युज्यते ॥ १७ ॥

कुत इत्याह—

ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम् ।

प्रत्यक्षादेर्हि नीलादिर्विषयः । फलं तु प्रकटता संवित्तिर्वा ।

विशिष्टे लक्षणा नैवं

व्याख्यातम् ।

विशेषाः स्युस्तु लक्षिते ॥ १८ ॥

तटादौ विशेषाः पावनत्वादयः । ते चाभिधालक्षणातात्पर्येभ्यो व्यापारान्तरेण गम्याः । तच्च व्यञ्जनध्वननादिशब्दवाच्यमवश्यमेषितव्यम् । एवं लक्षणामूलं व्यञ्जकत्वमुक्तम् ।

अभिधामूलं त्वाह—

अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनम् ॥ १९ ॥

गङ्गातट इत्यादिना मुख्यपरित्यागस्य नैरर्थक्यं निराकृतम् । इतिर्हेतौ । यत इत्थं प्रयोजनसम्भवः, अतो विशिष्ट एव लक्षणेति ।

तदेतन्निराचष्टे—**प्रयोजनेन सहितमिति ।** प्रयोजनसहितस्यैव तटादेर्लक्ष्यत्वाभ्युपगमो न युक्त इत्यर्थः ।

तत्र हेतूपन्यासः —**ज्ञानस्य विषय** इति ।

नीलादिरिति । गुणेन गुणी लक्ष्यते बाह्येन्द्रियगोचरत्वरूपविशेषप्रथनाय, घटादिरित्यर्थः । फलं ज्ञानप्रयोजनम् । प्रकटता संवित्तिर्वेति विकल्पो व्यवतिष्ठते । भाट्टादयो हि प्रकटीभावलक्षणं ज्ञेयधर्मं ज्ञानफलमाहुः । वैशेषिकादयस्तु संवित्तिरूपं ज्ञातृधर्मम् । संवित्तिरनुव्यवसायः । घटज्ञानं जानामीत्यादिज्ञानविषयं ज्ञानमिति यावत् । प्रकटतैवास्तु ज्ञानफलं संवित्तिर्वा, न तु फलविषययोः सर्वथा तादात्म्यमुपपद्यत इति निष्कर्षः ।

उपसंहरति—**विशिष्टे लक्षणे**त्यादि ।

विशेषाः स्युस्त्विति । लक्ष्यप्रतीतिसमनन्तरमेव प्रयोजनप्रतीतिनियम इत्यर्थः । अत्रैतदुपह्वरं—लक्षणायां हि द्विधा प्रयोजनसम्प्रत्ययः । यदा धर्मिणा धर्म्यन्तरं लक्ष्यते तदा मुख्यार्थधर्माः लक्ष्यगतत्वेन चतुर्थकक्ष्यायां प्रतीताः प्रयोजनं भवेयुः, तदा फलविषययोर्भेदाद् विशिष्टे लक्षणेति शङ्कापि नोदेति । यदा तु मुख्यार्थधर्मेणामुख्यार्थधर्मो लक्ष्यते, तदा प्रयोजनत्वेन धर्मान्तरं न भवतीति

17cd. The indicated sense, qualified by the purpose, is not proper (to be admitted).

Why is it so ? To this the author replies :

18ab. The object of cognition is indeed different; the result is declared to be different.

The object of perception etc. is a blue and the like. But the result is revelation or consciousness.

18c. Thus, there is no indication with reference to the qualified (object).

It is self-explanatory.

18d. But there would be (found) qualities in the indicated (object).

The qualities holiness etc., which are (found) in the bank etc., are apprehended by some other function than denotation, purport and indication. And that (function) which is designated by the terms Suggestion, Reverberation and Illumination, and the like, must necessarily be admitted. Thus has been explained the suggestiveness based on indication.

And now the author states the denotation-based (suggestiveness).

19. When expressive power of the homonymous word is restricted to (one meaning) by conjunction etc., then the function that causes the apprehension of a non-expressed meaning is suggestion.

तस्यैव सातिशयत्वप्रतीतिः प्रयोजनम् । तदापि न विशिष्टे लक्षणा, सातिशयत्वप्रतीतेरपि चतुर्थकक्ष्यैकगोचरत्वादिति ।

तदेतदभिसन्धायाह— **ते चाभिधालक्षणे**त्यादि । किं तद् व्यापारान्तरमित्यत आह—**तच्च व्यञ्जनध्वननादीति** । आदिशब्दात् प्रत्यायनद्योतनादि । अवश्यमिति न्यायस्य गलेपातिकया प्रवृत्तिमनुसन्धत्ते । एषितव्यम् अभ्युपगन्तव्यम् ।

अथाभिधामूलं प्रस्तौति—एवं **लक्षणामूलमिति** ।

अनेकार्थस्येति । वाचकत्वे अभिधाशक्तौ । संयोगाद्यैर्नियन्त्रिते संयोगविप्रयोगादिभिर्नियमिते ।

**"संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥"**

[Vākyapadīya II. 317-18]

इत्युक्तदिशा सशङ्खचक्रो हरिः अशङ्खचक्रो हरिरित्यच्युते । रामलक्ष्मणाविति दाशरथौ । रामार्जुनगतिस्तयोरिति भार्गवकार्तवीर्ययोः । स्थाणुं भज भवच्छिदे इति हरे । सर्वं जानाति देव इति युष्मदर्थे । कुपितो मकरध्वज इति कामे । देवस्य पुरारातेरिति शम्भौ । मधुना मत्तः कोकिल इति वसन्ते । पातु वो दयितामुखमिति साम्मुख्ये । भात्यत्र परमेश्वर इति राजधानीरूपाद् देशाद् राजनि । चित्रभानुर्विभातीति दिने रवौ, रात्रौ वह्नौ । मित्रं भातीति सुहृदि, मित्रो भातीति रवौ । इन्द्रशत्रुरित्यादौ वेद इव काव्ये स्वरो न विशेषप्रतीतिकृत् । आदिग्रहणाद्—

ननु क एते संयोगादयः, यैरनेकार्थस्य सतोऽपि शब्दस्याभिधा प्रतिनियतेऽर्थे नियम्यत इत्यतः संयोगादीनभियुक्तसंवादपुरस्कारेणोपदर्शयति—**संयोगो विप्रयोग** इत्यादिना । अर्थः प्रयोजनम् । लिङ्गं चिह्नम् । व्यक्तिः पुल्लिङ्गादीनि । इत्युक्तदिशेति संवादरूपयोः श्लोकयोर्मूलकारिकात्वभ्रमं निरास्थत् । सशङ्खचक्र इति अनेकार्थस्यापि हरिशब्दस्य विष्णावभिधानियमनं संयोगेन दर्शितम् । अशङ्खचक्र इति वियोगेनापि तत्रैव प्रतिषेधस्य प्रसक्तिपूर्वकत्वात् । न ह्यन्यत्र शङ्खादिप्रसक्तिः प्रसिद्धा । रामलक्ष्मणाविति लक्ष्मणसाहचर्येण । एवं रामार्जुनेत्यादौ विरोधितादयो योजनीयाः । भवच्छिदे इति चतुर्थ्या अर्थशब्दस्य प्रयोजनार्थत्वं द्योतितम् । युष्मदर्थ इति प्राकरणिकत्वात् । जानातीति, प्रथमपुरुषनिर्देशोऽपि तत्रैव वर्तत इत्यर्थः । **कुपित** इति । कोपचिह्नेन मकरध्वजशब्दो मन्मथवृत्तिः, न पुनरम्बुराशिरित्यर्थः । पुरारातिशब्दसन्निधेर्देवशब्दः शम्भौ । कोकिलमदोत्पादनसामर्थ्याद् मधुर्वसन्तः । मुखमित्यौचित्यात् सांमुख्यं, न तु वक्त्रादि । मित्रमिति 'लुपि युक्तवद् व्यक्तिवचने' इत्यादाविव व्यक्तिशब्दस्य पुमादिलिङ्गपरता दर्शिता । **इन्द्रशत्रुरिति** । अत्र '**समासस्य**' इत्यन्तोदात्तत्वे षष्ठीतत्पुरुषः, 'बहुव्रीहौ (प्रकृत्या) पूर्वपदम्' इति तु पूर्वपदान्तोदात्तत्वे बहुव्रीहिरिति स्वरभेदेन समासभेदव्यवस्थानादर्थव्यवस्था ।

Conjunction, disjunction, association, antagonism, motive, context, characteristic, proximity of another word, efficacy, propriety, place, time, gender, accent and the like are the causes of the recollection (i. e. apprehension) of a particular meaning, when there is no determination of the meaning of a word.

According to the direction thus given—

In "Hari with the conch-shell and discus, and Hari without the conch-shell and discus" (the word Hari is restricted) to Acyuta (by means of conjunction and disjunction respectively). In "Rāma and Lakṣmaṇa" (the meaning of the words is restricted) to the sons of Daśaratha (on account of association). In "Their behaviour is as between Rāma and Arjuna" (the meaning of the words is limited) to the sons of Bhṛgu and *Kṛtavīrya*) because of antagonism). In "Be devoted to Sthāṇu for the destruction of worldly existence" (the meaning of Sthāṇu is by means of motive, confined) to Śiva. In "Deva knows all" (the meaning of Deva is, by context, restricted) to the sense of 'you'. In "*Makaradhvaja*—one who has shark for his banner—is angry" (the meaning is, by means of peculiar sign of *makara*, restricted) to the God of Love.

In "Of god, the enemy of cities" (the word god, by means of proximity of another word, refers) to Śiva. In "the cuckoo intoxicated with *madhu*" (the meaning of *madhu* is by means of efficacy, restricted) to spring. In "May the *mukha* of the beloved protect you" (the meaning of *mukha* is, through propriety, restricted) to propitiousness. In "Here shines *Parameśvara* (the meaning of *parameśvara* is restricted) to king on account of the place in the form of capital. In "*Citrabhānu* shines" (the word *cirtrabhānu* is, according to time, restricted) to the sun during the day and to the fire during the night. In "*Mitram* shines" to the friend and in "the *mitraḥ* shines" to the sun (the *mitram* and *mitraḥ*, by means of gender, are restricted to friend and the sun) respectively. In "Indraśatruḥ" and the like the accent does not produce, as it does in the Veda, the apprehension of a particular sense in poetry. By the use of *ādi* (in the phrase *svarādayaḥ* in the above couplets) gestures etc., as instanced below, are included.

एद्दहमेत्तत्थणिश्रा एद्दहमेत्तेहि अच्छिपत्तेहि ।
एद्दहमेत्तावत्था एद्दहमेत्तेहि दिअएहि ।। ११ ।।

इत्यादावभिनयादयः । इत्थं संयोगादिभिरर्थान्तराभिधायकत्वे निवारितेऽप्य-नेकार्थस्य शब्दस्य यत् क्वचिदर्थान्तरप्रतिपादनं तत्र नाभिधा नियमनात् तस्याः, न च लक्षणा मुख्यार्थबाधाद्यभावाद्, अपि त्वञ्जनं व्यञ्जनमेव व्यापारः । यथा—

भद्रात्मनो दुरधिरोहतनोर्विशाल-
वंशोन्नतेः कृतशिलीमुखसंग्रहस्य ।
यस्यानुपप्लुतगतेः परवारणस्य
दानाम्बुसेकसुभगः सततं करोऽभूत् ।। १२ ।।

तद्युक्तो व्यञ्जकः शब्दः ।

तद्युक्तो व्यञ्जनयुक्तः ।

यत् सोऽर्थान्तरयुक्तथा ।
अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः ।। २० ।।

एद्दहमेत्तेति ।

एतावन्मात्रस्तनी एतावन्मात्राभ्यामक्षिपत्राभ्याम् ।
एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः ।।

अत्र एतावन्मात्रशब्दानां नानापरिमाणवाचकत्वेऽपि मुकुलीकरणप्रसृतीकरणादिना हस्ताभिनयेन स्तननयनादिनियतपरिमाणवचनत्वम् । ननु संयोगादिभिरस्त्वभिधानियमः, प्रकृते किमायातमित्यत आह—**इत्थं संयोगादिभिरिति ।**

भद्रात्मन इति । भद्रात्मा कल्याणप्रकृतिः भद्रजातिश्च । वंशः कुलं पृष्ठास्थिदण्डश्च । शिलीमुखाः शरा द्विरेफाश्च । गतिरवगतिः पादपरिस्पन्दश्च । परवारणः परेषां वारयिता प्रकृष्टो गजश्च । दानं वितरणं मदश्च । करो हस्तः स्थूलहस्तश्च । अत्र पदानामभिधा प्राकरणिके राजनि नियम्यते । प्रतीयते चार्थान्तरं गजरूपम् । न तत्राभिधा प्रकरणेन प्राकरणिके नियमनात् । नापि लक्षणा हेत्वभावात् । अतो व्यञ्जनमेव व्यापार इत्यभिधामूलध्वनिसिद्धिः ।

अथ वृत्तिमति योजयितुमाह—**तद्युक्त** इति । अनुषङ्गसिद्धस्यापि शब्दशब्दस्योपादानं प्रतियोगित्वेनार्थस्यापि व्यञ्जकत्वमुपक्षेप्तुम् ।

This much is the size of breasts, this much is the measure of her petal-like eyes. Reduced to this much condition in days of this much number. 11

When by conjunction etc. the power to signify another sense has been prevented and if still at places a word, having more than one meaning, conveys another sense there is no denotation on account of its being restricted. There is no indication either owing to the absence of incompatibility of the primary meaning etc. But it is *añjana* i.e. *vyañjana* or suggestion which alone operates.

For example:

The hand (punningly, the trunk) of whom, who has a magnanimous bearing (who belongs to good species), whose body is unassailable (difficult to mount), the eminence of whose race is great (whose height is like a big bamboo), who has made a stock of arrows (who has collected a swarm of bees), whose wisdom is unclouded (whose gait is steady), and who wards off the enemies (who is an excellent elephant), was ever graceful by the sprinkling of the water of gifts (by the flow of ichor). 12

20a. Possessed of that (suggestion) is the suggestive word.

"Possessed of that" means possessed of suggestion.

20bcd. Since, that (word) is so (i. e. suggestive) when connected with another sense (i.e. either expressed or indicated sense) the (other) sense also is considered to be suggestive owing to its co-operation therein.

अथ येन नयेन शब्दो व्यञ्जकस्तेनैव नयेनार्थोऽपीत्याह—**यत् सोऽर्थान्तरयुगिति** । यथा ह्यर्थान्तरयोगित्वाच्छब्दो व्यञ्जकस्तथार्थोऽपि तद्योगित्वाद् व्यञ्जक इत्यर्थः । ननूभयस्यापि व्यञ्जकत्वे शब्दशक्तिमूलोऽयमर्थशक्तिमूलोऽयमिति कथं व्यवस्थेत्यत आह—**तत्र सहकारितया मत** इति । यतः शब्दा=

तथेति व्यञ्जकः ।

इति काव्यप्रकाशे शब्दार्थस्वरूपनिर्णयो नाम

द्वितीय उल्लासः

दर्थाद्वा प्रामुख्येन व्यञ्जनव्यापारप्रतीतिः ध्वनिस्तन्मूल इति व्यपदिश्यते। प्रधानेन हि व्यपदेशा भवन्ति । तदितरत् तु तत्र सहकारीति उपपन्नैव व्यवस्थेति भावः।

इति संस्कृतसार्वभौमप्राकृतपृथ्वीश्वरशौरसेनीशिरोमणिमागधीमकरध्वज-पैशाचीपरमेश्वरापभ्रंशराजहंसालङ्कारिकचक्रवर्त्तिध्वनिप्रस्थानपरमाचार्यकाव्य-मीमांसाप्रभाकरकविसहृदयशिरोमणिसहजसर्वज्ञपरमयोगीश्वरश्रीमत्त्रि-भुवनविद्याचक्रवर्त्तिवंशावतंसमहाकविश्रीविद्याचक्रवर्त्तिकृतौ सम्प्रदायप्रकाशिन्यां काव्यप्रकाशबृहट्टीकायां द्वितीय उल्लासः ।

"So" means suggestive.

Thus ends the Second Flash in the Poetic Light, namely, the Determination of the Nature of the Word and Meaning.

तृतीय उल्लासः

अर्थाः प्रोक्ताः पुरा तेषाम्

अर्था वाच्यलक्ष्यव्यङ्ग्याः । तेषां वाचकलाक्षणिकव्यञ्जकानाम् ।

अर्थव्यञ्जकतोच्यते ।

कीदृशीत्याह—

वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः ॥ २१ ॥
प्रस्तावदेशकालादेर्वैशिष्ट्यात् प्रतिभाजुषाम् ।
याऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा ॥ २२ ॥

बोद्धव्यः प्रतिपाद्यः । काकुः ध्वनेर्विकारः । प्रस्तावः प्रकरणम् । अर्थस्य वाच्यलक्ष्यव्यङ्ग्यात्मनः । क्रमेणोदाहरणम्—

**अइपिउळं जळकुम्भं घेत्तूण समागदह्मि सहि तुरिअम् ।
समसेअसळिळणीसासणीसहा वीसमामि खणम् ॥१३॥**

[Gāthāsaptaśatī]

अथोल्लासयोः सङ्गतिमासूत्रयन्नर्थव्यञ्जनस्य विवेचनमवसरागतमाह सूत्रकारः—**अर्थाः प्रोक्ताः पुरेत्यादि** । पुरा वाचकादिशब्दनिरूपणावसरे । वाचकादयो हि शब्दाः साक्षादेव निरूपिताः, वाच्यादयोऽर्थाः पुनस्तन्निरूपणप्रसङ्गात् । तस्मादनभिव्यक्तमर्थस्वरूपविवेचनमनुस्मारयितुं सूत्रेणैव सङ्गतिकथनम् ।

यद्यर्थाः प्रोक्ताः, तर्हि कस्येदानीमवसर इत्यत आह—**अर्थव्यञ्जकतोच्यत** इति । वाच्यलक्ष्यव्यङ्ग्यानां व्यञ्जकता विविच्यते ।

तां प्रस्तोतुमाह—**कीदृशीत्याहेति** ।

वक्तृबोद्धव्येति । बोद्धव्यपदेन बोधनीयार्थभ्रमो मा भूदित्याह—**बोद्धव्यः प्रतिपाद्य** इति । प्रतिपत्तेत्यर्थः ।

अइपिउळमिति ।

**अतिपृथुलं जलकुम्भं गृहीत्वा समागतास्मि सखि त्वरितम् ।
श्रमस्वेदसलिलनिश्श्वासनिस्सहा विश्राम्यामि क्षणम् ॥**

21a. The meanings of these (words) have already been mentioned.

'Meanings' signify the expressed, the indicated and the suggested. 'Of these' means of the expressive, the indicative and the suggestive (words).

21b. The suggestiveness of meaning is being explained.

Of what nature is it ? To this the author replies:

21 cd., 22. That function of the (three-fold) meaning, which, on account of the speciality of (i) the speaker, (ii) the person addressed, (iii) the intonation, (iv) the sentence, (v) the expressed sense, (vi) the presence of another, (vii) occasion, (viii) place, (ix) time and the like, causes the awareness of another meaning to persons endowed with poetic faculty, is nothing but Suggestion.

The person addressed means one who is communicated with. Intonation means modulation of voice. Occasion means context. 'Of the meaning' means of the nature of the expressed, the indicated and the suggested.

Illustrations in order :

(i) Fetching a very big pitcher of water, I have come in haste, O friend. Unnerved by perspiration and breathing out due to exertion, I would rest for a moment. 13

अतिपृथुलमिति दुर्वहता । जलकुम्भमिति पूर्णत्वाद् दुर्वहतरत्वम् । गृहीत्वा समागतास्मीति सहायविरहः। त्वरितमिति श्रमाविर्भावनिदानोपन्यासः, गृहाद् बहिः क्षणमात्रमपि कालक्षेपासहत्वं च । अत्र वक्तृवैशिष्ट्याच्चौर्यरतगोपनावगतिः ।

अत्र चौर्यरतगोपनं गम्यते ।

ओण्णिद्दं दोब्बल्ळं चिन्ता अलसत्तणं सणीससिअं ।
मह मन्दभाइणीए केरअ सहि तुह वि अहह परिभवइ ॥१४॥

अत्र दूत्यास्तत्कामुकोपभोगो व्यज्यते ।

तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां
वने व्याधैः सार्धं सुचिरमुषितं वल्कलधरैः ।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं
गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु ॥१५॥

[Veṇīsaṁhāra, I,11.]

अत्र मयि न योग्यः खेदः कर्तुं, कुरुषु तु योग्य इति काक्वा प्रकाश्यते । न च वाच्यसिद्ध्यङ्गमत्र काकुरिति गुणीभूतव्यङ्ग्यत्वं शङ्क्यम्, प्रश्नमात्रेणापि काकोर्विश्रान्तेः ।

तइआ मह गण्डत्थळणिमिअं दिट्ठिं ण णेसि अण्णत्तो ।
एह्णि सच्चेअ अहं ते अ कवोळा ण सा दिट्ठी ॥१६॥

अत्र मत्सखीं कपोले प्रतिबिम्बितां पश्यतस्ते दृष्टिरन्यैवाभूत् । चलितायां तु तस्यामन्यैव जातेत्यहो ते प्रच्छन्नकामुकत्वमिति व्यज्यते ।

ओण्णिद्दमिति ।

औन्निद्र्यं दौर्बल्यं चिन्तालसत्वं सनिश्श्वसितम् ।
मम मन्दभागिन्याः कृते सखि त्वामप्यहह परिभवति ॥

अत्रौन्निद्र्यादयो विशेषाः बोद्धव्यायां दूत्यामधिक्षेपोक्त्या प्रतीताः नायकोपभोगं प्रत्याययन्ति ।

तथाभूतामिति । भीमसेनस्योक्तिरेषा । गुरुर्युधिष्ठिरः ।

अत्र काकुवैशिष्ट्याद् यादृग् व्यङ्ग्यं तदुपदर्शयति—**अत्र मयीति** । नन्विह काकुमनाश्रित्य वाच्यसमन्वय एव न घटत इति गुणीभूतव्यङ्ग्यत्वं युक्तम् । वक्ष्यति हि '**वाच्यसिद्ध्यङ्गमस्फुटमि'ति** । तत् कथं ध्वनेरिदमुदाहरणमित्यत आह—**न च वाच्यसिद्धीति** । तत्र हेतुः—**प्रश्नमात्रेणापीति** । यदि वाच्यसिद्धिमात्रे काकुरङ्गं स्यात्, तदा कच्चिन्मयि खेदं भजतीत्यादिवत् प्रश्नमात्रेणार्थविश्रान्तिः प्रसज्येत । न च तथा विश्राम्यतीति ध्वनिरेवायमिति भावः ।

Here concealment of secret sexual enjoyment is suggested.

(ii) Sleeplessness, weakness, anxiety, idleness, and heavy sighs—alas, (all this) torments you also, O friend, for the sake of my unfortunate self ! 14

Here enjoyment of the female-messenger by her lover is suggested.

(iii) Having witnessed the daughter of the Pāñcāla king so subdued in the court of kings, we dwelt for long in the forest, having donned bark garments in the company of hunters. Engaged in most improper undertakings, we stayed unobserved in the residence of Virāṭa. Does our elder brother still prefer to be angry upon me, who am angered, and not upon the Kurus ? 15

Here, anger is not proper towards me, but it is proper towards the Kurus—this is revealed by the intonation. Here it should not be suspected that the intonation being subservient to the establishment of the expressed sense, this is a case of *Guṇībhūtavyaṅgya* (or second-rate poetry). For, intonation could stop with a mere query.

(iv) Then you did not move your glance fixed on my cheeks anywhere else; (but) now I am the same and the cheeks are the same but the glance is not the same. 16

Here, when you were looking at my friend who was reflected in my cheeks, your glance was different; but when she went away it became quite different; thus, (how) secret is your lustfulness—this is suggested.

तइआ महेति ।

तदा मम गण्डस्थलनिमग्नां दृष्टिं नानैषीरन्यतः ।
इदानीं सैवाहं तौ च कपोलौ न सा दृष्टिः ॥

अत्र तदान्या दृष्टिः इदानीमितरेत्येवंरूपाद् वाक्यवैशिष्टयात् । व्यञ्जकत्वं दर्शयति—अत्र मत्सखीमित्यादि ।

उद्देशोऽयं सरसकदलीश्रेणिशोभातिशायी
कुञ्जोत्कर्षाङ्कुरितरमणीविभ्रमो नर्मदायाः ।
किञ्चैतस्मिन् सुरतसुहृदस्तन्वि ते वान्ति वाता
येषामग्रे सरति कलिताकाण्डकोपो मनोभूः ॥१७॥

[By Bhaṭṭendurāja, acc. to Sūktimuktāvalī]

अत्र रतार्थं प्रविशेति व्यङ्ग्यम् ।

णोल्लेइ अणोल्लिअमणा अत्ता मं घरभरम्मि सअलम्मि ।
खणमेत्तं जइ संझाए होइ ण व होइ वीसामो ॥१८॥

अत्र सन्ध्या सङ्केतकाल इति तटस्थं प्रति कयाचिद् द्योत्यते ।

सुव्वइ समागमिस्सदि तुज्झ पिओ अज्ज पहरमत्तेण ।
एमेअ कित्ति चिट्ठसि ता सहि सज्जेसु करणिज्जम् ॥१९॥

अत्रोपपतिं प्रत्यभिसर्तुं प्रस्तुता, न युक्तमिति कयाचिन्निवार्यते ।

अन्यत्र यूयं कुसुमावचायं कुरुध्वमत्रास्मि करोमि सख्यः ।
नाहं हि दूरं भ्रमितुं समर्था प्रसीदतायं रचितोऽञ्जलिर्वः ॥२०॥

अत्र विविक्तोऽयं देश इति प्रच्छन्नकामुकस्त्वया विसर्ज्य इत्याश्वस्तां प्रति कयाचिन्निवेद्यते ।

गुरुअणपरवस पिय किं भणामि तुह मन्दभाइणी खु अहम् ।
अज्ज पवासं वच्चसि वच्च सअं चेअ मुणसि करणिज्जम् ॥२१॥

उद्देशोऽयमिति । शोभातिशायी शोभयोद्देशान्तरातिशयनशीलः । सुरतसुहृदस्तदुद्दीपकत्वात् । अकाण्डकोपत्वकथनेनात्मनो रिरंसावैवश्यं ध्वन्यते । अत्रैवंविधवाच्यवैशिष्ट्यं व्यञ्जनोत्थापकम् ।

णोळ्ळेइ इति ।

प्रेरयत्यनार्द्रमनाः श्वश्रूर्मां गृहभरे सकले ।
क्षणमात्रं यदि सन्ध्यायां (केवलं ?) भवति न वा भवति विश्रामः ॥

अत्र निभृतकामुकसन्निधिवैशिष्ट्यात् ।

सुव्वइ इति ।

श्रूयते समागमिष्यति तव प्रियोऽद्य प्रहरमात्रेण ।
एवमेव किमिति तिष्ठसि तत् सखि सज्जय करणीयम् ॥

अत्र पतिसमागमप्रस्तावान्निभृतकामुकाभिसरणनिषेधव्यक्तिः ।

अन्यत्र यूयमिति । अस्मीत्यहमर्थेऽव्ययम् । अत्र न सखीजननिष्कासन-

(v) This region of the Narmadā is exceedingly splendid owing to the rows of juicy plaintain trees. It arouses amorous flurry in young women on account of the elegance of the bowers. Moreover, O slender one, therein are blowing those winds, friends of your copulation, ahead of whom runs Cupid, who is filled with sudden anger. 17

Here, enter for copulation—this is suggested.

(vi) The unsympathetic mother-in-law impels me to do all the domestic duties. For a moment in the evening, there may or may not be some rest. 18

Here, evening is the time of rendezvous—this is suggested by some lady to a stranger.

(vii) It is heard that your lover will shortly come today. Why is it that you are standing so (idle)? Better, O friend, make ready whatever is to be prepared. 19

Here, some one ready to leave to meet her paramour is being prevented by some lady as it is improper.

(viii) O friends, you gather flowers elsewhere. I do it here. For, I am not able to go about. Be pleased. Here I fold my hands to you. 20

Here, this place is secluded, so the secret lover should be assigned to meet here—this is being told by some lady to her confidante.

(ix) O dear, who are dependant upon the elders, what shall I, unfortunate that I am, tell you? You are going abroad today. Go. You will yourself know what is proper for me. 21

मात्रम्, अपि तु देशवैशिष्ट्यादाश्वस्तां सखीं प्रत्यभिमतार्थप्रार्थनमपि व्यज्यते, सहृदयप्रतीतिविश्रान्तेस्तदवधित्वात् । यदि सखीव्यावर्तनमात्रमेवेत्युच्यते, तदा गुणीभूतव्यङ्ग्यत्वमगूढतया प्रसज्येत ।

गुरुअणेति ।

गुरुजनपरवश प्रिय किं भणामि त्वां मन्दभागिनी खल्वहम् ।
अद्य प्रवासं व्रजसि व्रज स्वयमेव जानासि करणीयम् ॥

अत्राद्य मधुसमये यदि व्रजसि तदहं तावद् न भवामि, तव तु न जानामि गतिमिति व्यज्यते । आदिग्रहणाच्चेष्टादेः । तत्र चेष्टाया यथा—

द्वारोपान्तनिरन्तरे मयि तया सौन्दर्यसारश्रिया
प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादितम् ।
आनीतं पुरतः शिरोंशुकमधः क्षिप्ते चले लोचने
वाचस्तच्च निवारितं प्रसरणं सङ्कोचिते दोर्लते ॥२२॥

अत्र चेष्टया प्रच्छन्नकान्तविषय आकूतविशेषो ध्वन्यते । निराकाङ्क्षप्रतिपत्तये प्राप्तावसरतया पुनः पुनरुदाह्रियते । वक्त्रादीनां मिथः संयोगे द्विकादिभेदे अनेन क्रमेण लक्ष्यव्यङ्ग्ययोश्च व्यञ्जकत्वमुदाहार्यम् ।

शब्दप्रमाणवेद्योऽर्थो व्यनक्त्यर्थान्तरं यतः ।
अर्थस्य व्यञ्जकत्वे तच्छब्दस्य सहकारिता ॥ २३ ॥

शब्देति, न हि प्रमाणान्तरवेद्यो व्यञ्जकः ।

इति काव्यप्रकाशे अर्थव्यञ्जकतानिर्णयो नाम

तृतीय उल्लासः

अत्राद्येति कालवैशिष्ट्यात् ।

द्वारोपान्तेति । निरन्तरे अवकाशमावृत्य स्थिते । प्रोल्लास्य प्रसार्य । परस्परसमासक्तं मिथः समाश्लिष्टम् । अनेन स्पृष्टकमालिङ्गनमुक्तम् ।

ननु शब्दार्थयोर्व्यञ्जकत्वमुदाहृतं, पौनःपुन्येनोदाहरिष्यते च, क उपयोगोऽस्य चर्वितचर्वणस्येत्यत आह—**निराकाङ्क्षेत्यादि** । यावदाकाङ्क्षोपरतिः प्रतिपत्तृप्रतीतौ तावदुदाह्रियत इत्यर्थः । ननु नानाप्रकरणतयोदाहरणे क उपयोग इत्यत आह—**प्राप्तावसरतयेति** । यत्रावसरे यस्याकाङ्क्षा, तत्र तदित्यर्थः । एवं शुद्धमर्थध्वनिप्रकारं विविच्य यथा सङ्करादिभेदास्तथोपदेष्टुमाह—**वक्त्रादीनामित्यादि** । वक्तृबोद्धव्यादीनामर्थानां द्विशस्त्रिशश्च मिथः संयोगे द्विकादिभेदः । **अनेन क्रमेणेति** । यथैकैकवैशिष्ट्याद् व्यञ्जकत्वं, तथा द्व्यत्र्यादिवैशिष्ट्यादपीत्यर्थः । **लक्ष्यव्यङ्ग्ययोश्चेति** । येनैव वाच्यस्योदाहृतं तेनैव क्रमेण तयोरपीत्यर्थः । तत्रापि मिथः संयोगे द्विकादिभेद उन्नेयः । इह वाच्यस्य वक्त्राद्येकैकवैशिष्ट्याद् येन नयेनोदाहृतं, तेनैव द्वित्रियोगादिवैशिष्ट्यात्, तथा लक्ष्यव्यङ्ग्ययोरेकैकवैशिष्ट्याद् द्वित्रियोगादिवैशिष्ट्याच्चेति भेदप्रपञ्चोन्मीलनम् ।

यथा शब्दध्वनावर्थस्य सहकारित्वं दर्शितं, तथैवेहापि शब्दस्य दर्शयितुमाह—**शब्दप्रमाणेति** । यो ह्ययमर्थो ध्वनति स हि शब्दैकप्रमाणकः, न पुनः प्रत्यक्षादिप्रमाणकः । अतः शब्दस्य सहकारित्वम् ।

Here, if you are going today in the time of spring, then I shall be no more but I do not know what would happen to you. Owing to the use of '*ādi*' (in the above *kārikā*) the gestures, etc. are included. There (the illustration) of the gesture is as follows :

When I was close to the vicinity of the door she, who was beautiful with the quintessence of loveliness, having extended (her) pair of thighs, made them cling to each other; drew over the head-dress; cast down her tremulous eyes; then restrained the flow of speech and closed (her) creeper-like arms. 22

Here, by the gesture is suggested a particular feeling about her paramour. To procure the absence of expectancy and because of the occasion being present, illustrations are given here again and again (i.e. separately for each case). Where the speaker and the like mutually combine, the examples should be illustrated by (further) division into groups of two and so on. In this way suggestiveness of the indicated and the suggested sense should also be illustrated.

23. Since a meaning, cognised through the means of a word, suggests another meaning, there is cooperation of the word in the suggestiveness of the meaning.

(The expression) *śabda* etc. means : a meaning cognized through any other means is not suggestive.

Thus ends the Third Flash in the Poetic Light, namely, the Determination of the Suggestiveness of the Meaning.

प्रमाणान्तरवेद्यस्यार्थस्य लौकिकत्वादव्यञ्जकत्वं प्रसिद्धमित्याह—न हि प्रमाणान्तरेति ।

इति संस्कृतसार्वभौमप्राकृतपृथ्वीश्वरशौरसेनीशिरोमणिमागधीमकरध्वज-पैशाचीपरमेश्वरापभ्रंशराजहंसालङ्कारिकचक्रवर्तिध्वनिप्रस्थानपरमाचार्यकाव्य-मीमांसाप्रभाकरकविसहृदयशिरोमणिसहजसर्वज्ञपरमयोगीश्वरश्रीमत्त्रि-भुवनविद्याचक्रवर्त्तिवंशावतंसमहाकविश्रीविद्याचक्रवर्त्तिकृतौ सम्प्रदायप्रकाशिन्यां काव्यप्रकाशबृहट्टीकायां तृतीय उल्लासः ।

चतुर्थ उल्लासः

यद्यपि शब्दार्थयोर्निर्णये कृते दोषगुणालङ्काराणां स्वरूपमभिधानीयं, तथापि धर्मिणि प्रदर्शिते धर्माणां हेयोपादेयता ज्ञायत इति प्रथमं काव्यभेदानाह—

अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद् ध्वनौ ।
अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम् ।। २४ ।।

लक्षणामूलगूढव्यङ्ग्यप्राधान्ये सत्यविवक्षितं वाच्यं यत्र सः ध्वनावित्यनुवादाद् ध्वनिरिति ज्ञेयः। तत्र वाच्यं क्वचिदनुपयुज्यमानत्वादर्थान्तरे परिणमितम्। यथा—

त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ।
आत्मीयां मतिमादाय स्थितिमत्र विधेहि तत् ।। २३ ।।

इत्थं द्वितीयतृतीयाभ्यां शब्दार्थनिर्णये कृतेऽपि दोषगुणादीनामनवसरः, शब्दार्थात्मनः काव्यस्वरूपस्य निश्शेषमनिरूपणादिति चतुर्थपञ्चमषष्ठेषु ध्वनि-गुणीभूतव्यङ्ग्यचित्राख्याः काव्यभेदा निरूपणीया इत्याह वृत्तिकारः—**यद्यपि शब्दार्थयोरि**त्यादिना। 'तददोषावि'ति सामान्यतः, 'इदमुत्तममि'त्यादिना च विशेषतो यद्यपि काव्यं दर्शितमेव, अथाप्युद्देशरूपत्वाद् दर्शनमात्रमेव तत्। अविवक्षितवाच्यत्वादिविशेषसाकल्यसध्रीचीनतालक्षणेन प्रकर्षेणेह दर्शनीयमित्य-भिप्रेत्याह — **प्रदर्शित** इति। **हेयोपादेयतेति**। दोषरूपाणां धर्माणां हेयता, अन्येषामुपादेयतेति विभागः। **प्रथममिति**। दोषादिनिणपणादर्वाक्।

अविवक्षितवाच्यो य इति। लक्षणामूलध्वनौ वाच्येऽर्थे विवक्षाभावात् सोऽविवक्षितवाच्यः। तत्र वाच्यमेकदार्थान्तरे संक्रामति, अन्यदात्यन्तं तिरस्क्रियते। अत्रोक्तवाच्यवैचित्र्यादयं ध्वनिर्द्विविधः अर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृत-वाच्यश्चेति।

तदेतद् व्याचष्टे—**लक्षणामूलगूढे**त्यादि। गूढग्रहणं ध्वनित्वप्रकाशनाय। अगूढत्वे गुणीभूतव्यङ्ग्यता वक्ष्यते। अविवक्षितं वाच्यं यत्रेत्यविवक्षितवाच्य-पदस्य विग्रहः। **ध्वनावित्यनुवादादिति**। तत्रेति तच्छब्दपरामृष्टतया कृतोऽप्यनु-वादो यद्वृत्तमपि ध्वनिविशेषणं गमयतीत्यर्थः। अविवक्षितवाच्याख्ये ध्वनौ

FOURTH FLASH

Although after the determination of word and meaning, the nature of (poetic) blemishes, excellences and the figures should be stated, yet on the exposition of the object possessed of attributes (i.e. poetry) the rejectability or acceptability of the attributes (i.e. poetic blemishes, etc.) is known, hence the author first states the divisions of poetry :

24. In that suggestion where the expressed sense is not intended, the expressed sense is either transferred to another meaning or is altogether abandoned.

It is only when the expressed sense is not intended because of the prominence of the hidden suggested sense based on indication, that it is (known as) '*dhvani*'—this word is understood from the mention of *dhvanau* (in the Kārikā). Here, the expressed sense is transferred into another meaning on account of its non-applicability in some cases.

For example :

I say, here there is the assembly of the learned, so stay here with your mind composed. 23

इति यावत् । **अनुपयुज्यमानत्वादिति** । उपादानलक्षणायां हि वाच्यः कुन्तादिरर्थः प्रवेशनादिक्रियायामनुपयुज्यमानः सन्नर्थान्तरे परिणमति । सा ह्यजहत्स्वार्था । स्वार्थपरित्यागद्योतनायैव च परिणामोक्तिः । स्वरूपादप्रच्युतस्यैव हि धर्मिणोऽवस्थान्तरापत्तिः परिणामः । परिणमितमिति णिचा व्यापारस्य प्रयोजकत्वमासूचितम् । लक्षणाव्यापारो हि वाच्यमर्थान्तरे परिणमयति ।

त्वामस्मीति । अस्मीति निपातोऽहमर्थे । असमासकरणाद्विदुषां प्राधान्यं विवक्ष्यते । प्रकृष्टविद्वत्समूहो यत इह वर्तते, अतो बुद्धिमेकाग्रीकृत्यात्रैव वर्तस्व । त्वामहमेतद् वच्मीत्यत्र वचनमात्रं नोपयुज्यते, प्रतिपाद्यस्यार्थस्य सर्वपुरुषार्थसाधनत्वावगमात् । अतो वचनमुपदेशरूपतया परिणमति ।

अत्र वचनादि उपदेशादिरूपतया परिणमति ।

क्वचित् पुनरनुपपद्यमानतयात्यन्तं तिरस्कृतम् । यथा—

उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतम् ॥ २४ ॥

एतदपकारिणं प्रति विपरीतलक्षणया कश्चिद्वक्ति ।

विवक्षितं चान्यपरं वाच्यं यत्रापरस्तु सः ।

अन्यपरं व्यङ्ग्यनिष्ठम् । एष च

कोऽप्यलक्ष्यक्रमव्यङ्ग्यो लक्ष्यव्यङ्ग्यक्रमः परः ॥ २५ ॥

अलक्ष्येति । न खलु विभावानुभावव्यभिचारिण एव रसः अपि तु रसस्तैरित्यस्ति क्रमः । स तु न लक्ष्यते ।

तदेतदाह—**अत्र वचनादीति** । आदिशब्दाद् वक्तृबोद्धव्यावुपदेशकोपदेश्यभावेन परिणमतः । अतोऽयमर्थान्तरसंक्रमितवाच्याख्यो ध्वनिभेदः । अथात्यन्ततिरस्कृतवाच्याख्यं विवेचयति—**क्वचित् पुनरित्यादि । अनुपपद्यमानतयेति ।**

लक्षणलक्षणायां हि प्रवाहादेर्वाच्यस्यानुपपत्तिरेव । **अतस्तन्मूलस्यात्यन्त**तिरस्कृतवाच्याख्यत्वम् ।

उपकृतमिति । अत्र वक्तृबोद्धव्यपर्यालोचनया काकुप्रमाणप्रतीतिके वाक्ये कैतवोपचारान्मुख्यार्थो बाध्यते ।

अत एवमर्थो भवतीत्याह—**एतदपकारिणं प्रती**त्यादि । अतोऽयमत्यन्ततिरस्कृतवाच्य इति यावत् ।

इत्थं लक्षणामूलमविवक्षितवाच्याख्यं ध्वनिविशेषम् अर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विधोपपाद्याभिधामूलस्य विवेचनं प्रस्तौति — **विवक्षितं चान्येति** । यत्राभिधामूले ध्वनौ वाच्यं बाधाभावाद् विवक्षितं व्यङ्ग्यार्थं प्रत्युपसर्जनं च, स त्वपरः । सोऽयमविवक्षितवाच्यादन्यः विवक्षितान्यपरवाच्य इति यावत् ।

अस्य द्वैविध्यं दर्शयति—**कोऽप्यलक्ष्येति** । अत्र व्यङ्ग्यवैचित्र्याद् भेदोदयः, लक्षणामूले तु व्यञ्जकवैचित्र्यात् । विवक्षितान्यपरवाच्ये ध्वनौ रसादिर्यदा व्यज्यते, तदा क्रमो न लक्ष्यते । यदा वस्त्वलङ्कारौ, तदा लक्ष्यते। अतोऽयमसंलक्ष्यक्रमव्यङ्ग्यः संलक्ष्यक्रमव्यङ्ग्यश्चेति द्विरूपो बोद्धव्य इति यावत् ।

तत्र रसध्वनेरसंलक्ष्यक्रमव्यङ्ग्यत्वं दर्शयितुं प्रतीकमुपादत्ते—**अलक्ष्येतीति । न खलु विभावेति** । विभावानुभावव्यभिचारिणो विवेचयिष्यन्ते ।

Here 'saying' etc. transforms itself into the form of instruction, etc.

Further, in some cases the expressed sense, being incomplete, is altogether given up.

For example :

Thou hast highly obliged me, how shall I express it? You have evinced extreme benevolence. Acting thus ever, O friend, may you happily live, therefore, for a hundred years. 24

Some one says this to a wrong-doer through Contrary Indication.

25ab. Where the expressed sense is intended and yet refers to another (meaning)—that is another (type of suggestion).

'Refers to another' means rests in the suggested sense. And this (is divided into two kinds) :

25cd. The one having the suggested meaning without perceptible sequence, and the other having a perceptible sequence in the suggested meaning.

'Without perceptible', etc. implies—it is not at all that the *determinant*, *ensuant* and the *transitory* (*vibhāva*, *anubhāva*, *sañcāribhāva* by themselves are *rasa* but *rasa* is (manifested) through these, hence there is sequence but it is not perceived (owing to its quickness).

विभावादयोऽभिव्यञ्जकाः । रसास्तु तदभिव्यङ्ग्यास्ततोऽन्य एव । तथा हि—

शिथिलशिथिलं न्यस्य स्वैरं धनुश्शिखरे शिरो
नयनसलिलैः कुर्वन् मौर्वीलतामपरामिव ।
अहह विकलः श्रुत्वा श्रुत्वा घनस्तनितध्वनिं
किमपि किमपि ध्यायन्नार्यो न याति न तिष्ठति ॥

इत्यादौ य इह सीताघनस्तनितादय आलम्बनोद्दीपनरूपा विभावाः, ये च शिथिलशिरोन्यासनयनसलिलवैकल्यनिरुद्देशध्यानगतिस्थितिवैह्वल्यादयोऽनुभावाः, ये च तदभिव्यञ्जिताश्चिन्तावेगदैन्यादयो व्यभिचारिणः, न खलु त एव रसः, अपि तु तदभिव्यङ्ग्यस्ततोऽन्य एव सर्वस्य सहृदयस्य स्वसंवादसाक्षिकः प्रतीतिविशेषः । तदेतदभिप्रेत्याह—**इत्यस्ति क्रम** इति । इतिर्हेतौ । व्यङ्ग्यव्यञ्जकभावस्य पौर्वापर्येणावस्थाननियमात् क्रमोऽस्त्येवेति भावः । ननु विभावाद्याकार-

तत्र च

रसभावतदाभासभावशान्त्यादिरक्रमः ।
भिन्नो रसाद्यलङ्कारादलङ्कार्यतया स्थितः ।। २६ ।।

आदिग्रहणाद् भावोदयभावसन्धिभावशबलत्वानि । प्रधानतया यत्र स्थितो रसादिस्तत्रलङ्कार्यः यथोदाहरिष्यते । अन्यत्र तु प्रधाने वाक्यार्थे यत्राङ्गभूतो रसादिस्तत्र गुणीभूतव्यङ्ग्ये रसवत्प्रेयऊर्जस्विसमाहितादयोऽलङ्काराः । ते च गुणीभूतव्यङ्ग्याभिधाने उदाहरिष्यन्ते ।

कारणान्यथ कार्याणि सहकारीणि यानि च ।
रत्यादेः स्थायिनो लोके तानि चेन्नाटचकाव्ययोः ।। २७ ।।

रूषितामेव रसप्रतीतिं पानकरसन्यायेनास्वादयामः, न तु तत्र क्रममनुपश्याम इत्यत आह—**स तु न लक्ष्यत** इति । उक्तनयेन तावदस्त्येव क्रमः । व्युत्पन्नतमायाः प्रतिपत्तृप्रतीतेस्तीव्रसंवेगितया पद्मपत्रशतव्यतिभेदनयेन दुर्लक्ष इत्यर्थः । यदुक्तं ध्वनिकृता—

तद्वत् सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम् ।
बुद्धौ तत्त्वावभासिन्यां झटित्येवावभासते ।।

इति ।

तमिममसंलक्ष्यक्रमं प्रप(ञ्च ? ञ्च्य) त्वादादौ दर्शयितुमाह—**रसभावे**त्यादि । रसभावरसाभासभावाभासभावशान्त्यादिर्व्यङ्ग्योऽर्थोऽसंलक्ष्यक्रम इत्यर्थः । ननु रसादिप्राधान्ये रसवदादयोऽलङ्काराः पूर्वेषां मताः, तत् कथं ध्वनित्वादलङ्कार्यत्वमेषामुपपद्यत इत्यत आह—**भिन्नो रसे**त्यादि ।

तदेतद् व्याचष्टे—**आदिग्रहणादि**त्यादि । ननु यथा भावस्योदयसन्ध्यादयोऽवस्थाविशेषाः पृथग् ध्वनयः, तथा रसस्यापि किं न स्युः । उच्यते । अखण्डनिरन्तरायप्रतीतिचर्वणैकघनस्य हि रसस्य सन्तोऽप्युदयसन्ध्यादयो न निरुक्तिमर्हन्ति । अतो न भाववदिह तथाविधभेदसम्भवः । एवं तर्हि ब्रह्मास्वादसहोदरत्वाद् रसस्य कथमाभासत्वोपपत्तिः । तिर्यगादिषु बाधदर्शनादिति ब्रूमः । अत उदयसन्धिशबलत्वानि भावगतत्वेनैव निरूपणमर्हन्ति । ननु कथमलङ्काराभिमतस्यालङ्कार्यत्वमुपपद्यत इत्यत आह—**प्रधानतया यत्रेति** । वाच्यार्थातिशायिता प्रधानता । **उदाहरिष्यत** इति । अक्रमध्वनिप्रस्ताव इति शेषः । यत्र त्वस्यालङ्कारता, तं विषयं दर्शयति—**अन्यत्र त्विति** । **अङ्गभूत** इति । वाच्योपस्कारित्वविवक्षायामङ्गभावः । **रसवदि**त्यादि । अंगत्वेन विवक्षितो रसो रसवानलङ्कारः । भावः प्रेयान् । रसाभास ऊर्जस्वी । भावाभासः समाहितः । आदि-

And there :

26. The non-sequential (i.e. *asaṁlakṣyakrama vyaṅgya*) consisting in *rasa*, emotion, their semblance, pacification of the emotion and the like—is different from the figures, such as *rasavat*, and stands as one to be adorned.

By the use of 'and the like' are meant the *rise of emotion*, the *co-existence of emotions* and the *variegation of emotions*. Where *rasa*, etc. stand out prominently there it is the object to be adorned as will be illustrated later on. Otherwise, when the meaning of a sentence is prominent and *rasa*, etc. are subordinate—there in the subordinate, suggested sense (i.e. mediocre poetry) are the figures *Rasavat*, *Preyas*, *Ūrjasvin*, *Samāhita* and others. And these will be illustrated later under the description of the *Subordinate Suggested Sense.*

Therein the author states the nature of *rasa* :

27, 28. Now, if the causes, effects and auxiliaries of the basic mental state, such as love, in the world are (found) in poetry and drama, they are

---

ग्रहणाद्भावोदयसन्धिशबलत्वानि । तान्यपि पृथगलङ्कारतया विवेचयिष्यन्ते । **गुणीभूतव्यङ्ग्याभिधान** इति । गुणीभूतव्यङ्ग्याभिधानावसर इत्यर्थः ।

अक्रमध्वनीन् यथोद्देशं लक्षयितुकामो रसध्वनिमादौ प्रस्तौति—**तत्र-रसेति** । स्वरूपं लक्षणम् ।

कारणानीत्यादि । तैर्विभावादिभिर्व्यक्तः स्थायी भावो रसः स्मृतः । विभावादिभिरभिव्यञ्जितः स्थायी रत्यादिकश्चित्तवृत्तिविशेषो रस इति **भरत-मुनिना** स्मृत इति युगलकसमन्वयः। यद्यपि क्षणिकस्य रत्यादिभावस्य न स्थायित्वं, तथापि विषयविशेषोल्लेखमन्तरेण सामान्यात्मनो वासनारूपस्य तस्येह विवक्षणादुपपद्यत एव स्थायित्वम् । ननु क एते विभावादय इत्यत आह—**कारणान्यथे-ति** । उदयलयधर्मिणो हि रत्यादेर्यल्लोके कारणं ललनोद्यानादि, यच्चाप्रत्यक्षस्य तस्य गमकं कार्यं भ्रूकटाक्षविक्षेपादि, यानि चास्य सहकारीणि हर्षौत्सुक्यादीनि तानि यदि काव्ये सन्दर्भ्येरन् नाट्ये वाभिनीयेरन्, तदा गुणालङ्कारमहिम्ना चतुर्विधाभिनयमहिम्ना च विभावनानुभावनाद्यतिशयविशेषोदयाद् विभावानु-भावादिव्यपदेशं लभन्ते । अर्थात् विशेषेण भावयन्तीति विभावाः । उक्तं हि मुनिना—

विभावा अनुभावाश्च कथ्यन्ते व्यभिचारिणः ।
व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ।। २८ ।।

उक्तं हि भरतेन—'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः' इति । एतद् विवृण्वते—

विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणैः स्थायी रत्यादिको भावो जनितः, अनुभावैः कटाक्षभुजाक्षेपप्रभृतिभिः कार्यैः प्रतीतियोग्यः, व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपतानुसन्धानान्नर्तकेऽपि प्रतीयमानो रस इति भट्टलोल्लटप्रभृतयः ।

राम एवायमयमेव राम इति, न रामोऽयमित्यौत्तरकालिके बाधे रामोऽयमिति, रामः स्याद्वा न वायमिति, रामसदृशोऽयमिति च सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिभ्यो विलक्षणया चित्रतुरगन्यायेन राम इति प्रतिपत्त्या ग्राह्ये नटे—

**"बह्वोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रयाः ।
अनेन यस्मात् तेनायं विभाव इति संज्ञितः ॥"**

इति । एवमनुभावयन्तीत्यनुभावाः । व्यभिचरन्ति विशेषेणाभिमुख्येन चरन्तीति व्यभिचारिणः । नाट्यकाव्ययोरिति विषयसप्तमी । न ह्यन्यत्र गुणालङ्काराभिनयरूपवैशिष्ट्यवन्ध्ये विभावादिव्यवहारसम्भवः ।

उक्तार्थे प्रामाणिकसंवादं दर्शयति—**उक्तं** हीत्यादि । **भरतसूत्र**विवरणप्रपञ्चमुखेनैव युगलकार्थं विशदीचिकीर्षुराह—**एतद् विवृण्वत** इति । एतद् **भरतसूत्रम्** । विवृण्वते, आचार्या इति शेषः ।

तत्र **लोल्लटा**दीनां विवरणप्रकारमुपन्यस्यति —**विभावै**रित्यादि । रत्यादयो हि भावा ललनादिकमालम्ब्य जायन्त इत्युत्पादकं कारणमालम्बनविभावः । उद्यानादिना तूद्दीप्यन्त इति स उद्दीपनविभावः । जातोऽप्यनुद्दीपितः सन्नजातप्राय एव । अतः कारणद्वयेनापि जननमेव निष्पाद्यत इत्यभिप्रेत्य जनित इत्युक्तम् । अनेनास्य मते विभावैः सह स्थायिनो जन्यजनकभावः सम्बन्ध उक्तः । अनुभावैस्तु सह गम्यगमकभाव इत्याह—**अनुभावै**रित्यादि । **प्रतीतियोग्य** इति । अप्रत्यक्षोऽपि गमकैः कार्यैः प्रतीतियोग्यतां नीत इत्यर्थः । व्यभिचारिभिस्तु सह पोष्यपोषकभाव इत्याह—**व्यभिचारिभि**रित्यादि । **ते** निर्वेदादयस्त्रयस्त्रिंशद् दर्शयिष्यन्ते । सहकारिभिरुपचित इति पोष्यपोषकभावः प्रदर्शितः । एतेनास्य मते विभावापेक्षया स्थायिनो जन्यजनकभावः सम्बन्धः सूत्रसंयोगशब्दार्थः अनुभावापेक्षया गम्यगमकभावः, व्यभिचार्यपेक्षया तु पोष्यपोषकभाव इति बोद्धव्यम् ।

spoken of as determinants, ensuants and transitories (respectively). The basic emotion, manifested through these determinants etc., is known as *rasa*.

For it is said by Bharata :

"From the correlation of determinants, ensuants and transitories, the *rasa* comes into being". This is elaborated as follows :

The basic emotion, such as love, brought about by determinants, women, gardens and the like, which are (respectively) the substrate and the stimulating causes, rendered apprehensible by the ensuants, namely: effects, such as the side-glance and the tossing of arms and augmented by the transitories viz. auxiliaries such as self-disparagement, constitutes *rasa* which primarily exists in the character to be represented, such as Rāma, but which is also apprehended in the stage-player on account of the assumption of his role. This is the view of Bhaṭṭa Lollaṭa and others.

By a cognition—distinct from the valid, the invalid, the doubtful and the analogical cognitions, as (illustrated in order) in (i) 'Rāma indeed is he; he indeed is Rāma'; (ii) 'He is Rāma' with the sublation of the subsequent moment in the form of 'He is not Rāma', (iii) 'He may or may not be Rāma' and (iv) 'He is like Rāma'—the actor is apprehended as Rāma after the manner of a painted horse.

निष्पत्तिशब्दार्थोऽप्यनयैव भङ्ग्या त्रिरूपः—उत्पत्तिर्ज्ञप्तिः पुष्टिश्चेति । **मुख्यया वृत्त्या रामादाविति** । उभयत्र दत्तपदा हि रससंविद् अस्य मते स्थायिनः साक्षात् सम्भवादनुकार्ये, तद्रूपतानुसन्धानात् तन्मयीभूतेऽनुकर्तरि च । **भट्टेति** । प्रस्थान-प्रणयनादाचार्यत्वमस्याविष्करोति ।

अथ सम्बन्धत्रयक्लृप्तिगौरवादीन् दोषानसहमानस्य **श्रीशङ्कुकस्य** मतोपन्यासः —**राम एवायमित्यादि** । विभावादिशब्दव्यपदेश्यैः कारणकार्यसहकारिभिरनुमीयमानः स्थायी रस इति समन्वयः । अतो गम्यगमकभाव एक एव संयोगशब्दार्थः । निष्पत्तिरित्यनुमितिरेव । कारणान्यलौकिकप्रतीतिविषयतां यदा समासादयन्ति, तदैव विभावादिशब्दव्यपदेश्यानि भवन्तीत्याह—**राम एवायमित्यादि** । तत्र तावल्लौकिकी प्रतीतिश्चतुर्विधा । राम एवायम् अयमेव राम इति च सम्य-

सेयं ममाङ्गेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः ।
मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गता ॥२५॥
दैवादहमत्र तया चपलायतनेत्रया वियुक्तश्च ।
अविरलविलोलजलदः कालः समुपागतश्चायम् ॥२६॥

[Rudraṭa's KA. VII. 29.]

इत्यादिकाव्यानुसन्धानबलाच्छिक्षाभ्यासप्रवर्तितस्वकार्यप्रकटनेन च नटेनैव प्रकाशितैः कारणकार्यसहकारिभिः कृत्रिमैरपि तथानभिमन्यमानैर्विभावादिशब्दव्यपदेश्यैः संयोगाद् गम्यगमकभावरूपादनुमीयमानोऽपि वस्तुसौन्दर्यबलाद् रसनीयत्वेनान्यानुमीयमानविलक्षणः स्थायित्वेन सम्भाव्यमानो रत्यादिको भावस्तत्रासन्नपि सामाजिकानां वासनया चर्व्यमाणो रस इति श्रीशङ्कुकः ।

रूपा । तत्र राम एवायमित्यरामत्वं व्यावर्त्यत इत्ययोगव्यावृत्तिरूपं सम्यक्त्वम्, अयमेव राम इत्यन्यस्य रामत्वं व्यावर्त्यत इत्यन्ययोगव्यावृत्तिरूपम् । यदि न रामोऽयमित्यौत्तरकालिको बाधः स्यात्, तदा तदपेक्षया प्राग्भूता राम इति प्रतीतिर्मिथ्यारूपा । रामः स्याद्वा न वेति तु संशयात्मिका । **परिशिष्टा** तु सादृश्यरूपेति चतुर्धैव लौकिकी प्रतीतिः । प्रतीतिचतुष्टयविलक्षणैव हि नटे प्रतीतिः किंरूपा, रामोऽयमिति निर्गलितावधारणा सामान्यरूपा चमत्कारैकघना । तदेतद् दृष्टान्तेन द्रढयति—**चित्रतुरगन्यायेनेति ।** चित्रतुरगे हि कौतुकदशायां तुरग एवायमयमेव तुरग इत्यादिविशेषानुपहता चमत्कारैकघना सामान्यतस्तुरग इति प्रतीतिरस्ति । एवं सामान्यतो राम इति प्रतिपत्त्या ग्राह्ये नटे पुरःस्थिते यदा तेनैव नटेन कार्यकारणादीन्यभिनयेन प्रकाश्यन्ते तदैव तानि विभावादिशब्दव्यपदेश्यानि । ननु कस्तदैषां विशेष आयातः, येन विभावादिव्यपदेश इत्यत आह—**कृत्रिमैरपि तथानभिमन्यमानैरिति** । एतद् विभावनादिव्यापारवत्त्वे हेतुः । न हि चमत्कारदशायां नटेनाभिनीतेषु तेषु कारणादिषु कृत्रिमत्वप्रतीतिः । अतोऽभिनयदशायामेवैषां विभावादिव्यपदेशः ।

नटस्याप्येवंविधस्य कार्यप्रकाशनशक्तिर्विशिष्टकाव्यानुसन्धानबलादेवेत्याह-सेयं ममाङ्गेष्विति, दैवादहमत्रेति च । उदाहरणद्वयं व्यङ्ग्यस्य शृङ्गाररसस्य सम्भोगविप्रलम्भरूपभेदद्वयप्रथनाय । सेयमिति प्रत्यभिज्ञा काक्वा चिरविरहदुःखोपघाती दर्शनमात्रादेव कोऽपि समुल्लासाविर्भावः प्रत्याय्यते । ममाङ्गेष्विति बहुवचनेन सर्वावयवसन्तापोपशमक्षमनिरतिशयनिर्वृतिजनकत्वम् । सुपूरा दृशि पूरयितुं शक्या । अनेन कर्पूरशलाकिकायाः पृथुलस्निग्धशीतलत्वादयःप्रत्याय्यन्ते । तथाविधशलाकाताद्रूप्यारोपणेनैव हि नायिकाया लोचनानन्दकन्दलनक्षमत्वमु-

Here is she, a stream of ambrosia to my limbs, a wick of soothing camphor to the eyes and the embodied bloom of hopes. My love, ruler of my life, has become the object of my sight. 25

Unluckily now I have been separated from her, of tremulous and large eyes; and this season too of thick floating clouds has set in. 26

By the power of close study of the poems (or dramatic pieces) such as the above-mentioned ones, and by performing his role accomplished by instruction and practice, the actor himself presents the causes, effects and auxiliaries which though artificial are not being considered as such and which are designated by such words as *determinants*, *ensuants* and *transitories*. Because of the relation of the type of the inferred and the inferential mark (with *vibhāvas*, etc.) *rasa*, though inferred, is yet distinct from the other objects of inference on account of its being relishable through its power of inherent charm. *Rasa* is that emotion considered to be permanent which though non-existent in him (i. e. the actor) is yet being relished by the men of taste. Thus holds Śrī Śaṅkuka.

त्तेज्यते । मनसः शरीरिणी मनोरथश्रीः मनसो ये ये मनोरथाश्चुम्बनालिङ्गनसम्भोगनैरन्तर्यादयस्तेषां श्रीरक्षया सम्पद् इत्यनेन कालमेतावन्तं मे मनोरथा वन्ध्याः सम्प्रति पूर्णा इति व्यज्यते । प्राणेश्वरीत्यनेन प्राणानां प्रत्यापत्तिः । एवमादिकाव्यानुसन्धानं सम्भोगे । **दैवादहमिति** । अत्र वियुक्तश्च कालः समुपागतश्चेति चकाराभ्यां वियोगसमुपागमक्रिययोर्यौगपद्यलक्षणो दुरुत्तरोऽनर्थः प्रत्याय्यते । एवमादिकाव्यानुसन्धानं विप्रलम्भे ।

शिक्षाभ्या (सादि?) सेति । शिक्षा अभ्यासप्रवर्तने हेतुः । **अभ्यासप्रवर्तितेति** । अभ्यासेनाभिनयपौनःपुन्येन प्रवर्तितं स्वकार्यप्रकटनं येन । चिरशिक्षाभ्यासबलाद् यदेतदभिनयपौनःपुन्यं तेन स्वकार्यं प्रकटितवतेत्यर्थः । अश्रुपातादि स्वकार्यम् । गम्यगमकेति सौत्रसंयोगपदविवृतिः । **वस्तुसौन्दर्येति** । वस्तुनो विभावादेः सौन्दर्यं समनन्तरनिरूपितमलौकिकत्वलक्षणं, तस्य बलाद् रसनीयत्वं तेन हेतुना । अन्यानुमीयमानविलक्षणः । अन्यो ह्यनुमीयमानोऽर्थो लिङ्गज्ञानपूर्वकतया लिङ्गविविक्ततया परोक्षतया सिद्धतया च प्रतीयते । अयं तु विभावादिप्रतीति-

न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते नोत्पद्यते नाभिव्यज्यते अपि तु काव्ये नाट्ये चाभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना भावकत्व-व्यापारेण भाव्यमानः स्थायी सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्त्वेन भोगेन भुज्यत इति भट्टनायकः ।

लोके प्रमदादिभिः कारणादिभिः स्थाय्यनुमानेऽभ्यासपाटववतां काव्ये नाट्ये च तैरेव कारणत्वादिपरिहारेण विभावनादिव्यापारवत्त्वादलौकिकविभावादिशब्द-

---

समकालं पानकरसन्यायेन विभावादिसंवलिततया पुरःस्फुरत्तया साध्यतया च प्रतीयते । नन्वेवं वैलक्षण्यादनुमीयमानतैव न स्यादित्यत आह—**स्थायित्वेन सम्भाव्यमान** इति । स्थायिनो ह्यनुमीयमानत्वं सिद्धम् । अनुकार्येऽनुकर्तरि च रस इति यदुक्तं लोल्लटादिभिः, **न** तदुपपद्यत इत्यभिप्रायेणाह—**सामाजिकानामिति** । सामाजिकानामेव हि चमत्कारः, नानुकार्यानुकर्त्रोः । ननु सामाजिकेषु स्थायी नास्ति, कथमेवमुक्तमित्यत आह—**तत्रासन्नपि चर्व्यमाण** इति । चर्व्यमाणः सचमत्कारं साक्षात्क्रियमाणः । इदमत्र तात्पर्यम्—अनुकार्यस्यातीतत्वात् तत्प्रतीतेर्लौकिकत्वेन दुःखात्मकत्वाच्च, अनुकर्तुरभिनयप्रयासैकायत्तचित्तत्वाच्च न तौ रससंवित्तिभाजनम्, अपि तु सामाजिका एव । तेषां हि चमत्कारोदयः स्वसंवेदनसिद्ध इति । **श्रीशङ्कुक** इति । **भरत**सूत्रं विवृणुत इत्यनुषङ्गः ।

अथोत्पत्तिलक्षणं ज्ञप्तिलक्षणं चोक्तचरं वक्ष्यमाणं च व्यक्तिपक्षं निराकर्तुकामस्य **भट्टनायकस्य** मतोपन्यासः—**न ताटस्थ्येने**त्यादि । पक्षद्वयमपि विकल्प्य दूषयितुमुक्तं—**न ताटस्थ्येन नात्मगतत्वेनेति** । किमसौ रसस्ताटस्थ्येन प्रतीयते, उतात्मगतत्वेन । नोभयमप्युपपद्यते । उभयथापि साधारण्यभङ्गाद् रसत्वमेव हीयेतेति भावः । कथं तर्हि प्रतीतिरित्यत आह—**अपि त्वि**त्यादि । काव्ये नाट्ये चेति विषयसप्तम्यौ । अभिधातो द्वितीयेनेति तसिला भावकत्वव्यापारस्याभिधानन्तरभावित्वं द्योतितम् । नन्वप्रत्यक्षत्वाच्छब्दव्यापाराः कार्येणैवानुमीयन्ते । केनेह कार्येण भावकव्यापारमनुमिनुम इत्यत आह—**विभावादिसाधारणीकरणेति** । येन विभावादीनि साधारणीक्रियन्ते स भावकव्यापारः । साधारणीकरणात्मनेति कार्यकारणयोरभेद उपचरितः । साधारणीकरणं हि भावकत्वव्यापारस्य कार्यमेव । भाव्यमानः साधारण्येनानुसन्धीयमानः । एवं साधारणीकृतः स्थायी भोगेन भुज्यते भोगाख्येन तदुभयातिरेकिणा व्यापारेणास्वाद्यत

Neither by neutrality (i. e. being related to the actor and the real hero) nor by a reference to one's own self (i. e. the man of taste), *rasa* is cognised, produced or revealed; but in poetry and drama the basic emotion, universalised by the emotive function (*Bhāvakatva vyāpāra*), different from expression (i.e. *Denotation* and *Indication*), and consisting in the impersonalisation of the *determinant*, etc., is enjoyed by (a process of) relish which is of the nature of repose in consciousness abounding in enlightenment and bliss due to the predominance of the *Sattva*. —Thus holds Bhaṭṭanāyaka.

In common life, the men of taste are possessed of proficiency by repeated observation in inferring the basic emotion through women and the like, i.e. through causes, etc. In poetry and drama the same (causes etc.) are designated by the words

---

इत्यर्थः । भावकत्वव्यापारेण साधारणीकृता विभावादयो येन भुज्यन्ते स व्यापारो भोग इति यावत् । ननु किंस्वरूपोऽयं भोग इत्यत आह—**सत्त्वोद्रेकेति** । समाध्यवस्थासदृशेनेति पिण्डितार्थः । सत्त्वोद्रेकाद् यौ प्रकाशानन्दौ तन्मय्यां संविदि समाधिवृत्तिरूपायां या योगिनां विश्रान्तिर्विगलितसकलश्रमा निस्तरङ्गत्वेनावस्थितिस्तत्सतत्त्वेन तत्सदृशेन । मैत्र्यादिपरिकर्मपरिशीलनपाटवान्निर्गलितराजसतामसोपरागे सत्त्वगुणे समुद्रिच्यमाने प्रकाशानन्दैकघनायां समाधिसंविदि या योगिनामुपशान्ताशेषोपतापा निस्तरङ्गमवस्थितिस्तत्सधर्मायं भोग इत्यर्थः । तेन भुज्यते विषयसुखोपभोगवैलक्षण्येन विगलितवेद्यान्तरमास्वाद्यत इत्यर्थः ।

इत्थं मतत्रयमुत्तरोत्तरमुपपन्नकल्पत्वेनोपन्यस्य सर्वप्रकारोपपन्नं श्रीमदाचार्याभिनवगुप्तपादमतं सिद्धान्तयितुमुपन्यस्यति— **लोके प्रमदादिभिरित्यादि** । लोके हि संस्कारात्मना स्थितः स्थायी रत्यादिको भावः प्रमदोद्यानादिनालम्बनोद्दीपनकारणेन भ्रूकटाक्षविक्षेपादिना कार्येण औत्सुक्यहर्षादिना सहकारिणा चानुमीयते । यथा च स्वस्य तथा शत्रोरपि तटस्थस्यापि । तानि च कारणादीनि ममैवैतानि शत्रोरेवैतानीत्यादिसम्बन्धिविशेषस्वीकारनियमोल्लेखेन, न ममैवैतानि न शत्रोरेवैतानीत्यादिसम्बन्धिविशेषपरिहारनियमोल्लेखेन च प्रतीयन्ते । इयत्यंशे लोकत एव सिद्धे सति काव्ये नाट्ये च तद्वैलक्षण्येनैव प्रतीयन्त इत्याह—**अभ्यासपाटववतामित्यादि** । अभ्यासपाटववतां परिशीलनपौनःपुन्यशालिनां व्युत्पन्नतमपदपदार्थानामित्यर्थः । अनेन रसप्रतीतावधिकारिणो दर्शिताः । **तैरेवालौकिक-**

व्यवहार्यैर्ममैवैते शत्रोरेवैते तटस्थस्यैवैते, न ममैवैते न शत्रोरेवैते, न तटस्थस्यैवैते इति सम्बन्धिविशेषस्वीकारपरिहारनियमानध्यवसायात् साधारण्येन प्रतीतैरभिव्यक्तः सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारण्योपायबलात् तत्कालविगलितपरिमितप्रमातृतावशोन्मिषितवेद्यान्तरसम्पर्कशून्यापरिमितभावेन प्रमात्रा सकलसहृदयसंवादभाजा साधारण्येन स्वाकार इवाभिन्नोऽपि गोचरीकृतश्चर्व्यमाणतैकप्राणो विभावादिजीवितावधिः पानकरसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वाङ्गीणमिवालिङ्गन् अन्यत् सर्वमिव तिरोदधत् ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारकारी शृङ्गारादिको रसः।

विभावादिशब्दव्यवहार्यैरिति। तान्येव खलु कारणादीनि नाट्ये अभिनीतानि काव्ये वा सन्दृब्धानि चतुर्विधाभिनयमहिम्ना गुणालङ्कारमहिम्ना चालौकिकं विभावादिव्यपदेशमर्हन्ति। कारणानि विभावाः कार्याण्यनुभावाः सहकारीणि व्यभिचारिण इति। न चायं विभावादिव्यपदेशो यदृच्छाशब्दवत् प्रवृत्तिनिमित्तविधुरतया क्लृप्तः, अपि तु विशिष्टेनैव प्रवृत्तिनिमित्तेनेत्याह—**विभावनादिव्यापारवत्त्वादिति।** विभावनानुभावनव्यभिचरणव्यापाराः प्रागेव निरुच्य निरूपिताः। यदा चैवं विभावादिशब्दव्यवहार्यता तदैतानि सम्बन्धिविशेषस्वीकारतत्परिहारनियमविगलनात् साधारण्येन प्रतीयन्त इत्याह—**ममैवैत** इत्यादि। तथा हि—

> **पुष्पोद्भेदमवाप्य केलिशयनाद् दूरस्थया चुम्बने**
> **कान्तेन स्फुरिताधरेण निभृतं भ्रूसंज्ञया याचिते।**
> **आच्छाद्य स्मितपूर्णगण्डफलकं चेलाञ्चलेनाननं**
> **मन्दान्दोलितकुण्डलस्तबकया तन्व्या विधूतं शिरः॥**

इत्यादिकाव्येषु य एते नायिकापुष्पोद्भेदादय आलम्बनोद्दीपनविभावाः, ये चाधरस्फुरणभ्रूसंज्ञादयोऽनुभावाः, ये च तदभिव्यञ्जिता हर्षौत्सुक्यादयो व्यभिचारिणः, न हि ते ममैवैत इत्यादिकं सम्बन्धिविशेषस्वीकारनियमं न ममैवैत इत्यादिकं वा तत्परिहारनियमं पुरस्कृत्य प्रतीयन्ते, अपि तु चित्रतुरगनीत्या साधारण्येन। एवं प्रतीतैर्विभावादिभिरभिव्यक्तः व्यञ्जितः रत्यादिकः स्थायी सामाजिकानां हि वासनात्मकः सूक्ष्मो रतिभावः प्रदर्शितोदाहरणादिकाव्ये प्रतीतैरभिव्यज्यत एव, न तु क्रियते ज्ञाप्यते वा, कारकत्वाद्यनुपपत्तेर्दर्शयिष्यमाणत्वात्। ननु विभावादयः साधारण्येन साक्षात्क्रियन्तां, काव्यनाट्यसमर्पितानां तेषां सर्वान्

determinants, etc. by giving up (their) causality, etc. and because of possessing the pervading function and the like (*vibhāvanādi vyāpāra*). These (*vibhāvas*, etc.) are cognised in universal character on account of non-apprehension of the rule of acceptance or rejection of a particular relation as (illustrated) in (the following):

These, indeed, are mine; these, indeed, are of the opponent; these, indeed, are of the neutral; these, indeed, are not mine; these indeed are not of the opponent; and these, are not of the neutral.

Thus apprehended the basic emotion, love etc., is situated in the spectator in the form of impression. Although it (the basic emotion) exists as belonging to the particular connoisseur but on account of the power of universalising process the *rasa*, though non-different as one's own self, is yet experienced universally by a connoisseur, sharing the correspondence of heart (or aesthetic sensibility) with all, in whom becomes manifest a state of limitlessness free from the contact of any other object of cognition arising from the immediate cessation of the limited character of a cogniser. Having relish (tasting) as its supreme essence, having its life coeval with determinant etc., being enjoyed as a delicious beverage, throbbing, as it were, in front, penetrating as if into the (inmost) heart, embracing, as it were, the entire being, overpowering as if every thing else, producing an experience akin to the taste of Ultimate Reality (Brahman), and effecting an extraordinary charm—such is the *Rasa*, Śṛṅgāra etc.

प्रत्येकरूपत्वात् । स्थायी पुनः प्रतिनियतप्रमातृगत इति कथं रसः साधारण्येन प्रतीयत इत्यत आह—**नियतप्रमातृगतेत्यादि** । **साधारण्योपायेति** । विभावनानुभावनादयो व्यापाराः साधारण्योपायास्तेषां बलात् । प्रमातुः प्रतिनियतः प्रमाता-

स च न कार्यः, विभावादिविनाशेऽपि तस्य सम्भवप्रसङ्गात् । नापि ज्ञाप्यः, सिद्धस्य तस्याभावात् । अपि तु विभावादिभिर्व्यञ्जितश्चर्वणीयः । कारकज्ञापकाभ्यामन्यत् क्व दृष्टमिति चेत्, न क्वचिद् दृष्टमित्यलौकिकत्वसिद्धेर्भूषणमेतन्न दूषणम् । चर्वणानिष्पत्त्या तस्य निष्पत्तिरुपचरितेति कार्योऽप्युच्यताम् ।

लौकिकप्रत्यक्षादिप्रमाणताटस्थ्यावबोधशालिमितयोगिज्ञानवेद्यसंस्पर्शरहितस्वात्ममात्रपर्यवसितपरिमितेतरयोगिसंवेदनविलक्षणलोकोत्तरस्वसंवेदनगोचर इति प्रत्येयोऽप्यभिधीयताम् । तद्ग्राहकं च प्रमाणं न निर्विकल्पकं, विभावादिपरामर्शप्रधानत्वात् । नापि सविकल्पकं, चर्व्यमाणस्यालौकिकानन्दमयस्य तस्य स्वसंवेदनसिद्धत्वात् । उभयाभावरूपस्य चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामवगमयति न तु विरोधमिति श्रीमदाचार्याभिनवगुप्तपादाः ।

हमिति पारिमित्यविगलनाद् यत्किञ्चिदपरिमितत्वमाविर्भवतीत्याह—**तत्कालविगलितेत्यादि** । तावन्तं कालं विगलितायाः परिमितप्रमातृतायाः वशादुन्मिषितः अपरिमितोऽहं प्रमातेत्येवंरूपः वेद्यान्तरसम्पर्केणापि शून्यः अपरिमितभावो यस्य तेन प्रमात्रा साधारण्येन गोचरीकृतः । विभावनादिव्यापारवत्त्वाद् विभावादीनां साधारण्यं, तद्बलात् प्रमातुरपि साधारण्यं, तेन रसोऽपि साधारण्येन गोचरीक्रियत इति यावत् । न चैतद्रसस्य साधारण्यमुपपत्तिमात्रेण समर्थ्यते, अपि तु सर्वस्यापि स्वसंवेदनसाक्षिकमित्याह—**सकलसहृदयसंवादभाजेति** । ननु यद्येवं सर्वप्रकारेण साधारण्यं, तर्हि स्वपरसंवित्तिवैधुर्यात् कथं गोचरीक्रियत इत्यत आह—**स्वाकार इवाभिन्नोऽपीति** । अभिन्नतया प्रतीयमानोऽपि स्वाकारवद् गोचरीक्रियते । स्वाकारो ह्यहमित्यभिन्नतयैव गोचरीक्रियते । नन्विमामलौकिकीं क्लृप्तिं केनानपह्नवनीयेन स्वानुभवेन निश्चिनुम इत्यत आह—**चर्व्यमाणतैकप्राण** इति । यदिदं स्थायिनश्चमत्कारैकघनमास्वाद्यमानत्वं तदेकजीवितो हि रसः । विश्वविलक्षणा चर्वणैव खलु सकलसहृदयसंवादसाक्षिणी रसस्य निष्कृष्टं स्वरूपम् । सा चेयं चर्वणा यावद् विभावादिप्रतीतिस्तावदेवेत्याह—**विभावादिजीवितावधिरिति** । यावदेव विभावादिप्रतीतिस्तावदेव चर्वणा । अतस्तदन्वयव्यतिरेकानुविधानान्न कारणान्तरक्लृप्तिर्युक्तेति भावः । ननु तर्हि विभावादयस्तदभिव्यङ्ग्यो रसश्चेति प्रतीतौ विभागः प्रसक्त इत्यत आह—**पानकरसन्यायेनेति** । न ह्यास्वाद्यमाने पानकरसे मधुराम्लादयो विभागेन प्रतीयन्ते । तद्वदिहापि

And it (i.e. the *rasa*) is not an effect, for it were so, there would be the contingency of its existence even after the disappearance of *determinant* etc. Nor is it made cognisable, for it is not something accomplished, but to be relished after being manifested through *determinant*, etc. "Where have you seen anything different from the material and the manifesting cause?"; to this objection our reply is—'seen nowhere'—but this is an embellishment and not a blemish to prove the extraordinary character (of *rasa*). The coming into being of *rasa* is metaphorical by the consummation of relishing, hence it (*rasa*) may be called even an effect.

It may be spoken of even as cognisable as it is the object of extraordinary self-experience which is distinct from (i) the empirical knowledge, perceptual and the like, (ii) from the knowledge of imperfect *yogins* possessed of analytic knowledge and (iii) from the perfect *yogin's* entirely self-reposed experience, free from the contact of any object of cognition. The mode of proof cognising it (i.e. *rasa*) is not indeterminate because the consideration of *vibhāva*, etc. is predominant in it. Nor is it determinate because that (i.e. *rasa*), which is being relished, and which abounds in extraordinary delight, is known to exist from its experience. Its character, consisting of the negation of both (i.e. indeterminate and determinate modes of proof) and yet being characterised by both, signifies, as before, its extraordinariness without any contradiction. Thus holds the celebrated preceptor Abhinavagupta.

विभावाद्याकाररूषितैव रसचर्वणा। तस्याश्च सकलसहृदयसंवादसाक्षिणी प्रतीतिर्न केनचिदपह्नोतुं शक्येत्याह—**पुर इव परिस्फुरन्नित्यादि**। पुष्पोद्भेदमित्यादि-काव्यस्य श्रवणसमनन्तरमेव हि सहृदयानां तीव्रसंवेगिन्यां बुद्धावुक्तलक्षणो रसः पुरः परिस्फुरतीव, यथायथा चर्वणाभिनिवेशो धारावाहिकया प्रकृष्यते तथातथा

व्याघ्रादयो विभावा भयानकस्येव वीराद्भुतरौद्राणाम्, अश्रुपातादयोऽनुभावाः शृङ्गारस्येव करुणभयानकयोः, चिन्तादयो व्यभिचारिणः शृङ्गारस्येव वीरकरुणभयानकानामिति पृथगनैकान्तिकत्वात् सूत्रे मिलिता निर्दिष्टाः ।

हृदयं प्रविशतीव, सर्वाङ्गमभिव्याप्यालिङ्गतीव, स्वव्यतिरेकेण वस्त्वन्तरं तिरोदधातीव, अखण्डाद्वयचमत्कारैकघनं ब्रह्मास्वादमनुभावयतीव । इत्थमलौकिकं चमत्कारं योऽयमाविष्करोति स शृङ्गारादिको रसः । ननु यदनन्तरं यद् दृश्यत इति नयेन विभावाद्यन्वयव्यतिरेकानुविधायिनो रसस्य कथं न कार्यत्वमित्यत आह—**स च न कार्य** इति । तत्र हेतुः—**विभावादीति** । न हि कारणनाशेन कार्यनाशः । रसस्य तु विभावादिजीवितावधेर्न कार्यत्वमुपपद्यत इति भावः । तस्य विभावादिना ज्ञप्तिरिति कथं न ज्ञाप्यत इत्यत आह—**नापि ज्ञाप्य** इति । तत्र हेतुः—**सिद्धस्येति** । कारणान्तरेण सिद्धं हि वह्न्यादि धूमादिना ज्ञाप्यते । न हि रसस्यान्यतः सिद्धिः, अपि तु विभावादेरेवेति भावः । कया गमनिकया तर्ह्ययं प्रतीयत इत्यत आह—**अपि तु विभावादिभिरिति** । ननु प्रदीपघटन्यायेन यदि व्यज्येत, तदापि व्यङ्ग्यव्यञ्जकभावस्य लौकिकत्वात् कश्चमत्कार इत्यत आह—**चर्वणीय** इति । व्यङ्ग्यव्यञ्जकभावोऽप्यलौकिक एवेहाङ्गीक्रियते, चमत्कारचर्वणारूपस्यालौकिकत्वातिशयविशेषस्य दुर्निह्नवत्वात् । विभावादिसंवलितत्वेनैव च प्रतीतिरिति प्रदीपघटन्यायो दृष्टान्तीक्रियते च । ननु व्यञ्जको व्यञ्जक इति व्यवह्रियतेतमां, कुत्रायं व्यञ्जकः सिद्ध इत्याक्षेप्तुकामानुपहसन्नाह—**कारकज्ञापकाभ्यामि**त्यादि । अत्रायमाशयः—किं तावदायुष्मान् प्रतिपद्यते । कारकज्ञापकेतरस्यान्यत्रादर्शनाद् रसप्रतीतेः किं स्वरूपतो हानिरुत लोकविलक्षणत्वमेव दूषणमिति । न तावत् स्वरूपतो हानिः, सकलसहृदयसंवादसाक्षितया पुष्पोद्भेदमित्यादिकाव्यश्रवणसमनन्तरमेव पुरःस्फुरन्त्या रसप्रतीतेर्दूरदुर्निह्नवत्वात् । लौकिकविलक्षणत्वं तु न दूषणं प्रत्युतानर्घं भूषणम् । कथमितरथा बीभत्सादयोऽपि मनोदुःखविशेषाः कविशब्ददर्पणान्तःप्रतिफलनमात्रमहिम्ना शरदिन्दुसुधानिःष्यन्दसाराभिषेकसुभगतामासादयेयुः । ननु किमनेन प्रयासेन । यदि मुख्यतया नोपपद्यते कार्यत्वं रसस्य, तर्ह्युपचारेणास्तु । अस्ति चोपचरणहेतुश्चर्वणानिष्पत्तिरिति ये प्रलपन्ति बालिशास्तान् प्रौढिवादेनैव प्रधर्षयितुमाह—**चर्वणानिष्पत्त्ये**त्यादि । त्वयैवोपचरितत्वादकार्यत्वाभ्युपगमे किमन्यत् साधनीयमस्माभिरिति भावः । ननु विभा-

The determinants, tiger and the like, belong to the Heroic, the Wonderful and the Furious, as to the Terrific; the ensuants like the fall of tears belong to the Pathetic and the Terrific, as to the Erotic; the *transitories* like anxiety to the Heroic, the Pathetic and the Terrific, as to the Erotic. As these are not exclusive (to any particular *rasa*), they have been mentioned together in the aphorism (of Bharata).

वादिप्रतीत्यन्वयव्यतिरेकानुविधायिप्रतीतिको हि रसः। अतो ज्ञाप्य एव। ज्ञाप्यान्तरविलक्षणश्चेद् ज्ञाप्यविशेषः कश्चिदलौकिकोऽस्तु। किमन्यप्रकल्पनगौरवेणेति ये भ्रान्तास्तानप्यगणयन्नाह — **लौकिकप्रत्यक्षेत्या**दि। विलक्षणशब्दः प्रत्येकमभिसम्बध्यते। प्रत्यक्षादिप्रमाणविलक्षणं मितयोगिज्ञानविलक्षणं परिमितेतरयोगिसंवेदनविलक्षणं च यत् स्वसंवेदनं तद्गोचरत्वात् कथमसौ ज्ञाप्य इत्युल्लुण्ठोक्तितात्पर्यम्। तत्र प्रत्यक्षादिप्रमाणवैलक्षण्ये हेतूपन्यासः— **लौकिकेति**। प्रत्यक्षादिकं हि प्रमाणं लौकिकं प्रत्यक्षादित्वादेव। रसस्तु गुणालङ्काराभिनयसध्रीचीनव्यञ्जकवैशिष्टयादलौकिक एवेति वितत्योपपादितम्। मितयोगिज्ञानवैलक्षण्यं दर्शयितुमाह—**ताटस्थ्यावबोधे**त्यादि। ये हि सांख्यादयो भिन्नसर्वज्ञास्ते भेदेन जगज्जानाना जगदद्वयावबोधांशे योगपारिमित्यान्मितयोगिनः। तेषां हि ज्ञानं ताटस्थ्यावबोधशालि। ते हि साक्षिणः सन्तो विश्वं ताटस्थ्येन पश्यन्ति। सहृदयसंवेदनं तु तद्विलक्षणम्, अभिनिवेशातिशयेन विभावादिताद्रूप्यापन्नत्वात्। अथापरिमितयोगिसंवेदनवैलक्षण्यं दर्शयति—**वेद्यसंस्पर्शे**त्यादि। यैर्हि वेद्यजातमिदं कारणलयक्रमेण स्वात्मप्रकाशसात्कारं नीतं, तेषां संवेदनमखण्डपरिपूर्णाद्वयस्वस्वरूपमात्रोल्लेखीत्यपरिमितयोगिनः। ततो हि रससंवेदनं विलक्षणमेव, विभावादिपरामर्शैकसारत्वात्। एवं ज्ञप्तिलक्षणं प्रमेयमुखादवखण्डय प्रमाणमुखेनापि खण्डयति—**तद्ग्राहकं चेत्या**दिना। विभावादिपरामर्शेति विकल्पप्रदर्शनम्। स्वसंवेदनसिद्धत्वादिति अविकल्पताविष्करणं 'स्वात्मन्यविकल्पाविकल्पा' इति न्यायात्। अत्रापि लोकवैलक्षण्यं गुण एवेत्याह—**उभयाभावरूपस्ये**त्यादि। उभयाभावरूपत्वमुभयात्मकत्वं चेति महती खल्वियमलौकिकता। **श्रीमदाचार्येति**। विवृण्वत इत्यनुषङ्गः। श्रीमदिति सारासारविवेचनसम्पदाविष्कृता। आचार्येति प्रामाण्ये परा काष्ठा प्रतिष्ठापिता। पादा इति स्वस्य तत्सम्प्रदायानुवर्तित्वम्।

वियदलिमलिनाम्बुगर्भमेघं मधुकरकोकिलकूजितैर्दिशां श्रीः ।
धरणिरभिनवाङ्कुराङ्कटङ्का प्रणतिपरे दयिते प्रसीद मुग्धे ।।२७।।

इत्यादौ,

परिमृदितमृणालीम्लानमङ्गं प्रवृत्तिः
कथमपि परिवारप्रार्थनाभिः क्रियासु ।
कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मी-
मभिनवकरिदन्तच्छेदकान्तः कपोलः ।।२८।।

[Mālatīmādhava, I.25]

इत्यादौ,

दूरादुत्सुकमागते विवलितं सम्भाषिणि स्फारितं
संश्लिष्यत्यरुणं गृहीतवसने किञ्चाञ्चितभ्रूलतम् ।
मानिन्याश्चरणानतिव्यतिकरे बाष्पाम्बुपूर्णं क्षणा-
च्चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ।।२९।।

[Amaruśataka, 49]

ननु रसविशेषनिर्ज्ञानाय विभावादीनि विभज्य निर्देशमर्हन्ति, तस्माद-युक्तोऽयं सामान्यतो निर्देश इत्यत आह—**व्याघ्रादय** इत्यादि । व्याघ्रादयो हि यथा भयसंस्कारवतां भयाय कल्पन्ते, तथोत्साहादिसंस्कारवतां तदभिव्यक्तये भवन्ति । अतो विभावानामनैकान्तिकत्वम् । अथानुभावानामाह—**अश्रुपातादय** इति । शृङ्गारे हि रोषहर्षादिना, करुणे शोकेन, भयानके च भयेन । व्यभिचारिणां दर्शयति—**चिन्तादय** इति । शृङ्गारे मानादिना, वीरे मनोरथादिना, करुणे दुःखेन, भयानके भयेन चिन्ताद्याविर्भावः । इतिर्हेतौ । पृथगिति त्रिष्वेकतरस्यापि न विभज्य निर्देशार्हतेति द्योतितम् ।

ननु विभावादिसंयोगाद् रसनिष्पत्तिरित्युच्यते । नैतदस्तीति चोदयन् पृथग् व्यञ्जकत्वमेषामुदाहृत्य दर्शयति—**वियदलिमलिने**त्यादिश्लोकत्रयेण । तत्र प्रथमश्लोके धारारूढमानतया प्रसादावसरानभिज्ञां कामपि मुग्धां प्रसादं नेतुं वयस्या वक्ति—हे मुग्धे अवसरानभिज्ञे प्रसीद प्रसादस्य तवायं प्राप्तः कालः । कुतः, वियत् तावत् नवाम्बुवाहनिरन्तरं, दिशोऽपि मधुकरपरभृतकूजितैरुद्वेल-

The sky is overcast with water-laden, beelike, dark clouds, the quarters are lovely with the sounds of bees and the cuckoo; the earth is charming with new sprouts in her lap. O ! innocent one, be pleased with (your) submissive lover. 27

Her body is withered like a squeezed lotus-stalk; her disposition towards activities is, somehow, due to the entreaties of her attendants; and her cheek, pretty as a fresh piece of ivory, assumes the grace of the spotless moon. 28

In the instances, given above, and in the following :

Oh, how the eye has become expert in assuming many forms towards the faithless lover ! When he is still far away, it is anxious; but it turns away from him when he arrives; when he talks, it dilates; on his embracing, it turns red; when he seizes her garment, its creeper-like brows are knit, and when he contrives to fall on the feet of the angry lady, its vision is filled with tears. 29

श्रियः, भूरपि नवाङ्कुराङ्कविच्छित्तिमती । अतो वियति दिक्षु धरण्यां वा चक्षुषी निधातुमेव न शक्यते, प्राणधारणकथा तु दूरे । यदस्ति तदस्तु, किमधिकमापतिष्यति प्राणपरित्यागात्, गर्वोत्सिक्तं तु कितवं द्रष्टुमेव नोत्सह इति चेन्मन्यसे, तदपि नास्ति । यतः प्रणतिपरो वर्तते दयितः । अत्र केवलमालम्बनोद्दीपनरूपा विभावा एव निबद्धाः, पुष्कला च रसाभिव्यक्तिः ।

परिमृदितेत्यादि । अत्र निद्राच्छेदादिना यदेतदङ्गानां मृदितमृणालनालम्लानता, या च स्नानादिकासु देहक्रियासु परिजनप्रार्थनया कथमप्यरतिमन्थरा प्रवृत्तिः, यच्चैतत् कपोलस्य शरीरसन्तापातिशयशंसि निष्कलङ्कमृगाङ्कलक्ष्मीकलनं, त्रितयमप्येतद् अनुभावैकरूपं सदपि सहृदयहृदयसंवादसाक्षिणीं कामपि रसप्रकर्षकाष्ठामपरोक्षयति ।

दूरादुत्सुकमिति । औत्सुक्यव्यतिरिक्तानां व्यभिचारिणां नियमेन व्यङ्ग्यत्वम्, औत्सुक्यस्य तु वाच्यत्वमेवेति भविष्यति । अत उत्सुकमिति स्वशब्देनास्योपादानं युक्तम् । विवलनेन लज्जा, स्फारणेन हर्षः, अरुणीभावेन कोपः, भ्रूलताञ्चनेनासूया, उद्बाष्पतया प्रसाद इति व्यभिचारिणामेव व्यञ्जकत्वम् ।

इत्यादौ च यद्यपि विभावानामनुभावानामौत्सुक्यव्रीडाहर्षकोपासूयाप्रसादानां च व्यभिचारिणां केवलानामेव स्थितिः, तथाप्येषामसाधारणत्वमित्यन्यतमद्वयाक्षेपकत्वे सति नानैकान्तिकत्वमिति ।

तद्विशेषानाह—

> शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
> बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्यरसाः स्मृताः ॥ २९ ॥

तत्र शृङ्गारस्य द्वौ भेदौ सम्भोगो विप्रलम्भश्च । तत्राद्यः परस्परावलोकनालिङ्गनपरिचुम्बनाद्यनन्तभेदत्वादपरिच्छेद्य इत्येक एव गण्यते । यथा—

> **शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-**
> **र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।**
> **विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं**
> **लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥३०॥**

[Amaruśataka, 82]

इत्थं च सति संयोगादिति यदुक्तं, तदव्यापकमित्याक्षेपः । एतत् परिहरति—**तथाप्येषामसाधारणत्वमिति।** एषां विभावादीनामसाधारणत्वमेव, न तु रसान्तरसाधारण्यम् । इतिर्हेतौ । यत इत्थमसाधारण्यमतोऽन्यतमद्वयाक्षेपः । **अन्यतमद्वयेति ।** वियदलीत्यत्र वेपथुवैवर्ण्याश्रुपातादयोऽनुभावास्तदभिव्यञ्जिता ग्लानिशङ्कासूयादयो व्यभिचारिणश्चाक्षिप्यन्ते । परिमृदितेत्यादावप्येवमुन्नेयम् ।

अथ रसविशेषलक्षणावसर इत्याह—**तद्विशेषानिति ।**

शृङ्गारहास्येति । शान्तस्याभिनयव्यङ्ग्यत्वानभ्युपगमादष्टौ नाट्यरसाः ।

शृङ्गारस्यावान्तरभेदप्रथनायाह—**तत्रेति ।**

शून्यमिति । वासगृहं शून्यं विलोक्य शयनाच्छनैः किञ्चिदुत्थाय निद्राव्याजमुपागतस्य पत्युर्मुखं सुचिरं निर्वर्ण्य विस्रब्धं परिचुम्ब्य जातपुलकां गण्डस्थलीमालोक्य लज्जानम्रमुखी बाला हसता प्रियेण चिरं चुम्बितेति वाक्यार्थकक्ष्या शब्दार्थशासनमात्रविदां गोचरः । शून्यवासगृहविलोकनमुत्थानस्य, उत्थानं मुखनिर्वर्णनस्य तदपि परिचुम्बनस्य, परिचुम्बनं पुलकितकपोलालोकनस्य, तच्च मुखावनतेः, सा च प्रियकर्तृकस्य चिरचुम्बनस्य कारणभूयमापद्यत इत्यर्थवैचित्र्यपर्यालोचनकक्ष्या त्वालङ्कारिकाणां गोचरः । ध्वनिप्रस्थानविदां तु कक्ष्याद्वयं चातिलङ्घ्य श्रवणसमनन्तरमेव सहृदयानामन्यदेव पार्यन्तिक्यां प्रतीतिविश्रान्तिकक्ष्यायामभिव्यङ्ग्यसम्भोगशृङ्गाररसचर्वणसुखसाम्राज्यं नव-

In cases like these, though the determinants (in verse no. 28), the ensuants (in verse no. 29) and the transitories, anxiety, bashfulness, joy, anger, envy, and cheer etc., stand wholly unmingled, yet they have a specific character (viz. the existence of one, say the Determinant, implies the existence of the other two, Ensuant and the Transitories). Thus when the one implies the other two there is no room for exclusiveness (The *sūtra* of Bharata on *rasa* is not fallacious because it mentions Determinants etc., together. Because even though one may be described, the other two will be implied. Such is the character of Determinants, etc.).

The author now states the varieties of that (*rasa*):

29. The Erotic, the Comic, the Pathetic, the Furious, the Heroic, the Terrific and the Disgustful and the Wonderful,—these are the eight *rasas* in dramatic art.

There, the Erotic is of two kinds—love in union and love in separation. Of these, the former is counted (as) only one, being indefinable due to its endless varieties such as mutual sight, embracing and kissing. For example :

Finding the bed-chamber quiet, the young bride, rising gently and slowly from her couch and having scanned for very long the face of her lord feigning sleep, imprinted a kiss without fear or hesitation; on perceiving his cheeks horripilated, her head bent down in bashfulness while the smiling lover kissed her for long. 30

नवमुद्धुरीभवद् विप्रथते । तथा हि—शून्यमित्यनेन निष्क्रान्ताशेषपरिजनतया क्रीडागिरिकुञ्जादिवत् परमोद्दीपनत्वं व्यज्यते। वासगृहेति स्रगनुलेपनमुखविचित्र-सुरतोपकरणसमृद्धिः । विलोक्येति विलोकनक्रियायाः पौनःपुन्यलक्षणो विशेषो विष्वग्वृत्तिता च । किञ्चिदुत्थायेति पूर्वकायमात्रेण शय्यापरित्यागः । शनैरिति मिथस्सन्दानितोरुसंक्षोभभीरुता । उपागतस्येति बुद्धिपूर्वमुपागमाद् व्याजनिद्राया दूरदुर्निरूपता । सुचिरमिति निर्वर्णननैपुणमान्द्यान्मौग्ध्यमस्याः, तस्य च व्याज-निद्रागोपननैपुणम् । पत्युरिति परमलज्जास्पदत्वम् । विस्रब्धमित्यविमृश्यकारि-तायाः परा काष्ठा । परिचुम्ब्येति चुम्बनस्य परितः स्वाच्छन्द्येन प्रवृत्तिः । जातपुलकां, न तु जनितपुलकाम् ।अनेन पुलकानामवशादाविर्भावः । आलोक्येति

तथा,

त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं
लक्ष्मीमित्यभिधायिनी प्रियतमे तद्वीटिकासंस्पृशि ।
शय्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितो
निर्यातः शनकैरलीकवचनोपन्यासमालीजनः ॥३१॥

अपरस्तु अभिलाषविरहेर्ष्याप्रवासशापहेतुक इति पञ्चविधः । क्रमेणोदाहरणम्—

प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि
यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः ॥३२॥

[Mālatīmādhava, V.7]

पुलकसन्दर्शनमात्रेण, न तु निपुणं निर्वर्ण्येति । नम्रमुखी, न तु नमितमुखी । अनेन तथा धारावाहिलज्जासंवेगः, यदस्या मुखावनमनेऽपि न स्वातन्त्र्यम् । तत्तु लज्जातिभारात् स्वयमेव नतमिति । पत्युरित्युद्दिश्य प्रियेणेति प्रतिनिर्देशात् तदासौ विशिष्य प्रियोऽभूदिति । हसतेति झटिति व्याजनिद्राविधूननम् । बालेति अनैपुणाच्चुम्बनचौर्यरहस्यभेदः । चिरमिति यावता कालेन लज्जासंवेगोपशमः सम्भोगप्रस्तावाङ्गीकारश्च, तावदविकलकचग्रहमाक्रम्य चुम्बितेति । अत्र विस्रब्धपरिचुम्बनान्तं शृङ्गारस्य नायिकारब्धत्वम् । अथ गण्डस्थलीमालोक्य लज्जानम्रमुखीति तस्य स्थगनम् । अथ हसता प्रियेण चुम्बितेति निष्पत्तौ नायकारब्धत्वम् । तेन शृङ्गारद्वयमिहाभिव्यज्यते । आद्यस्य पतिरालम्बनविभावः । शून्यवासगृहमुद्दीपनविभावः । शयनादुत्थानं मुखनिर्वर्णनं परिचुम्बनं चेत्यनुभावाः । तदभिव्यञ्जिता हर्षौत्सुक्यशङ्कादयो व्यभिचारिणः । तैरभिव्यज्यमानो रतिभावः सचेतनचेतश्चमत्काराय प्रभवति । अथ द्वितीयस्य बाला आलम्बनविभावः । शून्यवासगृहादिकमुद्दीपनविभावः । हासोऽनुभावः तदभिव्यञ्जिता हर्षौत्सुक्यादयो व्यभिचारिणः । उभयारब्धोऽपि सन् प्रथमं नायिकारब्ध इति मूर्धन्यतया प्रागुदाहृतः । एवमुदाहरणेषु पदध्वन्यादिप्रपञ्चः स्वयमनुसन्धेयः । अस्माभिस्तु यावदपेक्षितं तावदेव लिख्यते ग्रन्थगौरवभयात् ।

नायकारब्धत्वेनाप्युदाहर्तुमाह—**तथेति** ।

त्वं मुग्धाक्षीति । वीटिका कञ्चुलिकाग्रन्थिः । सखीति वयस्याप्रतीत्यपेक्षया नायिकाया व्यपदेशः । नायके कञ्चुलिकावीटिकामुद्ग्रथयितुमिच्छति

And :

"O beautiful-eyed one, even without a bodice you keep a captivating charm"—speaking thus the lover touched the knot of her bodice and her companions, delighted at the exulting eyes of their smiling friend seated on the edge of the bed, softly went away giving false excuses. 31

But the other (i.e. love in separation), caused by longing, isolation, jealousy, sojourn abroad, and curse, is of five kinds. The following are the illustrations in order :

For me, may the innately sweet, various gestures of the lovely-eyed one be overflowed with love tinged with affection, and bathed in the rise of passion through our intimacy ! Even in their fancy there is such a rapturous absorption of mind that the operation of external organs is immediately suspended. 32

सति तस्य शय्योपान्ते निविष्टा रिरंसाविर्भावेन सस्मिता या सखी नायिका सैव नेत्रोत्सवः आलिजनस्य नयनानन्दहेतुः । अलीकमित्युपन्यासविशेषणम्, अलीको वचनोपन्यासो यत्रेति । अपनीतनिचोल कैव शोभस इति निचोलमुद्ग्रथयितुकामे कमितरि सस्मितत्वेन नेत्रोत्सवभूतया नायिकयानन्दितः सविधवर्ती सखीजनः शुकोऽध्यापनीयः शारिका भोजनीयेत्यादिकं वचनमलीकत्वेनोपन्यस्योपन्यस्य निर्यात इत्यर्थः ।

विप्रलम्भं विभजति— **अपरस्त्विति** ।

प्रेमार्द्रा इति । साक्षात्कृतमालतीविभ्रमस्य सङ्कल्पदशावस्थस्य माधवस्येयमाशंसा । मुग्धदृशः अकृतकविलासं पश्यन्त्याः अत एव निसर्गमधुराः स्वभावसुभगाः तास्ताश्चेष्टाः निरुक्तिसरणिसमुल्लङ्घिन्यः स्वानुभवैकसमधिगम्या नयनत्रिभागालोकनादयो विलासविशेषाः मयि प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया भवेयुरिति त्रितयमप्याशंसास्पदतया विधेयम् । प्राक्पर्वणि सन्दर्शनादिना प्रादुर्भूता रतिः प्रेम । तदुक्तं—

"सन्दर्शनादिजनिता रतिः प्रेम निगद्यते"

इति । तदेव चुम्बनादिना प्रकर्षं नीतं प्रणयः । यदुक्तं—

"प्रेम नीतं प्रकर्षं चेत् तदा प्रणय उच्यते"

इति । प्रणय एव परिचयान्नीलीमञ्जिष्ठादिनीत्या रञ्जनक्षमो रागः । यदुक्तं—

अन्यत्र व्रजतीति का खलु कथा नाप्यस्य तादृक् सुहृद्
यो मां नेच्छति नागतश्च सहसा कोऽयं विधेः प्रक्रमः ।
इत्यल्पेतरकल्पनाकवलितस्वान्ता निशान्तान्तरे
बाला वृत्तविवर्तनव्यतिकरा नाप्नोति निद्रां निशि ॥३३॥

एषा विरहोत्कण्ठिता ।

सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम् ।
स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः ॥३४॥
[Amaruśataka, 29]

प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः ।
यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवित प्रियसुहृत्सार्थः किमु त्यज्यते ॥३५॥
[Amaruśataka, 35]

"रागोऽभिधीयते गाढः प्रणयो रञ्जनक्षमः"

इति । या एता मुग्धदृशो निसर्गमधुराश्चेष्टाः, ता मयि सन्दर्शनादिजनितेन प्रेम्णा पूर्वमार्द्राः, अथ चुम्बनाद्युपचितप्रणयानुबन्धिन्यः, अथ परिचयादुद्गाढ-रागोदया भवेयुः किम् । यासु मनोरथमात्रेणापि मद्विषयत्वेनानुचिन्तितासु मनसो लयो निष्पन्दत्वं भवति । कीदृशः, बाह्यकरणव्यापाररोधी बाह्यकरणानां चक्षुरादीनां रूपादिग्रहणलक्षणस्य व्यापारस्य रोधनक्षमः । ईदृशो लयः स्वाप-मूर्छादावपि साधारण इत्यत आह—**आनन्दसान्द्र** इति । यास्वाशंसापरिकल्पि-तास्वपि ब्रह्मास्वादसुखसधर्मायमन्तःकरणस्य लयो जायते, ताश्चेत् साक्षान्मयि भवेयुस्तदा का निर्वृतिरिति न विद्म इति भावः । अयमभिलाषविप्रलम्भः ।

अन्यत्रेति । का खलु कथा शङ्कैव न विद्यत इत्यर्थः । यदि स्वतो न व्रजति, तर्हि सुहृत्प्रेरणयेत्यत आह— **नाप्यस्य तादृगिति । यो मां नेच्छतीति,** यो मामभिद्रुह्यन्नन्यत्र नयेदित्यर्थः । तर्ह्यागमनमेव प्राप्तं, तदपि नास्तीत्याह— **नागतश्चेति** । इत्थं स्वतः सुहृदो वा नास्यापराधः शङ्क्यः, अपि तु विधेरेवे-

There is no question of his going elsewhere (of his own accord), nor has he such a friend who would not wish me (to be happy); and yet he has not come back. Oh! what could be the scheme of stars! Thus with her heart filled with not a few doubts the young lady gets no sleep in the night and lies rolling about in her bed. 33

She is longing in separation.

On the occasion of the first offence of her husband the young wife knows not, without the instructions of her friend, how to express herself with sallies of wit and oblique turn of her limbs; with her lotus-like eyes filled with bright tears tumbling down on the clear cheeks and rolling over her fluttering locks, she knows no more than to weep. 34

When my lover made up his mind to go abroad, all started to depart together: the bracelets have left, and the tears, my dear friends, have flowed down incessantly; courage stayed not for a moment and my mind has resolved to proceed ahead. O life, if you must go your way, why should you forsake the company of your dear friends? 35

त्याह—**कोऽयं विधिरिति** । कल्पना विकल्पनाः, वृत्तविवर्तनव्यतिकरा गृहान्तर एव शय्यादिषु प्रवृत्तविलुठनातिरेका ।

सा पत्युरिति । सख्योपदेशं सखीकर्तृकमुपदेशमित्यर्थः ।

प्रस्थानमिति । कृतप्रयाणसंविधानके प्रेयसि सद्यस्समुत्सन्नदेहेन्द्रियसौष्ठवा काचित् स्वयमेव जीवितं सोपालम्भं वक्ति—भो जीवित ! यातु निश्चितचेतसि प्रियतमे वलयैः प्रस्थानं कृतम् । अनेन शरीरसादः । प्रियसखैरस्रै रजस्रं गतम् विरहे सति सद्योनिर्गमात् प्रियसखत्वम् । अनेन बाह्येन्द्रियव्यथा । धृत्या चित्तेनेति चान्तःकरणोपप्लवः । इत्थं य एते सहचरास्ते प्रतिष्ठामानेन तेनैव सह प्रस्थिताः । एषां त्यागे तव को हेतुः । अगमनं चेत् तन्नास्त्येवेत्याह—**गन्तव्ये सतीति** । निर्लज्ज ! हतजीवित ! अवसादावसरे नावसीदसि, धिक् त्वां निष्ठुरमिति भावः ।

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥३६॥
[Meghadūta, II. 45]

हास्यादीनां क्रमेणोदाहरणम्—

आकुञ्च्य पाणिमशुचि मम मूर्ध्नि वेश्या
मन्त्राम्भसां प्रतिपदं पृषतैः पवित्रे ।
तारस्वनं प्रहितशूत्कमदात् प्रहारं
हा हा हतोऽहमिति रोदिति विष्णुशर्मा ॥३७॥

हा मातस्त्वरितासि कुत्र किमिदं हा देवताः क्वाशिषः
धिक् प्राणान् पतितोऽशनिर्हुतवहस्तेऽङ्गेषु दग्धे दृशौ ।
इत्थं घर्घरमध्यरुद्धकरुणाः पौराङ्गनानां गिर-
श्चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि ॥३८॥
[By Nārāyaṇa Bhaṭṭa]

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम् ॥३९॥
[Veṇīsaṁhāra, III. 24]

क्षुद्राः सन्त्रासमेते विजहित हरयः क्षुण्णशक्रेभकुम्भा
युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः ।
सौमित्रे तिष्ठ पात्रं त्वमपि न हि रुषो नन्वहं मेघनादः
किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि ॥४०॥
[Hanumannāṭaka ?]

त्वामालिख्येति । अत्र सर्वप्रकारदुःखकारी मन्मथ एव कृतान्तत्वेनाध्यवसीयते ।

रसान्तराणामवसरतः प्राप्तिं दर्शयति—**हास्यादीनामिति** ।

आकुञ्च्येति । विष्णुशर्मेति नामैव तावदाजन्मनो जाल्मत्वमाविष्करोति । एतन्नामकः कश्चित् शोच्यः श्रोत्रियो हा हा हतोऽहमिति रोदिति । कुतः, वेश्या अशुचि पाणिमाकुञ्च्य या पुण्यस्त्री न भवति सैव वेशवाटचेटिका काचित् प्रायत्याभावान्नित्योपहतं पाणिमङ्गुष्ठारूढाकुञ्चिताङ्गुलिकं कृत्वा मन्त्राम्भसां पृषतैः प्रतिपदं पवित्रे ममैव मूर्ध्नि प्रहारमदात् । कथं, तारस्वनं वेणुपर्वस्फोटवद् यथाङ्गुलिघट्टनात् स्वनाविर्भावस्तथा । प्रहितशूत्कं कुड्मलितेनोष्ठसम्पुटेनासभ्यः शूत्कारोऽपि यथा प्रहीयते तथा ।

After having painted you, angered in love, on a piece of stone with mineral dyes, the moment I think of portraying myself as fallen at your feet, my vision is blurred by repeatedly gathering tears. Even there, the cruel fate does not tolerate our union. 36

Now, the illustrations of the Comic and others in order:

"The courtezan clenched her dirty fist and with a bang and hissing punched my head made sacred by the drops of water consecrated by incantations. Ah, I am killed"—Thus wails Viṣṇu Śarman. 37

(The Pathetic:)

"Oh mother! you have hastened away; but whereto? What is all this? Oh gods! where are your blessings! Fie on our lives! The bolt from the blue has fallen. The fire is on your limbs. Burnt are the eyes." Thus, the gurgling and muffled lamentations of the town ladies make even the painted objects weep and break even the walls to pieces. 38

(The Furious:)

Here I make oblations to the quarters with the blood, the fat and the flesh of all those including Bhīma and Arjuna as also the enemy of Naraka (i.e. Kṛṣṇa) by whom, brutes of men that you are, transgressing all moral law, and having your arms raised, was perpetuated or connived at or witnessed this great sin (i e. killing of Droṇa, the teacher). 39

(The Heroic:)

O ye tiny monkeys, give up your fears. My arrows, which have shot the forehead of Indra's elephant, are put to great shame by falling on your bodies. O son of Sumitrā, keep aloof; you are not worthy of my anger; look here, I am Meghanāda searching for Rāma who has disciplined the ocean merely by a little knitting of his eye-brows. 40

करुणमुदाहरति—**हा मातरिति**। शत्रुसम्पाताद्युपप्लवेनाकुलानां पौराङ्गनानामित्थं निर्गता गिरश्चित्रस्थानपि जनान् रोदयन्ति चित्रभित्तीरपि शतधा-दलयन्ति। कीदृश्यः, हा मातस्त्वरितासीति, कुत्रेति, किमिदमिति, हा देवताः क्वाशिष इति, धिक् प्राणानिति, पतितोऽशनिरिति, हुतवहस्तेऽङ्गेष्विति, दग्धे दृशाविति, घर्घराः भिन्नकण्ठत्वाद् विस्वराः मध्यरुद्धाः अवसन्नस्वरत्वादर्धोक्तिप्रायाः करुणाश्च।

रौद्रमुदाहरति—**कृतमनुमतमिति**। गुरुपातकं गुरुवधलक्षणं पातकम्। नरकरिपुणा सार्धं भवतामसृङ्मेदोमांसैर्दिशां बलिं करोमीत्यश्वत्थाम्न उक्तौ क्रोधोऽभिव्यज्यमानो रौद्रत्वमापद्यते।

वीरमुदाहरति—**क्षुद्रा इति**। किञ्चिदित्यन्वेषणक्रियाविशेषणम्।

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥४१॥

[Abhijñānaśākuntala, I.7]

उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोटभूयांसि मांसा-
न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।
आत्तस्नाय्वान्त्रनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥४२॥

[Mālatīmādhava, V. 16]

चित्रं महानेष बताविकारः क्व कान्तिरेषाभिनवैव भङ्गिः ।
लोकोत्तरं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एव सर्गः ॥४३॥

एषां स्थायिभावानाह—

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्त्तिताः ॥ ३० ॥

स्पष्टम् ।

व्यभिचारिणो ब्रूते—

निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः ।

भयानकमुदाहरति—**ग्रीवाभङ्गेति** ।

बीभत्समुदाहरति—**उत्कृत्योत्कृत्येति** । कृत्तिश्चर्म । उच्छोटः उपचयः । पिण्डी जानूरुप्रकोष्ठभुजान्तरप्रदेशः । स्नायूनि अस्थिबन्धनसिराः । प्रेतरङ्कः प्रेतशिशुः । करङ्कः शवः । स्थपुटं विषमकर्परादिसन्धिः ।

अद्भुतमुदाहरति—**चित्रमिति** । अत्र महत्त्वाविकारित्वकान्तिभङ्गिधैर्य-प्रभावाकृतिसर्गेषु चित्रं बत क्व अभिनवैव लोकोत्तरम् अहो कापि नूतन एवेत्येतैर्लोकातिक्रान्तकौतुकास्पदता प्रत्याय्यते ।

रसानेवं सोदाहरणं निरूप्य स्थायिभावान् प्रस्तौति—**एषामित्यादि** ।

रतिहासादयः संस्कारात्मकाः सूक्ष्माश्चित्तवृत्तिविशेषाः । भावान्तरोपकार्यत्वेनैषां प्राधान्यम् । यदुक्तम्—

(The Terrific :)

With his glance fixed ever and anon on the pursuing chariot in a manner graceful on account of the turn of neck, having to a great extent his hinder part entered the forepart of his body through fear of descent of an arrow and having strewn the track with half-chewed *darbha*-grass dropping from his mouth gaping through exhaustion, behold, how owing to his boundings, he moves, much more through the sky and much less on the ground.

(The Disgustful :)

Having first cut out the skin repeatedly, the intestines and the eye-balls and with his teeth displayed the beggarly ghost strips off the skin continually at first, devours the swollen and acutely stinking flesh readily got from such parts of the body as the shoulders, the hips and the calves, eats unalarmed from corpse placed in his lap, what flesh is left upon the bones and also in the joints of the rough bowl. 42

(The Wonderful :)

What a wonder ! What a great immutability is this ! What a splendour ! Novel, indeed is the appearance ! Extraordinary is the equanimity ! Oh, what a spell ! and what a figure ! Novel, indeed, is this creation.

The author (now) states the *basic emotions* of these (*rasas*) :

30. Love, Laughter, Sorrow, Anger, Energy, and Fear, as also Disgust and Wonder—these are enumerated as the basic emotions.

It is clear.

31-34. What are known as (1) Detachment (or Despair), (2) Weakness and (3) Misgiving, so

---

"स्थायिनामेव भावानामुपकाराय सर्वदा ।
वर्तन्ते सात्त्विका भावा भावाश्च व्यभिचारिणः ।।" इति ।

अथ व्यभिचारिणः । प्रवहद्रूपे स्थायिभावे । तदुत्क्षोभशंसिनः फेनबुद्बुदादिवन्निमज्जनोन्मज्जनधर्मिणो व्यभिचारिणः । यदुक्तम्—

"विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधौ ।।" इति ।

निर्वेदग्लानीति । ईर्ष्यातत्त्वज्ञानादिना स्वात्मावमतिर्निर्वेदः । तस्य निःश्वासोच्छ्वासवैवर्ण्यादयोऽनुभावाः, ग्लानिदैन्यादयो व्यभिचारिणः । यदाह—

"बाष्पाभिपूर्णनयनः पुनः पुनः श्वसिति दीनमुखनेत्रः ।
योगीव ध्यानरतो भवति हि निर्वेदतः पुरुषः ।।"

आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥ ३१ ॥
व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥ ३२ ॥
सुप्तं विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥ ३३ ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामभिः ॥ ३४ ॥

[Nāṭyaśāstra, VI. 19-22]

निर्वेदस्यामङ्गलप्रायस्य प्रथममनुपादेयत्वेऽप्युपादानं व्यभिचारित्वेऽपि स्थायिताभिधानार्थम् । तेन,

निर्वेदस्थायिभावाख्यः शान्तोऽपि नवमो रसः ।

यथा—

अहौ वा हारे वा कुसुमशयने वा दृषदि वा
मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
क्वचित् पुण्येऽरण्ये शिव शिव शिवेति प्रलपतः ॥४४॥

[By Utpala; Vairāgyaśataka ?]

इति । एवं ग्लान्यादिव्यभिचारिणां विभावादयोऽन्यतो द्रष्टव्याः । क्रीडानर्तननिधुवनादिश्रमजनिता निष्प्राणता ग्लानिः । वैरिपारुष्यस्वदुर्नयातिरेकादिपर्यालोचनया सन्निकृष्टानिष्टोत्प्रेक्षा शङ्का । परसमुच्छ्रयासहिष्णुत्वमसूया । वयोमदिरादिसम्मोहादानन्दसम्भेदो मदः ।

"उत्तमसत्त्वः प्रहसति नृत्यति गायति च मध्यमप्रकृतिः ।
परुषवचनाभिधायी शेते रोदित्यधमसत्त्वः ॥"

मनसः खेदः श्रमः । क्रियास्वनुत्सहनत्वमालस्यम् । निरोजस्कता चित्तस्य दैन्यम् । द्रव्यापहारादिना चित्तस्य दुर्विकल्पैकशीलता चिन्ता । व्यसनाकर्णनाद् वैचित्त्यं मोहः । संस्कारोद्बोधः स्मृतिः । अननुरूपाचारादिना धाष्ट्र्यभ्रंशो व्रीडा । अविमृश्यकारित्वं चपलता । इष्टलाभादिना समुल्लासो हर्षः । क्रियास्वतिसंभ्रम आवेगः । अप्रतिपत्तिर्जडता । कुलैश्वर्याद्युत्सेको गर्वः । प्रारब्धकार्यवैधुर्यादिना सत्त्वभ्रंशो विषादः । कालक्षेपाक्षमत्वमौत्सुक्यम् । चिन्तालस्यादिना मनस्संमीलनं निद्रा । ग्रहलङ्घनादिना करणविप्लवोऽपस्मारः । निद्रानिबन्धनमिन्द्रियमान्द्यं सुप्तम् । निद्रातो व्युत्थितिर्विबोधः । अधिक्षेपाद्यभिनिविष्टत्वममर्षः । हर्षादिविकारगोपनमवहित्थम् । नृशंसत्वमुग्रता । तत्त्वनिर्धारणं मतिः । धातुक्षोभो व्याधिः विरहामयग्रहादिदोषैरप्रेक्ष पूर्वकारित्वमुन्मादः । अकाण्डाशनिभूकम्पादिजनितं चाकित्यं त्रासः । सन्देहप्रभवो विचारो वितर्कः । त एते स्वनाम्नैव

also (4) Envy, (5) Intoxication, (6) Fatigue, (7) Indolence, (8) Wretchedness, (9) Anxiety, (10) Perplexity, (11) Recollection, (12) Steadiness, (13) Bashfulness, (14) Inconstancy, (15) Joy, (16) Excitement, (17) Stupor, (18) Pride, (19) Depression, (20) Longing, (21) Drowsiness, (22) Epilepsy, (23) Dreaming, (24) Awaking, (25) Resentment, (26) Dissimulation, (27) Violence, (28) Judgment, (29) Sickness, (30) Madness, (31) Death, (32) Fright and (33) Deliberation—these are the thirty-three *Transitory Emotions* which have been reckoned up by names.

The mention of *nirveda*, which ought not to be mentioned first as it is generally inauspicious, is done in order to express its character of a *basic emotion*, even though it is *transitory*. Thus—

35ab. Quietism also is the ninth *rasa* with Detachment as its basic emotion.

For example :

Be it a snake or a necklace, a flowery bed or a slab of stone, a jewel or a lump of earth, a powerful enemy or a friend, a blade of grass or a bevy of women, may I pass my days with an attitude of equal indifference to all, always uttering Śiva, Śiva, Śiva in some sacred forest. 44

निरुक्तकल्पा इत्याह—**समाख्यातास्तु नामभिरिति** ।

इत्थं सस्थायिव्यभिचारिभावं रसाष्टकं काव्यनाट्यसाधारणं विचार्य काव्यैकगोचरं शान्तरसं प्रतुष्टूषुराह – **निर्वेदस्यामङ्गलेत्यादि** । निर्वेदग्लानीति सूत्रे प्रथममुपादानं स्थायिताभिधानार्थं स्थायित्वज्ञापनायेत्यर्थः ।

अहौ वेति । अहिहारसमदृक्तया परिकर्मनैरपेक्ष्यम् । दृषत्कुसुमशयनसमदृक्तया शरीरयात्रानपेक्षा । एवं मणिलोष्टयोः समदृक्ता नैराश्यमाविष्करोति । रिपुसुहृदोस्तु ममकारविरहम् । तृणस्त्रैणयोस्तु समदृक्तया सर्वप्रकारनिस्सारत्वनिर्ज्ञानात् पुरोवस्थितास्वपि स्त्रीषु रथ्यातृणत्वप्रतिपत्तिः । पुण्येऽरण्य इत्यपावननगरादिवासोद्वेग उद्घोष्यते । शिवशिवशिवेति त्रिरावर्तनेन प्रलापान्तरस्यावकाशो निर्लेशमुन्मूल्यते । दिवसा यान्त्वित्यनेन न मे दिवसयापने भरः अपि तु शिवशिवशिवेति प्रलापेन व्यवस्थिते मयि स्वस्वाभाव्याद् दिवसाः कदा यान्तीति कटाक्ष्यते । अत्रानित्यत्वदोषदर्शनात् सर्ववस्तुषु निस्सारत्वपरिच्छित्ति-

रतिर्देवादिविषया व्यभिचारी तथाञ्जितः ॥ ३५ ॥

भावः प्रोक्तः

आदिशब्दान्मुनिगुरुनृपपुत्रादिविषया। कान्ताविषया तु व्यक्ता शृङ्गारः। उदाहरणम्—

कण्ठकोणविनिविष्टमीश ते कालकूटमपि मे महामृतम्।
अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि रोचते न मे ॥४५॥

[By Utpala]

हरत्यघं सम्प्रति हेतुरेष्यतः
शुभस्य पूर्वाचरितैः कृतं शुभैः।
शरीरभाजां भवदीयदर्शनं
व्यनक्ति कालत्रितयेऽपि योग्यताम् ॥४६॥

[Śiśupālavadha, I. 26]

एवमन्यदुदाहार्यम्। व्यभिचारी यथा—

जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया
मा मा संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता पुरः।
नो यावत् परिरुध्य चाटुकशतैराश्वासयामि प्रियां
भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः ॥४७॥

[By Nidrādaridra, acc. to Sūktimuktāvalī]

तत्त्वज्ञानादिकमालम्बनविभावः। पुण्यमरण्यमुद्दीपनविभावः। अहिहारादिसमदृक्त्वं शिवशिवशिवेति प्रलपनं चानुभावः। धृतिमतिस्मृतिहर्षप्रभृतयो व्यभिचारिणः। एभिः शान्तरसाभिव्यक्तिः सहृदयसंवादसुखसाम्राज्यसाक्षिणी समिध्यते।

अथ भावं विवेचयति—**रतिर्देवादीति**। द्विरूपो हि भावः नायिकाव्यतिरिक्ते देव (मुनि) गुरुनृपपुत्रादौ या रतिः सा विभावादिभिरभिव्यञ्जिता सत्येको भावः। ये निर्वेदादयस्त्रयस्त्रिंशद्व्यभिचारिणस्तेऽभिव्यञ्जिता अन्यो भावः। सोऽयं विभागो दर्शितः—**व्यभिचारी तथाञ्जित** इति। देवादिविषया रतिर्व्यञ्जिता भावः। तथा व्यभिचारी च व्यञ्जितो भाव इत्यर्थः।

आदिशब्दसंग्राह्यानर्थान् विभज्योपन्यस्यति — **आदिशब्दान्मुनीत्यादि**। अपोढस्यास्य विषयान्तरत्वं दर्शयति—**कान्ताविषया त्विति**। रतिरित्यनुषज्यते, शृङ्गार इत्यत्र रस इति च। व्यक्तेति अव्यञ्जितताया लौकिकं स्थायित्वमेवेत्यभिप्रैति।

कण्ठकोणेति। कालकूटमपि कण्ठकोणमात्रविनिविष्टमपि भवद्वपुरभिन्नमिति मे महामृतम्। उपात्तममृतमपि भवद्वपुर्भिन्नं चेत् न रोचते इत्यद्वैताभिनिवेशातिशयः। अयं देवताविषयो रतिभावः।

35cd. 36a. Love directed towards the gods etc., and also the suggested Transitory, *are called Emotion* (*Bhāva*).

The word 'etc'. includes the Love towards the sage, the teacher, the king, the son and the like. But the love for the sweetheart, when manifested, becomes the Erotic. To illustrate (the Love for God and the like):

Oh Lord, even deadly poison, being contained in the corner of your throat, is the best ambrosia for me. And even the ambrosia, obtained easily, does not interest me if it keeps itself separate from your person. 45

Your visit suggests the worthiness of the embodied beings in all the three stages of time. It destroys the present evil, is the cause of future prosperity and is caused by the good done in the past. 46

Similarly others may be illustrated. To illustrate the (suggested) Transitory :

Methinks, the beloved, who had turned her back in anger, was seen by me today in dream. "Don't, don't touch me with your hand" saying thus she wept and was trying to go her way. No sooner did I hold her in my embrace and was pacifying her with boundless honeyings than I was robbed of sleep, O brother, by the wicked fate. 47

मुनिविषयमुदाहरति—**हरत्यघमिति** । वर्तमानवृत्तश्लाघ्यतायाः प्रत्यक्षत्वात् प्रथमनिर्देशः—**हरत्यघं सम्प्रतीति** । अनुबन्धतोऽपि भद्रं दर्शयितुमुक्तं—**हेतुरेष्यतः शुभस्येति** । शुभस्येति, नैतदकृतपुण्यैर्लभ्यत इत्याह—**पूर्वाचरितैः कृतं शुभैरिति** । योगमर्हतीति योग्यम् ।

"योगोऽभीष्टार्थसम्प्राप्तिध्यानसङ्गतियुक्तिषु"

इति । दण्डादित्वाद् यः ।

एवमन्यदिति । गुरुनृपपुत्रादिविषयम् । तत्र गुरुविषयो यथा मम—

संसारार्त्या विधुरविधुरो ब्रह्म यत्नाद् विचिन्वन्
नानारूपं जगदिदमहं दृष्टवानेव पूर्वम् ।
हस्ते न्यस्ते सति तव गुरो साम्प्रतं मस्तकेऽस्मिन्
ब्रह्मैवैतत्सकलमभवन्नो जगन्नापि चाहम ॥

अत्र विधिं प्रत्यसूया।

तदाभासा अनौचित्यप्रवर्तिताः ।

तदाभासा रसाभासभावाभासाः । तत्र रसाभासो यथा—

स्तुमः कं वामाक्षि क्षणमपि विना यं न रमसे
विलेभे कः प्राणान् रणमखमुखे यं मृगयसे ।
सुलग्ने को जातः शशिमुखि यमालिङ्गसि बलात्
तपःश्रीः कस्यैषा मदननगरि ध्यायसि तु यम् ।।४८।।

अत्रानेककामुकविषयमभिलाषं तस्याः स्तुम इत्याद्यनुगतं बहुव्यापारोपादानं व्यनक्ति । भावाभासो यथा—

राकासुधाकरमुखी तरलायताक्षी
सा स्मेरयौवनतरङ्गितविभ्रमा स्यात् ।
तत् किं करोमि विदधे कथमत्र मैत्रीं
तत्स्वीकृतिव्यतिकरे क इवाभ्युपायः ।।४९।।

अत्र चिन्ता अनौचित्यप्रवृत्ता । एवमन्येऽप्युदाहार्याः ।

भावस्य शान्तिरुदयः सन्धिः शबलता तथा ।। ३६ ।।

नृपविषयो यथा ममैव—

काष्ठाप्राप्तिरियं परा खलु परीपाकस्य भाग्योन्नतेः
श्रीबल्लालनृपाल यद् वयमिमौ पादौ तवोपास्महे ।
यस्तिष्ठेत् प्रतिहारसीम्नि भवतो रुद्धप्रवेशश्चिरं
किं नासावपि चोलपाण्ड्यपृथिवीपालैः समं गण्यते ।।

अन्यद् ज्ञेयम् ।

अथ व्यभिचारिभावः—**जाने कोपेति** । जाने इतिवाक्योपन्यासे । वाक्यार्थकर्मकमाख्यातं वा ।

विधिं प्रत्यसूयेति । व्यज्यत इति शेषः । विप्रलम्भशृङ्गारस्य स्वप्नवृत्तात्मकस्य प्रबोधेन बाधितत्वाद् व्यभिचारिभावस्येह साम्राज्यम् ।

तदाभासा इति । अनौचित्यप्रवर्तितत्वमाभासभावे हेतुः ।

तच्छब्दपरामर्शनीयं प्रकृतार्थद्वयं दर्शयति—**रसाभासभावाभासा** इति ।

स्तुमः कमिति । यं विना न रमसे तं कं स्तुम इत्यादिषु वाक्येषु नाना-

Here, there is *envy* towards fate.

36b. Their Semblances are caused by impropriety.

'Their Semblances' means the Semblances of *Rasa* (*Rasābhāsa*) and the Semblances of Emotion (*Bhāvābhāsa*). There, the Semblance of Rasa is as follows :

O beautiful eyed one, who is he whom we may propitiate without whom you don't feel happy even for a moment? Who is he who sacrificed his life at the altar of war, the one whom you are seeking ? O moon-faced one, who is he born at an auspicious moment, whom you hold fast in your embrace ? Whose is this wealth of penance, O Capital of Cupid, upon whom you reflect ? 4

Here, the mention of various acts (viz., not to feel happy etc.), followed by the expressions of 'we may propitiate' and the like, suggests her longing for many a lustful man.

To illustrate the Semblance of Emotion :

Her face is like the full moon; her eyes are waving and large; she has a body rippling with the charm of blooming youth. O, what must I do ? How to make friendship with her, and what could be the way to win her acceptance ? 49

Here, *anxiety* arises through impropriety. Thus the other cases may also be illustrated.

36cd. The pacification, the rise, the co-existence and the variegation of emotions—

कामुकविषयो व्यापारोऽस्याः स्तूयत इति रसाभासत्वम् । नानाकामुकोपभोग्यत्वेनाधमप्रकृतितां द्योतयितुं मदननगरीत्युक्तम् । "**उत्तमप्रकृतिरुज्ज्वलवेषात्मक**" इति हि शृङ्गारस्य लक्षणम् । अन्यस्त्वाभास एव ।

राकासुधाकरेति । स्वीकृत्युपायत्वेन मैत्रीमनुचिन्तयतीत्यनौचित्याद् भावाभासता ।

अन्येऽपीति । वीरादयो रसाः भावान्तराणि चाभासत्वेनोदाहर्तव्यानीत्यर्थः ।

क्रमेणोदाहरणम्—

तस्याः सान्द्रविलेपनस्तनयुगप्रश्लेषमुद्राङ्कितं
किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते ।
इत्युक्ते क्व तदित्युदीर्य सहसा तत् सम्प्रमार्ष्टुं मया
साश्लिष्टा रभसेन तत्सुखवशात् तन्व्या च तद् विस्मृतम् ॥५०॥

[Amaruśataka, 26]

अत्र कोपस्य ।

एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया
सद्यः कोपपराङ्मुखग्लपितया चाटूनि कुर्वन्नपि ।
आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणा-
न्मा भूत् सुप्त इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः ॥५१॥

[Amaruśataka, 23]

अत्रौत्सुक्यस्य ।

उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकतः
सत्सङ्गप्रियता च वीररभसोत्फालश्च मां कर्षतः ।
वैदेहीपरिरम्भ एष च मुहुश्चैतन्यमामीलय-
न्नानन्दी हरिचन्दनेन्दुशिशिरस्निग्धो रुणद्ध्यन्यतः ॥५२॥

[Mahāviracarita, II. 22]

अत्रावेगहर्षयोः ।

क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा
दोषाणां प्रशमाय मे श्रुतमहो कोपेऽपि कान्तं मुखम् ।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा
चेतः स्वास्थ्यमुपेहि कः खलु युवा धन्योऽधरं पास्यति ॥५३॥

[Cited in Dhvanyāloka]

अथ भावशान्त्यादयः । **तस्याः सान्द्रेति** । क्व तदिति तत् सम्प्रमार्ष्टुमिति च तच्छब्दाभ्यां विलेपनप्रत्यवमर्शः । तद् विस्मृतमिति तच्छब्देन गोपनं प्रत्यवमृश्यते ।

अत्र कोपस्येति । शान्तिरित्यनुषज्यते ।

एकस्मिन्निति । मा भूदिति मा शय्यायां सुप्तो भूदिति शङ्कित्वा वीक्षित इत्यर्थः ।

अत्रौत्सुक्यस्येति । उदय इत्यनुषज्यते ।

उत्सिक्तस्येति । आवेगः पूर्वार्धे हर्षश्चोत्तरार्धे व्यज्यते । तयोरिह सन्धिः ।

are illustrated in order:

"Why do you conceal, under the pretext of bowing down at my feet, your chest bearing the evident marks of the close embrace of her twin breasts with thick unguent?"—being addressed thus I asked "where is it?" and enfolded her hastily and firmly into my arms to wipe off those marks. Under the influence of this thrill, the slender one, forgot all about it. 50

Here, is the pacification of anger.

At the utterance of the name of a rival beloved, the pretty one, lying on the same bed (with her lover), suddenly turns her back in anger and feels distressed; notwithstanding the sweet honeyings she treats the lover with disrespect in her excitement. However, on his keeping quiet at that moment, she turns her neck suddenly and looks at him, lest he should fall asleep. 51

Here, is the *rise* of longing.

On account of the visit of the proud sage (*Paraśurāma*), the reservoir of prowess and penance, the liking for good company and the sudden outburst of heroism draw me, on the one hand, while on the other, this blissful embrace of Vaidehī, soothing like the coolness of sandal and the moon, benumbing my consciousness, completely holds me back. 52

Here is the *co-existence* of excitement and joy.

How improper is this action and how (pure) is the lunar race!—Would she come within my sight again!—My learning is meant to prevent the evil!—Oh, what a pretty face even in anger! What would the sinless wise men say? She is rare even in dream. O heart, keep poise,—who is that blessed youth who will kiss her? 53

क्वाकार्यमिति । अत्र परिपाट्या वाक्यैर्वितर्कौत्सुक्यादयो व्यज्यमानाः शबलतयावतिष्ठन्ते ।

ननु भावस्य शान्त्यादिदशावत् स्थितिदशापि किं न विचार्यत इत्यत आह—**भावस्थितिरिति ।** भावध्वनिरेव हि भावस्थितिः ।

अत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचिन्तानाम् । भावस्थितिस्तूक्ता चोदाहृता च ।

मुख्ये रसेऽपि तेऽङ्गित्वं प्राप्नुवन्ति कदाचन ।

ते भावशान्त्यादयः । अङ्गित्वं राजानुगतविवाहप्रवृत्तभृत्यवत् ।

अनुस्वानाभसंलक्ष्यक्रमव्यङ्ग्यस्थितिस्तु यः ॥ ३७ ॥

शब्दार्थोभयशक्त्युत्थस्त्रिधा स कथितो ध्वनिः ।

शब्दशक्तिमूलानुरणनरूपव्यङ्ग्यः, अर्थशक्तिमूलानुरणनरूपव्यङ्ग्यः, उभयशक्तिमूलानुरणनरूपव्यङ्ग्यश्चेति त्रिविधः । तत्र—

अलङ्कारोऽथ वस्त्वेव शब्दाद् यत्रावभासते ॥ ३८ ॥

प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा ॥

वस्त्वेवेति अनलङ्कारं वस्तुमात्रम् । आद्यो यथा—

उल्लास्य कालकरवालमहाम्बुवाहं
देवेन येन जरठोर्जितगर्जितेन ।
निर्वापितः सकल एव रणे रिपूणां
धाराजलैस्त्रिजगति ज्वलितः प्रतापः ॥५४॥

ननु रसाङ्गभूतानां भावशान्त्यादीनां कथं पृथग् ध्वनित्वमित्यत आह—**मुख्ये रसेऽपीत्यादि** । कदाचन, न तु सर्वदा । यदैव प्राप्नुवन्त्यङ्गितामेते तदैव ध्वनय इति भावः ।

अङ्गानां सतामपि कदाचिदङ्गित्वं भवतीति दृष्टान्तेन द्रढयति—**राजानुगतविवाहप्रवृत्तेति ।**

एवमसंलक्ष्यक्रमव्यङ्ग्यं सप्रपञ्चं विविच्य संलक्ष्यक्रमव्यङ्ग्यं विवेचयितुमुपक्रमते—**अनुस्वानाभे**त्यादि । अनुस्वानः घण्टाद्यनुरणनं, तत्समकक्ष्यतया संलक्ष्यक्रमा व्यङ्ग्यस्थितिर्यत्र ध्वनौ स शब्दार्थोभयशक्तिमूलतया त्रिधा कथितो ध्वन्याचार्येण ।

तदिदं विभज्य व्याचष्टे—**शब्दशक्तिमूले**त्यादि ।

तत्रेति । त्रिषु ध्वनिषु मध्याच्छब्दशक्तिमूलो निरुच्यत इत्यर्थः ।

अलङ्कारोऽथेति ।

वस्त्वेवेत्येवकारमपोह्य दर्शयति—**अनलङ्कारमिति** । अलङ्कारो विच्छित्तिः । इयत्येव खलु वस्त्वलङ्कारयोर्विभागकक्ष्या—यदा जातिगुणादिकोऽर्थो वैचित्र्य-

Here is the *variegation* of the deliberation, longing, judgment, recollection, misgiving, wretchedness, steadiness and anxiety. The pure state of a *transitory emotion* has already been mentioned (in Kārikā 35cd) and illustrated (in verse 47).

37ab. Notwithstanding the *rasa* being principal sometimes even 'these' (*Bhāvaśānti*, etc.) attain prominence.

(The term) 'these' refers to the pacification of emotion and others. 'Prominence' is in the manner of a servant who in his marriage procession is followed by the king.

37cd, 38ab. But that suggestion, wherein the sequence of the suggested sense resembling the reverberant sound is perceptible, is known to be of three kinds—arising from the power of (i) word, (ii) meaning, and (iii) both.

(i) The suggested sense resembling the reverberant sound and rooted in the power of words, (ii) the suggested sense resembling the reverberating sound and rooted in the power of meaning, and (iii) the suggested sense rooted in both (the word and the meaning)—thus it (viz. *Dhvani*) is three-fold. Of these—

38cd, 39ab. Wherein from a word the poetic figure or a mere fact shines predominantly, that *suggestion*, arising from the power of word, should be known as two-fold.

'Mere fact'—this means an unembellished bare fact. To illustrate the first:

All the flame of the enemies, blazing in the three worlds, has been extinguished in the battle by the stream of water in the form of the edge of the sword by your honour roaring fiercely and brandishing the large clouds namely, the deadly sword. 54

विरहाल्लौकिकभावेन व्यवस्थितस्तदा वस्तुमात्रमुच्यते । तदेव सविच्छित्तिकमलङ्कार इति ।

उल्लास्येति । अत्र विशेषणानां श्लेषमाहात्म्यात् प्राकरणिकाप्राकरणिकोभयार्थप्रतीतिः ।

अत्र वाक्यस्यासम्बन्धार्थाभिधायित्वं मा प्रसाङ्क्षीदित्यप्राकरणिकप्राकरणिकयोरर्थयोरुपमानोपमेयभावः कल्पनीय इति अत्रोपमालङ्कारो व्यङ्ग्यः ।

तिग्मरुचिरप्रतापो विधुरनिशाकृद् विभो मधुरलीलः ।
मतिमानतत्त्ववृत्तिः प्रतिपदपक्षाग्रणीर्विभाति भवान् ॥५५॥

अत्रैकैकस्य पदस्य द्विपदत्वे विरोधाभासः ।

अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद प्रभो ।
अहितः सहितः साधु यशोभिरसतामसि ॥५६॥

अत्रापि विरोधाभासः ।

निरुपादानसम्भारमभित्तावेव तन्वते ।
जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने ॥५७॥

[Nārāyaṇa Bhaṭṭa, Stavacintāmaṇi, 9]

अत्र व्यतिरेकः । अलङ्कार्यस्यापि ब्राह्मणश्रमणन्यायेनालङ्कारता । वस्तुमात्रं यथा—

पन्थिअ ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे ।
उण्णअपओहरं पेक्खिउण जइ वससि ता वससु ॥५८॥

[Gāthāsaptaśatī ?]

अत्रालङ्कारस्य व्यङ्ग्यतां सोपपत्तिकं दर्शयति—**अत्र वाक्यस्येति** । अप्राकरणिकार्थस्य प्राकरणिकार्थानभिसम्बन्धे हि वाक्यस्यासङ्गतार्थता प्रसजेत् तथा मा प्रसाङ्क्षीदित्युपमानोपमेयभावो यस्मादवश्यकल्प्यस्तस्मादुपमालङ्कारो व्यङ्ग्य इत्यर्थः ।

तिग्मरुचिरेति । तिग्मरुचिरप्यप्रताप इति, विधुरप्यनिशाकृदिति, मधुर्वसन्तोऽप्यलीलो लीलारहित इति, मतिमानप्यतत्त्ववृत्तिरतत्त्वार्थवर्तीति, प्रतिपत् प्रथमा तिथिरप्यपक्षाग्रणीः सितासितयोः पक्षयोर ग्रेन वर्तत इति प्रतिवाक्यं विरोध आभासते । तिग्मश्च रुचिरश्च प्रतापो यस्येति, विधुराणां विद्विषां निशामवसानं करोतीति, मधुरलील इति, मतिमानयोस्तत्त्वे वर्तत इति, प्रतिपदं पक्षस्य स्ववर्गस्याग्रणीरित्यविरोधः ।

अमित इति । प्राप्तैर्योग्यैः । अमितोऽपि समित इति, अहितोऽपि सहित इति शब्दतो विरोधाभासः । पूर्वमर्थतः । उत्कर्षैः सम्यगितः, यशोभिः सहितः, असतामहित इत्यविरोधः ।

निरुपादानेति । वर्णरेखाद्युपादानं संभृत्य भित्तौ हि चित्रं तनोति लौकिकश्चित्रकृत् । अयं तु शक्तिमायादिकमुपादनत्वेनासम्भृत्यैव जगच्चित्रमभित्तावेव

Here, the relation of similarity between relevant and irrelevant objects is presumed so that the sentence may not express an irrelevant meaning. Thus here the suggested sense is the poetic figure, Simile.

O Lord, you have the pungent and pleasant glow; you put an end to the enemies; sweet are your actions; seeing inclined for the good things of the mind and intellect, and always leader of your camp, you are shining conspicuously. 55

Here is the *virodhābhāsa* (Semblance of Contradiction—a poetic figure), on breaking each phrase into two words.

O Lord, the dispenser of delight, you are great on account of the merits achieved in war; attended by noble glory, you are an enemy of the wicked. 56

Here again is the *virodhābhāsa* (Semblance of Contradiction).

Salutations to Him, the Holder of Trident (Śiva), and venerable through His art (powers), who paints the world-picture even without canvas and the aid of materials. 57

Here the *vyatireka* (Comparative Excellence) is suggested. The embellished is also (spoken as) embellishment in the manner of a Brāhmaṇa-mendicant. To illustrate (the suggestion of) mere fact :

O traveller, there is no lodge here, in this village of stony land; but seeing the lofty clouds (—the projected breasts) if you wish to stay, then do stay. 58

चिद्दर्पणप्रतिफलिततया वितनोति । अद्वयदर्शने हि न शक्त्यादिकमुपादानं पृथगस्ति, अपि तु शिव एव तत्तन्नाम्ना कारणतां प्रतिपद्यते । अत्र व्यतिरेकालङ्कारो व्यङ्ग्यः ।

ननु व्यज्यमानदशायामलङ्कार्यं एव, कथमसावलङ्कार इत्यत आह—**अलङ्कार्यस्यापीति** । श्रमणत्वनिष्पत्तौ हि अवसितमेव ब्राह्मण्यम्, अथापि भूतपूर्वगत्या भवति व्यपदेशो ब्राह्मणश्रमणोऽयमिति । इयमेव नीतिरलङ्कारध्वनावपि ।

अथ वस्तुमात्रध्वनिरुदाह्रियते—**पन्थीति** ।

पथिक नात्र संस्तरोऽस्ति मनाक् प्रस्तरस्थले ग्रामे ।
उन्नतं पयोधरं प्रेक्ष्य यदि वससि तद् वस ॥

अत्र यद्युपभोगक्षमोऽसि तदास्स्वेति व्यज्यते ।

शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वम् ।
यत्र प्रसीदसि पुनः स भात्युदारोऽनुदारश्च ।।५६।।

अत्र विरुद्धावपि त्वदनुवर्तनार्थमेकं कार्यं कुरुत इति ध्वन्यते ।

अर्थशक्त्युद्‌भवोऽप्यर्थो व्यञ्जकः सम्भवी स्वतः ।।३९।।
प्रौढोक्तिमात्रनिष्पन्नः कवेस्तेनोम्भितस्य वा
वस्तु वालङ्‌कृतिर्वेति षड्‌भेदोऽसौ व्यनक्ति यत् ।।४०।।
वस्त्वलङ्कारमथवा तेनायं द्वादशात्मकः ।

स्वतः सम्भवी न केवलं भणितिमात्रनिष्पन्नः, यावद् बहिरप्यौचित्येन सम्भाव्यमानः, कविना प्रतिभामात्रेण बहिरसन्नपि निर्मितः कविनिबद्धेन वा वक्त्रेति द्विविधोऽपर इति त्रिविधः। वस्तु वालङ्कारो वासाविति षोढा व्यञ्जकः। तस्य च वस्तु वालङ्कारो वा व्यङ्ग्य इति द्वादशभेदोऽर्थशक्त्युद्भवो ध्वनिः।

संस्तरः तृणादितल्पम् । अत्र किं संस्तरान्वेषणेन गजकुम्भकल्पावुन्नतौ स्तनौ यद्युपभोक्तुं क्षमोऽसि तदास्स्वेति वस्तु व्यज्यते ।

शनिरशनिरिति । अशनिर्वज्रम् ।

शन्यशन्योर्वस्त्वन्तरत्वान्न विरोधालङ्कारता, अपि तु वस्तुकोटिप्रवेश एवेत्याह—**अत्र विरुद्धावपीति**। उदारोऽनुदार इत्यत्र तु विरोधालङ्कार एवेति न तदिहोदाहरणम् ।।

अथार्थशक्तिमूलं प्रस्तौति—**अर्थशक्तीति** । उम्भितस्य निबद्धस्य । अयमर्थशक्तिमूलो व्यञ्जकवैचित्र्याद् व्यङ्ग्यवैचित्र्याच्च प्रतिस्वं षोढा भवन् द्वादशविधो भवति । अत्र व्यञ्जकोऽर्थः स्वतः सम्भवी, कविप्रौढोक्तिमात्रनिष्पन्नः, कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नश्चेति त्रिविधः सन् प्रत्येकं वस्तुरूपोऽलङ्काररूपश्चेति षड्भेदः । षड्विधस्यापि च व्यङ्ग्यार्थो वस्तुरूपोऽलङ्काररूपश्चेत्यस्य द्वादशात्मकता ।

Here, if you have strength to enjoy then you do stay—this is suggested.

O king, Saturn and the thunder kill him fiercely with whom you are angry. But the one, with whom you are pleased, shines lofty and is obeyed by his wife. 59

Here, even the contradictories work unitedly to please you—this is suggested.

39cd, 40; 41ab. The suggestive sense arising from the power of meaning is (i) self-possible, (ii) established by the poet's imaginative expression alone or (iii) established *by the* hyperbolic expression of the character portrayed by him (i.e., the poet). It becomes sixfold as each of these is either a fact or a figure. And that each of these six suggests either a fact or a figure; hence this (suggestion arising from the power of meaning) is of twelve kinds.

(i) 'Self-possible' signifies that it should not be merely brought about by the (poet's imaginative) expression alone but that it should be known to exist independently in its own right.

(ii-iii) The other one (i.e., *kavipraudhoktisiddha*), being independently non-existent and being a creation of the poet's pure imagination or of the character portrayed by him, is two-fold. Thus it (the suggester, including the self-possible and the two kinds of *kavinibaddha*) is of three kinds. And each of these (kinds) is either a fact or a figure; hence, the suggester is six-fold. The suggested sense of this (suggester) is either a fact or a figure, thus the suggestion (i.e., the suggested sense) arising from the power of meaning is of twelve kinds.

तदेतद् व्याचष्टे—**स्वतः सम्भवी न केवलमित्यादिना** । **बहिरपीति** । लोक इत्यर्थः । कविप्रौढोक्तिमात्रनिष्पन्नं विवेचयति—**कविना प्रतिभामात्रेणेति** । तृतीयं विवेचयति—**कविनिबद्धेन वेति** । **वक्त्रेति** । निर्मित इत्यनुषज्यते अपरः स्वतस्सम्भविनोऽन्यः । असाविति त्रिविधस्य परामर्शः । अथ व्यङ्ग्यवैचित्र्यं दर्शयति—**तस्य च वस्तु वालङ्कारो वेति** ।

क्रमेणोदाहरणम्—

अरससिरोमणि धुत्ताण अग्गिमो पुत्ति धणसमिद्धिमओ ।
इअ भणिएण णअङ्गी पप्फुल्लविलोअणा जाआ ॥६०॥

अत्र ममैवोपभोग्य इति वस्तुना वस्तु व्यज्यते ।

धन्यासि या कथयसि प्रियसङ्गमेऽपि
विस्रब्धचाटुकशतानि रतान्तरेषु ।
नीवीं प्रति प्रणिहितश्च करः प्रियेण
सख्यः शपामि यदि किञ्चिदपि स्मरामि ॥६१॥

[Vijjākā, acc. to Sūktimuktāvalī]

अत्र त्वमधन्या अहं धन्येति व्यतिरेकालङ्कारः ।

दर्पान्धगन्धगजकुम्भकवाटकूट-
सङ्क्रान्तिनिघ्नघनशोणितशोणशोचिः ।
वीरैर्व्यलोकि युधि कोपकषायकान्तिः
कालीकटाक्ष इव यस्य करे कृपाणः ॥६२॥

अत्रोपमालङ्कारेण सकलरिपुक्षयः क्षणात् करिष्यत इति वस्तु ।

गाढकान्तदशनक्षतव्यथासङ्कटादरिवधूजनस्य यः ।
ओष्ठविद्रुमदलान्यमोचयन्निर्दशन् युधि रुषा निजाधरम् ॥६३॥

अत्र विरोधालङ्कारेणाधरनिर्दशनसमकालमेव शत्रवो व्यापादिता इति तुल्ययोगिता, मम क्षत्याप्यन्यस्य क्षतिर्निवर्ततामिति तद्बुद्धिरुत्प्रेक्ष्यत इत्युत्प्रेक्षा च । एषूदाहरणेषु स्वतस्सम्भवी व्यञ्जकः ।

अरससिरोमणीति ।

अरसशिरोमणिर्धूर्तानामग्रिमः पुत्रि धनसमृद्धिमयः ।
इति भणितेन नताङ्गी प्रफुल्लविलोचना जाता ॥

भणितेनेति तृतीया प्रफुल्ललोचनतायां हेतुः । अत्र प्रचुरधनसमृद्धिकस्य यूनो नीरसत्वधूर्तमूर्धन्यत्वश्रवणेन यदेतन्नयनविकासलक्षणं वस्तु तेन स्वतस्सम्भविना ममैवोपभोग्य इति वस्तु व्यज्यते ।

धन्यासीति । रतान्तरेषु जातानि विस्रब्धचाटुकशतानीत्यर्थः । तेषां कथनं धन्यत्वे हेतुः । नीवीं प्रति करप्रणिधानमात्रेण यदेतत् सर्ववृत्तान्तविस्मरणं ततोऽहमधन्येति वाच्यकक्ष्यायां प्रतीतिः ।

व्यङ्ग्यप्रतीतिस्तु तद्विलक्षणेत्याह—**अत्र त्वमधन्येत्यादिना** । अत्र स्वतस्सम्भविना वस्तुनालङ्कारः ।

दर्पान्धेति । कुम्भकवाटकूटे संक्रान्तिः सम्मूर्छना तन्निघ्नेन तद्वशादुदञ्चितेन घनेन स्त्यानेन शोणितेन शोणशोचिरित्यर्थः ।

Examples in order :

"He is a crest-jewel of the indolent, foremost among the artful and O daughter, he is immensely opulent"—this remark turned the slender-bodied one blooming in her eyes. 60

Here, the fact suggested by the fact is 'he is fit to be enjoyed by me alone.'

Blessed thou art who described (to us) the hundreds of secret honeyings poured in the intervals of cohabitation with your lover. But by God, O friends, I remember nothing, once my lover laid his hand on the knot of my garment. 61

Here, you are not blessed, I am blessed—this Comparative Excellence (*vyatireka*—a poetic figure) is suggested by the fact.

In whose hand the sword, which resembled Kālī's side-long glance reddened with the anger, and which was coloured red with thick blood on striking at the hard tip of the portuberance of the scent-elephants blinded through intoxcation. 62

Here the fact that 'he will destroy all the enemies in a moment's time' is suggested by the poetic figure, *upamā*.

Biting his own lower-lip with anger in the battle, he delivered the coral bits in the form of lips of the enemies' wives from the danger of the pain caused by the deep wounds caused by the teeth of their husbands. 63

Here, by the figure *virodha* (Contradiction), 'the enemies were killed as soon as the lips were bitten' such a figurative sense of *tulya-yogitā* (Equal Pairing), is suggested; "May my wound remove the wounds of others", such an idea of the king is fancied; so it is a case of *utprekṣā* (Fancy) also. In the above examples the suggester is self-possible.

उपमालङ्कारेण कालीकटाक्ष इवेत्येवंरूपेण। क्षणात् करिष्यत इति सद्यः सकलजगदुपसंहारकारिकालीकटाक्षसाधर्म्यात् संहारस्याविलम्बत्वप्रतीतिः। अत्र स्वतस्सम्भविनालङ्कारेण वस्तु।

गाढकान्तेति। निजाधरं निर्दशन् अरिवधूजनस्याधरान् कान्तदशनक्षत-दुःखादमोचयदिति विरोधाभासः। समकालमित्यनेन निर्दशन्निति लडर्थं उद्घाटितः। अधरनिर्दशनमोचनेनासां भर्तृव्यापादनं व्यञ्जितम्। अलङ्कारान्तरमपि व्यज्यत इत्याह—**मम क्षत्येत्यादि**। तद्बुद्धिरिति तच्छब्देन वर्ण्यनायकाधर-प्रत्यवमर्शः। अत्र स्वतस्सम्भविनालङ्कारेणालङ्कारः। स्वतस्सम्भविनस्ता-वन्निगमयति—**एषूदाहरणेष्विति**।

कैलासस्य प्रथमशिखरे वेणुसम्मूर्छनाभिः
श्रुत्वा कीर्ति विबुधरमणीगीयमानां यदीयाम् ।
त्रस्तापाङ्गाः सरसबिसिनीकाण्डसञ्जातशङ्का
दिङ्मातङ्गाः श्रवणपुलिने हस्तमावर्तयन्ति ।।६४।।

अत्र वस्तुना येषामप्यर्थावगमो नास्ति, तेषामप्येवमादिबुद्धिजननेन चमत्कारं करोति त्वत्कीर्त्तिरिति वस्तु ध्वन्यते ।

केसेसु बलामोडिअ तेण अ समरम्मि जअसिरी गहिआ ।
जह कन्दराहि विहुरा तस्स दढं कण्ठअम्मि संठविआ ।।६५।।

अत्र केशग्रहावलोकनोद्दीपितमदना इव कन्दरास्तद्विधुरान् कण्ठेऽगृह्णन्नित्युत्प्रेक्षा, एकत्र सङ्ग्रामे विजयदर्शनात् तस्यारयः पलाय्य गुहासु तिष्ठन्तीति काव्यहेतुः न पलाय्य गतास्तद्वैरिणः अपि तु ततः पराभवं सम्भाव्य तान् कन्दरा न त्यजन्तीत्यपह्नुतिश्च ।

गाढालिङ्गणरहसुज्जअम्मि दइए लहुं समोसरइ ।
माणंसिणीए माणो पेल्लणभीओ व्व हिअआहि ।।६६।।

अत्रोत्प्रेक्षया प्रत्यालिङ्गनादि तत्र विजृम्भत इति वस्तु ।

जा थेरं व हसन्ती कइवअणम्बुरुहबद्धविणिवेसा ।
दावेइ भुवणमण्डलमण्णं च्चिअ जअइ सा वाणी ।।६७।।

कैलासस्येति । प्रथमशिखर इति दिङ्मातङ्गनेदिष्ठता सूचिता । वेणुशब्देन वेणुवादो लक्ष्यते । सम्मूर्छना सम्भेदः । तानकल्पवेणुनादसम्मूर्छनोपलक्षिततया गीयमानामित्यर्थः । त्रस्तापाङ्गाः कर्णजाहाभिमुखोच्चलितकटाक्षाः । तथा कटाक्षक्षेपेण श्रुता कीर्त्तिः कर्णपरिसरे धवलोज्ज्वला दृष्टेति सिद्धवत्कृत्याह—**सरसबिसिनीकाण्डसञ्जातशङ्का** इति । श्रवणपुलिन इति श्रवणस्य पुलिनत्वेन रूपणं शङ्कितबिसिनीकाण्डयोगात् । हस्तमावर्तयन्तीति । जातिस्वाभाव्यान्मृणालगृध्नुतैषामाविष्कृता । अत्र परिपाण्डुकीर्त्तिसन्दर्शनादिना कविप्रौढोक्तिमात्रनिष्पादितेन वस्तुना तिरश्चामप्येवंबुद्धिजननेन चमत्कारकारिणी कीर्त्तिरिति वस्तु ।

केसेसु बलेति ।

केशेषु बलात्कारेण तेन (च) समरे जयश्रीर्गृहीता ।
यथा कन्दराभिर्विधुरास्तस्य दृढं कण्ठे संस्थापिताः ।।

समरे जयश्रीस्तेन तथा केशेषु गृहीता, यथा विद्विषो गिरिकन्दराभिः कण्ठे इति।

अत्र केशग्रहेति उद्दीपितमदनत्वे हेतुः। **एकत्रेति**। इतरथा कन्दरा सम्बन्धासम्भवात् । काव्यहेतुः काव्यलिङ्गालङ्कारः ।

Having heard his glory sung in the melody of the flute by the celestial damsels on the high peak of Kailāsa, the (guarding) elephants of the quarters, casting the corners of their eyes, mistake it (owing to the whiteness of the glory) for the stem of the succulent lotus-plant and hence toss their trunks near their ears. 64

Here, the fact that your glory produces wonder by creating such an idea (i.e., it is the stem of lotus-plant) even in those (beasts) who cannot understand or appreciate the content (the song or its meaning)—is suggested by the *fact* under description.

The goddess of victory was so forcefully seized by hair by him (i.e., king) in the battle just as his enemies were firmly held by the neck by the caves. 65

Here, 'the caves, who had as if their lust aroused by seeing the seizure by hair, hold the necks of his enemies'—thus the Fancy; 'his enemies, having witnessed in one place his victory in the battle, ran away and (now) take shelter in the caves'—thus the poetic Reason (*Hetu*); and 'his enemies did not run away but fearing defeat from him, the caves don't leave them'—thus *Apahnuti* (Concealment) are suggested.

The lover moves for a close and eager embrace and the anger of the proud woman quickly disappears, as though being afraid of torture (in embrace). 66

Here, the *fact* that 'the embrace in return and the like ensued forth' is suggested by the Fancy (*utprekṣā*).

Supreme is that speech which seated in the lotus-like mouth of the poet, and laughing at the aged creator, as it were, exhibits a novel creation. 67

गाढालिङ्गणेति ।

गाढालिङ्गनरभसोद्यते दयिते लघु समपसरति ।
मनस्विन्या मानः प्रेरणभीत इव हृदयात् ॥

अत्र कविप्रौढोक्तिनिष्पादितेनोत्प्रेक्षालङ्कारेण मानप्रेरणसूचितं प्रत्यालिङ्गनादि वस्तु ।

जा थेरं वेति ।

या स्थविरमिव हसन्ती कविवदनाम्बुरुहबद्धविनिवेशा ।
दर्शयति भुवनमण्डलमन्यदेव जयति सा वाणी ॥

स्थविरो ब्रह्मा । हसन्तीवेतीवशब्दो भिन्नक्रमः ।

अत्रोत्प्रेक्षया चमत्कारैककारणं नवं नवं जगद् अजरठाब्जासनस्था निर्मिमीत इति व्यतिरेकः । एषु कविप्रौढोक्तिमात्रनिष्पन्नः ।

जे लङ्कागिरिमेहलाहि चलिआ सम्भोअखिण्णोरई-
फारुप्फुल्लफणावलीकवलणा पत्ता दरिद्दत्तणं ।
ते एह्णि मलआणिला विरहिणीणीसाससम्पक्किणो
जादा झत्ति सिसुत्तणे वि बहला तारुण्णपुण्णा विअ ॥६८॥

[Karpūramañjarī, I. 20]

अत्र निःश्वासैः प्राप्तैश्वर्याः किं किं न कुर्वत इति वस्तुना वस्तु व्यज्यते ।

सहि विरइऊण माणस्स मज्झ धीरत्तणेण ओआसं ।
पिअदंसणवीहल्लं खणे खणे झत्ति तेण ओसरिअं ॥६९॥

अत्र वस्तुनाकृतेऽपि प्रार्थने प्रसन्नेति विभावना, नूनं प्रियदर्शनस्य सौभाग्यबलं धैर्येण सोढुं न शक्यत इत्युत्प्रेक्षा च ।

ओल्लोल्लकरअरअणक्खएहि तुह लोअणेसु मह दिण्णो ।
रत्तंसुअप्पसादो कोवेण पुणो इमे ण अक्कमिआ ॥७०॥

अत्रोत्प्रेक्षयेति । उत्प्रेक्षया कविप्रौढोक्तिकल्पितया हसन्तीवेति हासक्रियासम्भावनरूपयेत्यर्थः । चमत्कारैककारणं नवं नवमित्यन्यदेवेति पदस्य तात्पर्योद्घाटनम् । अजरठाब्जासनस्थेति कविवदनाम्बुरुहेत्यस्य विवृतिः । स्थविरासनाम्बुजं हि जरठम् । चतुष्टयमिदमुपसंहर्तुमाह—एषु कविप्रौढेति ।

जे लङ्कागिरीति ।

ये लङ्कागिरिमेखलातश्चलिताः सम्भोगखिन्नोरगी-
स्फारोत्फुल्लफणावलीकवलनात् प्राप्ता दरिद्रत्वम् ।
त इदानीं मलयानिला विरहिणीनिःश्वाससम्पर्किणो
जाता झटिति शिशुत्वेऽपि बहलास्तारुण्यपूर्णा इव ॥

अत्र व्यञ्जकं वस्तु कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नम् ।

सहिविरइउणेति ।

सखि विरच्य मानस्य मम धीरत्वेनावकाशम् ।
प्रियदर्शनविह्वलं क्षणे क्षणे झटिति तेनापसृतम् ॥

मम धैर्यं मानस्यावकाशं विरच्य प्रिये दृष्टे सति स्वयं वैह्वल्येन पलायिष्टेत्यर्थः ।

Here, by Fancy is suggested *Vyatireka* (Comparative Excellence) that 'the poet's speech being seated on sentient seat creates an ever new world, which is the sole cause of charming delight'. In the above examples the suggester is brought about by poet's imaginative expression alone.

The same breeze from Malaya, which tumbled down on the slopes of Hemakūṭa mountain and which acquired thinness due to its being swallowed up (i.e., by inhaling) by the large and well expanded hoods of female serpents exhausted in enjoyment, has now become suddenly strong, even though new-born it looks as if full of youth due to contact with the strong breaths of women in separation. 68

Here, 'what not the *breeze*, made strong by the sighs, will do ?' this *fact* is suggested by another *fact* (i.e., matter under description).

O friend, the firm resolve sustained the resentment (against the lover), but it suddenly disappeared at the exciting moment of my lover's sight. 69

Here, 'she is pleased without any entreaties by the lover'—this figurative sense of abnormal *causation* (*Vibhāvanā*) and 'the power of the good fortune of lover's sight can't be withstood by firm resolve'—this *fancy* are suggested by (a bare) fact.

By fresh marks from nails and teeth on your body has been given this present of red dress to my eyes; and these are not assailed by anger. 70

अत्र वस्तुनेति । वस्तुना मानपलायनरूपेण । प्रियदर्शनस्येति । अत्रापि मानपलायनमेव वस्तु व्यञ्जकम् ।

ओल्लोल्लेति ।

आर्द्रार्द्रकरजरदनक्षतैस्तव लोचनयोर्मम दत्तः ।

रक्तांशुकप्रसादः कोपेन पुनरेते नाक्रान्ते ॥

तव यान्येतान्यार्द्रतराणि करजरदनक्षतानि तैर्मम लोचनाभ्यां रक्तांशुकं प्रसादत्वेन दत्तम् । तत्परिधानवशादेवानयोरारुण्यं न पुनः कोपेनाक्रान्ते । इह रक्तांशुरित्यपि विवक्षितम् ।

अत्र किमिति लोचने कुपिते वहसि इत्युत्तरालङ्कारेण न केवलमार्द्रनख-क्षतानि गोपायसि यावत् तेषामहं प्रसादपात्रं जातेति वस्तु ।

महिलासहस्सभरिए तुह हिअए सुहअ सा अमाअन्ती ।
दिअहं अणण्णअम्मा अङ्गं तणुअं पि तणुएइ ॥७१॥

[Gāthāsaptaśatī, II. 82]

अत्र हेत्वलङ्कारेण तनोस्तनूकरणेऽपि तव हृदये न वर्तत इति विशेषोक्तिः । एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरो व्यञ्जकः । एवं द्वादश भेदाः ।

शब्दार्थोभयभूरेकः

यथा—

अतन्द्रचन्द्राभरणा समुद्दीपितमन्मथा ।
तारकातरला श्यामा सानन्दं न करोति कम् ॥७२॥

अत्रोपमा व्यङ्ग्या ।

भेदा अष्टादशास्य तत् ॥ ४१ ॥

अस्येति ध्वनेः ।

ननु रसादीनां बहुभेदत्वे कथमष्टादशैव भेदा इत्यत आह—

रसादीनामनन्तत्वाद् भेद एको हि गण्यते ।

महिलेति ।

महिलासहस्रभरिते तव हृदये सुभग सा अमान्ती ।
दिवसमनन्यकर्मा अङ्गं तन्वपि तनयति ॥

हेत्वलङ्कारेणेति । यतो न मान्ती, अतस्तनयतीत्येवंरूपेण । अर्थशक्तिमूलमुपसंहरति—**एवं द्वादशभेदा** इति । स्वतस्सम्भविना वस्तुना वस्तु, स्वतस्सम्भविना वस्तुनालङ्कारः, स्वतस्सम्भविनालङ्कारेण वस्तु, स्वतस्सम्भविनालङ्कारेणालङ्कार इति चत्वारः । अनयैव प्रक्रियया कविप्रौढोक्तिनिष्पन्नेन वस्तुना वस्त्वित्यादयश्चत्वारः, कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नेन वस्तुना वस्त्वित्यादिकाश्चत्वार इति द्वादशभेदता ।

अथोभयशक्तिमूल एक एवोदाह्रियते—**अतन्द्रचन्द्रेति** । चन्द्रः शिरोभूषणविशेषः इन्दुश्च । तारका कनीनिका नक्षत्रं च । श्यामा यौवनमध्यस्था निशा च । अत्रातन्द्रेत्यादावनेकार्थत्वाच्छब्दशक्तिमूलता, समुद्दीपितमन्मथेत्यादौ त्वर्थशक्तिमूलता प्राधान्येन प्रतीयत इत्युभयशक्तिमूलोऽयम् ।

तानिमान् समष्टिभूतान् भेदान् राशीकृत्य संचष्टे—**भेदा अष्टादशेति ।**

Here, 'why do you have angry eyes'—this figurative sense of *uttara* (reply) suggests the fact—you are not only concealing the fresh marks from nails and teeth, but that I have also become worthy of their kind favour.

O fortunate one, being, as it were, unable to get a place in your heart filled with thousands of women, she is devoting herself, without any other preoccupation for the day to make her pretty thin limbs thinner. 71

Here, by the figure *Hetu* (reason) is suggested the *Viśeṣokti* (Peculiar allegation) in that "even on thinning her body, she does not find a place in your heart".

In the above examples the suggester is effected only by the imaginative expression of the character portrayed by the poet. Thus, twelve are the kinds (of the suggestion arising from the power of meaning).

41c. That arising from both word and meaning is only one.

For example :

Whom delights not a beautiful maiden (dark night), who bears the bright moon-shaped ornament on her head (who is adorned with clear moon), and who is kindled with love (who kindles love) and whose eyeballs are tremulous (with twinkling stars) ? 72

Here the simile is suggested.

41d. Thus there are eighteen kinds of this.

'Of this' means of the suggestion.

How can the divisions be eighteen (only) when *rasa*, etc. have many varieties ? To this the author replies :

42ab. Owing to the countlessness of *rasa*, etc. one variety alone is taken.

अस्येति सर्वनाम्ना सन्निहितस्योभयशक्तिमूलस्य परामर्शभ्रमो मा भूदित्याह—**अस्येति ध्वनेरिति** । अविवक्षितवाच्योऽपि अर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विरूपः, विवक्षितान्यपरवाच्यस्त्वर्थशक्तिमूलो रसादिरसंलक्ष्यक्रम एकः, संलक्ष्यक्रमस्तु शब्दशक्तिमूलोऽलङ्कारध्वनिर्वस्तुध्वनिश्चेत्युभयविधः, अर्थशक्तिमूलस्तु द्वादशात्मा, उभयशक्तिमूलस्त्वेक इति अष्टादश भेदाः ।

अनन्तत्वादिति। तथा हि—नव रसाः। तत्र शृङ्गारस्य द्वौ भेदौ सम्भोगो विप्रलम्भश्च, तत्र सम्भोगस्यापि परस्परदर्शनालिङ्गनपरिचुम्बनकुसुमोच्चयजलकेलिसूर्यास्तमयचन्द्रोदयर्तुवर्णनादयो बहवो भेदाः, विप्रलम्भस्याभिलाषादय उक्ताः, तयोरपि विभावानुभावव्यभिचारिवैचित्र्यं, तत्रापि नायकयोरुत्तमाधममध्यमप्रकृतित्वं, तत्रापि देशकालावस्थाभेद इत्येकस्यैव रसस्यानन्त्यं, का गणना सर्वेषाम्। असंलक्ष्यक्रमत्वं तु सामान्यमाश्रित्य रसादिध्वनिरेकभेद एव गण्यते।

वाक्ये द्व्युत्थः

द्व्युत्थ इति शब्दार्थोभयशक्तिमूलः।

पदेऽप्यन्ये।

अपिशब्दाद् वाक्ये। एकावयवस्थितेन भूषणेन कामिनीव पदद्योत्येन व्यङ्ग्येन वाक्यद्योत्यापि भारती भासते। तत्र पदप्रकाश्ये क्रमेणोदाहरणम्—

यस्य मित्राणि मित्राणि शत्रवः शत्रवस्तथा।

अनुकम्प्योऽनुकम्प्यश्च स जातः स च जीवति ॥७३॥

अत्र द्वितीयमित्रादिशब्दा आश्वस्तत्वनिर्यन्त्रणत्वस्नेहपात्रत्वादिसंक्रमितवाच्याः।

एषूभयशक्तिमूलो वाक्यैकप्रकाश्य इत्याह—**वाक्ये द्व्युत्थ** इति।

अन्यत् सप्तदशकं पदप्रकाश्यतयापि सम्भवतीत्याह—**पदेऽप्यन्य** इति।

अपिशब्दस्योक्तसमुच्चयपरतां दर्शयति—**अपिशब्दाद् वाक्य** इति। एते समनन्तरमुदाहृताः। पदप्रकाश्यास्तूदाहरिष्यन्ते। नन्वेकपदद्योत्येन व्यङ्ग्येन कियती शोभा भवतीत्यत आह—**एकावयवस्थितेनेत्यादि। वाक्यद्योत्यापीति।** यथा हि सर्वालङ्कारपरिष्कर्तव्यापि कामिनी एकेनैवैकावलीप्रमुखेन भूषणेन भूयसा भासते, तथा वाक्यप्रकाश्यापि भारती पदप्रकाश्येन व्यङ्ग्येन। क्रमात् पदप्रकाश्यानुदाजिहीर्षुराह—**तत्र पदप्रकाश्य** इति।

यस्य मित्राणीति। वाक्यत्रयेऽपि स्थिरप्रकृतित्वमस्य व्यज्यते। चतुर्थपादवाक्यद्वयेन त्वन्यवैलक्षण्येन धन्यता।

आश्वस्तेति। अत्र द्वितीयमित्रशब्दस्य व्यङ्ग्यम्। आदिशब्देनानाश्वस्तत्वादि द्वितीयशत्रुशब्दस्य। अवश्यरक्ष्यत्वसर्वप्रकारनिरपराधत्वादयस्तु द्वितीयानुकम्प्यशब्दस्य। इह मित्रादिशब्दाः प्रत्येकमुदाहरणं, प्रतिस्वं वाक्यपरिपूर्तेः। अतः पदप्रकाश्यत्वेनोदाहृतम्।

'Owing to the countlessness'—For example nine are the *rasas*; of these the erotic has two kinds, viz., union and separation; union again has many kinds such as the mutual glance, embrace, kissing and the like, plucking of flowers, sports in water, descriptions of sunset, moon-rise, six seasons and the like. Of love in separation also the longing etc. (i.e., five kinds) have been already mentioned. Of these two (i.e., union and separation in love) again there is manifoldness due to diversity of *determinants* (*Vibhāva*), *ensuants* and *transitories*; there also the types of hero and heroine are superior, middling and inferior; again there is the diversity of place, time and situation. Thus of a single *rasa* alone there is an infinite number; what then of others ? But the suggestion of *rasa*; etc. is counted as only one kind on the basis of general characteristic, namely, non-perceptibility of the sequence.

42c. *Suggestion* arising from both is in a sentence (only).

'Arising from both' means based on the power of both, word and meaning.

42c. The others (i.e., the remaining seventeen divisions) belong to word also.

The term 'also' refers to 'in a sentence as well'. Just as a beautiful woman shines by an ornament put on any part of the body so also speech, though suggested by a sentence, shines through the suggested sense manifested by a word.

There, the illustrations of suggestibility by words are in order:

He alone is (really) born and lives whose friends remain friends, enemies enemies and favoured favoured. 73

Here, the second words, friends etc., have their expressed meanings transferred (respectively) of that of being worthy of protection, punishment and favour.

खलववहारा दीसन्ति दारुणा जइवि तहवि धीराणं ।
हिअअवअस्सबहुमआ णहु ववसाआ विमुज्झन्ति ॥७४॥

अत्र विमुह्यन्तीति ।

लावण्यं तदसौ कान्तिस्तद्रूपं स वचःक्रमः ।
तदा सुधास्पदमभूदधुना तु ज्वरो महान् ॥७५॥

अत्र तदादिपदैरनुभवैकगोचरा अर्थाः प्रकाश्यन्ते । यथा वा—

मुग्धे मुग्धतयैव नेतुमखिलः कालः किमारभ्यते
मानं धत्स्व धृतिं बधान ऋजुतां दूरे कुरु प्रेयसि ।
सख्यैवं प्रतिबोधिता प्रतिवचस्तामाह भीतानना
नीचैः शंस हृदि स्थितो हि ननु मे प्राणेश्वरः श्रोष्यति ॥७६॥

[Amaruśataka, 70]

अत्र भीताननेति । एतेन हि नीचैः शंसनविधानस्य युक्तता गम्यते । भावादीनां पदप्रकाश्यत्वेऽधिकं न वैचित्र्यमिति न तदुदाह्रियते ।

रुधिरविसरप्रसाधितकरालकरवालरुचिरभुजपरिघः ।
विकटभ्रुकुटिविटङ्कितललाटपट्टो विभाति नृपभीमः ॥७७॥

अत्र भीषणस्य राज्ञो भीमसेन उपमानम् ।

भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः ।
कस्य नानन्दनिष्यन्दं विदधाति सदागमः ॥७८॥

खलववहारेति ।

खलव्यवहारा दृश्यन्ते दारुणा यद्यपि तथापि धीराणाम् ।
हृदयवयस्यबहुमता न खलु व्यवसाया विमुह्यन्ति ॥

धीरेषु व्यवस्यत्सु खलानां व्यवहारा यद्यपि तद्व्यवसायदूषणपरतया लोके वर्धन्ते तथापि तेषां ते व्यवसाया न विमुह्यन्ति न व्याकुलीभवन्ति । अविमोहेन फलादप्रच्यावो व्यज्यते । दारुणं खलेषु दूषयत्स्वपि स्वेन हृदयेन वयस्यैश्च बहुमतत्वमविमोहने हेतुः ।

अत्र पदप्रकाश्यमत्यन्ततिरस्कृतवाच्यं दर्शयति—**अत्र विमुह्यन्तीति ।**

एवं लक्षणामूलौ पदप्रकाश्यतयोदाहृत्यासंलक्ष्यक्रममुदाहरति — **लावण्यं तदसावित्यादि** । तल्लावण्यमसौ कान्तिस्तद्रूपं स वचःक्रमः तदा तत्सन्निधानन्दहेतुः, अधुना तु तद्विरहे ज्वरायत इत्यत्र तदादिभिः सर्वनामपदैरनुभवैकगोचराः प्रतीतिविशेषाः प्रथन्ते । अतः पदप्रकाश्या असंलक्ष्यक्रमध्वनयोऽमी ।

मुग्धे मुग्धतयेति । इदं भीताननेत्यसर्वनामपदप्रकाश्यतयोदाहरणम् ।

Though the actions of the wicked are seen to be cruel, yet the ventures of the courageous respected by their bosom friends, do not falter at all. 74

Here 'falter' is the *suggestive word.*

That charming beauty, that splendour, that form and that mode of speech which were then the abode of nectar are now the source of high fever (to me). 75

Here by the use of words 'that' and the like are manifested the things knowable by experience only. Or as follows:

O you innocent one, why do you propose to pass your time in innocent faith? Have pride. Take courage. And set aside your simplicity towards your lover. Thus exhorted by her friends, she, with her fear-stricken face, made reply: "Speak softly, for my beloved dwells in my heart and he would overhear you." 76

Here by the use of 'with fear-stricken face' is suggested the propriety of the request to speak softly.

There is not much charm in the suggestion of emotion etc. by word, hence it is not being illustrated.

With his terrifying and yet pretty arms of iron-bar which bear the sword adorned with the pool of blood; and with his boardlike fore-head marked by the knitting of eye-brows, the dreadful king shines. 77

Here, Bhīmasena is (suggested to be) the standard of comparison (*upamāna*) of the dreadful king.

Whom does not flood with delight the good scripture (or the visit of a lover) which causes mundane prosperity (enjoyment), final salvation (sense of relief) and which insists upon solitary place? 78

भावादीनामिति। भावरसाभासभावाभासादयो हि वाक्यप्रकाश्यतायामपि रसापेक्षया निकृष्टचमत्कारा इति पदप्रकाश्यत्वमेषां नोदाह्रियत इति भावः।

अथ शब्दशक्तिमूलानुरणनरूपं ध्वनिद्वयं क्रमेणोदाहरति—**रुधिरविसरेति।**

अत्र भीषणस्येति, रुधिरप्रसाधितकरवालत्वादिना। भीमसेन उपमानं भीमपदेन द्योत्यत इति शेषः। अतोऽयं पदप्रकाश्योऽलङ्कारध्वनिः।

भुक्तिमुक्तीति। भुक्ति मुक्ति च करोतीति, यदेतदेकान्तसमादेशनमा-

काचित् सङ्केतदायिनमेवं मुख्यया वृत्त्या शंसति ।

सायं स्नानमुपासितं मलयजेनाङ्गं समालेपितं
यातोऽस्ताचलमौलिमम्बरमणिर्विस्रब्धमत्रागतिः ।
आश्चर्यं तव सौकुमार्यमभितः क्लान्तासि येनाधुना
नेत्रद्वन्द्वममीलनव्यतिकरं शक्नोति ते नासितुम् ॥ ७९ ॥

अत्र वस्तुना कृतपरपुरुषपरिचया स्नातासीति वस्तु अधुनापदद्योत्यं व्यज्यते ।

तदप्राप्तिमहादुःखविलीनाशेषपातका ।
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया सती ॥ ८० ॥ [Viṣṇupurāṇa]
चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम् ।
निरुच्छ्वासतया मुक्तिं गतान्या गोपकन्यका ॥ ८१ ॥ [Ibid.]

अत्र जन्मसहस्रैरुपभोक्तव्यानि दुष्कृतसुकृतफलानि वियोगदुःखचिन्ताह्लादाभ्यामनुभूतानीत्युक्तम् । एवञ्चाशेषचयशब्दद्योत्ये अतिशयोक्ती ।

क्षणदासावक्षणदा वनमवनं व्यसनमव्यसनम् ।
बत वीर तव द्विषतां पराङ्मुखे त्वयि पराङ्मुखं सर्वम् ॥ ८२ ॥

त्यन्तिक उपदेशस्तत्र तत्पर इति सज्जनसमागमापेक्षार्थः । भुक्तिं सम्भोगं मुक्तिं विरहदुःखोपशमं च करोतीति, यदेतदेकान्तसमादेशनमुपह्वराह्वानं तत्र तत्पर इति प्रच्छन्नकामुकापेक्षः ।

मुख्यया वृत्त्येति । सदागमपदेन सदागमपदव्यपदेशरूपयेत्यर्थः । सङ्केतदायिनः स्तुतिः सदागमपदद्योत्यं वस्त्विति यावत् ।

अथार्थशक्तिमूलस्य द्वादशकस्य पदप्रकाश्यतायाः प्रस्तावः— सायं स्नानमुपासितमिति । अत्र सायंस्नानोपास्तिमलयजालेपनसूर्यास्तमयविस्रब्धागतयः क्लमानुदयहेतवः । तथापि यदभितः क्लान्तासि, तदेतदाश्चर्यम् ।

अत्र वस्तुनेति । वस्तुना अहेतुकक्लमरूपेण स्वतस्सम्भविना ।

तदप्राप्तीति । तद्विरहलक्षणमहादुःखोपभोगेन क्षपितनिश्शेषपातका तच्चिन्तासुकृतेन क्षीणपुण्यराशिः मुक्तिं गता । मुक्तिः कैवल्यं विरहोपशमश्च ।

एवञ्चाशेषचयेति वस्तुनालङ्कारव्यक्तिर्दर्शिता ।

Some woman thus praises her lover who had fixed a place of meeting through a pre-eminent expression (of the lover's visit).*

You have taken evening bath and anointed your body with sandal. The gem of the sky (i.e. The Sun) has reached the crest of setting mount; quietly you have come here, O wonderful is your tenderness which has rendered you completely exhausted that your pair of eyes cannot help but remain open. 79

Here, by the fact is suggested the fact: 'you have taken bath having had sexual pleasure with the man of other lady' which is manifested by the word 'now'.

Another milk-maid whose all sins had been dissolved through the great pangs in not obtaining Him and whose stock of merit had been depleted by her great ecstasy in meditating upon Him, obtained salvation by reflecting upon the source of the universe (Kṛṣṇa), the ultimate Reality. 80-81

Here, the fruits of good and bad actions, to be experienced during thousands of births, were experienced through the pangs of separation and the ecstasy of meditation—this is stated. And, therefore, hyperboles are suggested by the words 'all' and 'stock.'

O brave one, on your having turned against your enemies, everything becomes adverse—the nights (kṣaṇadā—the pleasure-giving) do not give (them) pleasure (akṣaṇadā, also non-nights); the forest (*vana*) becomes (their) shelter (*avana*—also non-forest) and their pastime (*vyasana*) becomes herding of sheep (*avyasana*, also non-occupation). 82

क्षणदासाविति । क्षणदा रात्रिः अक्षणदा क्षणदा न भवतीति विरोधाभासः, उत्सवदा न भवतीत्यर्थः । अवनं वनं न भवतीति विरोधः, रक्षणमित्यर्थः । अव्यसनं व्यसनं न भवतीति विरोधः, अवीनामसनं कालनमित्यर्थः ।

*Here the word '*sadāgama*' suggests the praise of the lover. This illustration is the case of the *vastu* (viz. praise of the lover) suggested by a word (*pada*).

अत्र शब्दशक्तिमूलविरोधालङ्काराङ्गेनार्थान्तरन्यासेन विधिरपि त्वामनुवर्तत इति सर्वपदद्योत्यं वस्तु ।

तुह वल्लहस्स गोसम्मि आसि अहरो मिलाणकमलदलो ।
इअ णववहुआ साऊण कुणइ वअणं महीसमुहम् ॥ ८३ ॥

अत्र रूपकेण त्वयास्य मुहुर्मुहुः परिचुम्बनं कृतं, येन म्लानत्वमिति मिलाणादिपदद्योत्यं काव्यलिङ्गम् । एषु स्वतस्सम्भवी व्यञ्जकः ।

राईसु चन्दधवलासु ललिअमप्फालिऊण जो चावम् ।
एक्कच्छत्तं चिअ कुणइ भुवणरज्जं विअम्भन्तो ॥ ८४ ॥

अत्र वस्तुना येषां कामिनामसौ राजा स्मरस्तेभ्यो न कश्चिदपि तदादेशपराङ्मुख इति जाग्रद्भिरुपभोगपरैरेव तैर्निशातिवाह्यत इति भुवनराज्यपदद्योत्यं वस्तु प्रकाश्यते ।

निशितशरधियार्पयत्यनङ्गो
दृशि सुदृशः स्वबलं वयस्यराले ।
दिशि निपतति यत्र सा च तत्र
व्यतिकरमेत्य समुन्मिषन्त्यवस्थाः ॥ ८५ ॥

अत्र वस्तुना युगपदवस्थाः परस्परविरुद्धा अपि प्रभवन्तीति व्यतिकरपदद्योत्यो विरोधः ।

वारिज्जन्तो वि पुणो सन्दावकदत्थिएण हिअएण ।
थणभरवअस्सएण विसुद्धजाई ण चलई से हारो ॥ ८६ ॥

शब्दशक्तिमूलेति । विरोधालङ्काराङ्गेनेति बहुव्रीहिः । विरोधालङ्कारो हि समर्थकत्वेनार्थान्तरन्यासाङ्गम् ।

तुह वल्लहेति ।

तव वल्लभस्य प्रत्यूष आसीदधरो म्लानकमलदलम् ।
इति नववधूः श्रुत्वा करोति वदनं महीसम्मुखम् ॥

महीसम्मुखीकरणं लज्जयावनमति ।

मिलाणादिपदद्योत्यमिति मिलाणकमलदलमिति पदेन द्योत्यमित्यर्थः । स्वतस्सम्भविचतुष्कं निगमयति—**एषु स्वत** इति ।

राईसु चन्देति ।

रात्रीषु चन्द्रधवलासु ललितमास्फाल्य यश्चापम् ।
एकच्छत्रमेव करोति भुवनराज्यं विजृम्भमाणः ॥

अत्र वस्तुनेति । मन्मथवृत्तरूपेण कविप्रौढोक्तिमात्रनिष्पादितेन ।

Here, through the corroboration (*arthāntaranyāsa*) which is subservient to the figure of seeming contradiction (*virodha*) founded on the power of word, is suggested the fact, manifested by the word 'everything', that 'destiny also follows you'.

Early in the morning the lip of your lover was (like) the petal of the faded lotus. On hearing this the young wife casts her face down. 83

Here, by metaphor is suggested the *poetical* reason (*kāvyaliṅga*) that he was kissed by you again and again, hence this fading, which is suggested by the word 'faded' and the like. In these (examples) the suggester is self-possible.

He, who flaps gently his beautiful bow during the nights lit by the moon, absolutely rules over the world with great display. 84

Here by the fact is suggested the fact, manifested by the words 'rules over the world', that there is none among the lovers, whose king is this Cupid, who does not obey his command and that they (lovers) pass their nights waking and enjoying the (sensuous) pleasures.

The god of love transfers his powers to the eyes of beautiful-eyed women at their crooked age (i.e. youth). And in whichever direction this (glance) falls, there shoot forth various conditions. 85

Here, by the fact is suggested the contradiction (*virodha*) that even mutually contradictory conditions arise simultaneously, which is suggested by the word 'various'.

Her necklace of pure origin, although refrained by the grief-stricken heart, the friend of heavy breasts, does not budge (from its position). 86

निशितशरेति । अराले वक्रे यौवन इत्यर्थः । निशितशरधिया दृशि स्वबलं विश्वविजयसामर्थ्यमर्पयति । अत्रोत्तरार्धार्थो हेतुः । व्यतिकरो विजातीयसम्भेदः ।

अत्र वस्तुनेति । वस्तु स्वबलार्पणरूपम् ।

वारिज्जन्तो वीति ।

वार्यमाणोऽपि पुनः सन्तापकदर्थितेन हृदयेन ।
स्तनभरवयस्येन विशुद्धजातिर्न चलत्यस्या हारः ॥

सन्तापकदर्थितेन हृदयेन वारितोऽपि कम्पान्न चलति कम्पमान एव वर्तत इत्यर्थः ।

अत्र विशुद्धजातित्वलक्षणहेत्वलङ्कारेण हारोऽनवरतं कम्पमान एवास्त इति न चलतीति पदव्यङ्ग्यं वस्तु ।

सो मुद्धसामलङ्गो धम्मिल्लो कलिअललिअणिअदेहो ।
तीए खंधाहि बलं लहिअ सरो सुरअसङ्गरे जअइ ॥ ८७ ॥

अत्र रूपकेण मुहुराकर्षणे तथा केशपाशः स्कन्धयोः प्राप्तः, यथा रतिविरतावप्यनिवृत्ताभिलाषः कामुकोऽभूदिति स्कन्धपदद्योत्या विभावना। एषु कविप्रौढोक्तिमात्रनिष्पन्नशरीरः ।

णवपुण्णिमामिअङ्कस्स भणसु को तं सि सुहअ मह सच्चम् ।
का सोहग्गसमग्गा पओसरअणिव्व तुह अज्ज ॥ ८८ ॥

अत्र वस्तुना मयीवान्यस्यामपि प्रथममनुरक्तस्त्वं न तत इति णवेत्यादिपओसेत्यादिपदद्योत्यं वस्तु व्यज्यते ।

सहि णवणिहुवणसमरम्मि अङ्कवालीसहीए णिबिडाए ।
हारो णिवारिओ चिचअ उव्वेरन्तो तदो कहं रमिअम् ॥ ८९ ॥

अत्र वस्तुना हारच्छेदानन्तरमन्यदेव रतमवश्यमभूत्, तत् कथय कीदृगिति व्यतिरेकः कहंपदगम्यः ।

सो मुद्धेति ।

स मुग्धश्यामलाङ्गो धम्मिल्लः कलितललितनिजदेहः ।
तस्याः स्कन्धाद् बलं लब्ध्वा स्मरः सुरतसङ्गरे जयति ॥

इति धम्मिल्लस्य स्मरत्वेन रूपणम् । स्कन्धशब्दः धम्मिल्लावलम्बनभूतमंसं सेनासन्निवेशरूपं चाह ।

रतिविरतावपीति विभावनाबीजभूतोऽभिलाषकारणभाव उक्तः । अथ कविनिबद्धचतुष्कोपसंहारः—**एषु कविप्रौढोक्तिमात्रेति** ।

णवपुण्णिमेति ।

नवपूर्णिमामृगाङ्कस्य भण कस्त्वमसि सुभग मम सत्यम् ।
का सौभाग्यसमग्रा प्रदोषरजनीव तवाद्य ॥

नवेति रागाविलत्वम् । पूर्णिमामृगाङ्केति प्रदोषकालाभिगमः ।

वस्तुना कस्त्वमसीति सोपालम्भानुयोगरूपेण । अद्य का तवेति कथनात् पूर्वमप्यहमिवान्यास्तीति यत् प्रतीतं तदु (त्पा? पपा) दयति—**मयीवान्यस्यामिति न तत** इति मदनन्तरं न भव (ती?) ति, अपि तु मत्समकालमेवेत्यर्थः ।

सहि णवेति ।

सखि नवनिधुवनसमरे अङ्कपालीसख्या निबिडया ।
हारो निवारित एवोद्ध्रियमाणस्ततः कथं रमितम् ॥

Here, by the figure *hetu* in the form of purity of origin is suggested the fact that the necklace remains continuously swinging, and this is manifested by the words, 'does not budge'.*

Her braided and ornamented hair of charmingly black form is the Cupid, who has regained his lovely form and who excels in the battle of love after reinforcing himself from her shoulder (also, a division of army). 87

Here, by metaphor is suggested abnormal causation (*vibhāvanā*) namely, by being pulled frequently the locks fall in such a way on the shoulders as the lover felt unsatisfied even after the end of dalliance, which is illuminated by the word 'shoulder'. Among these the suggestion obtains its form exclusively by imaginative expression of the poet.

O fortunate one, tell me the truth as to what are you to the new full moon and who is now most fortunate beloved like the young night (of the moon)? 88

Here, by fact is suggested the fact that 'you bear love for some other woman in the beginning only and not afterwards as you did for me'—this is manifested by the words, such as 'new' and the 'young night'.

O friend, in the new battle of sexual enjoyment when the swinging necklace had been dismissed by the friend, namely, the close embrace, then how did you enjoy the love? 89

Here, by fact is suggested the contrast by dissimilitude (*vyatireka*) that 'after the necklace was dismissed there must have been a different sort of sexual enjoyment, tell me how was that like? This is implicit in the word 'how'.

अङ्कपाली आलिङ्गनं तद्रूपया हारस्य वयस्यया हारो निबिडं निवारित एव । अतोऽसति हारे कथं रतमिति ।

कीदृगित्यनेन यादृक् पूर्वं तादृङ न भवतीति व्यतिरेकः ।

*The necklace put on by the woman gives much discomfort when she is embraced. Her heart, the friend of breasts, feels distressed at this but the necklace, being of pure origin, does not leave her breasts. This suggests its swinging.

पविसन्ती घरदारं विवलिअवअणा विलोलिऊण पहम् ।
कंधा गहिऊण घडं हाहा णट्ठेत्ति रुअसि सहि किं ति ।। ६० ।।

अत्र हेत्वलङ्कारेण सङ्केतनिकेतनं गच्छन्तं दयितं दृष्ट्वा यदि तत्र गन्तुमिच्छसि तदपरं घटं गृहीत्वा गच्छेति वस्तु किंपदव्यङ्ग्यम् ।

विहलं खणं तुमं सहि दट्ठूण घडेण तरलतरदिट्ठिम् ।
दारप्फंसमिसेणं अप्पा गरुओत्ति पाडिअविभिण्णो ।। ६१ ।।

अत्र नदीकूले लतागहने कृतसङ्केतमप्राप्तं गृहप्रवेशावसरे पश्चादागतं दृष्ट्वा पुनर्नदीगमनाय द्वाराघातव्याजेन बुद्धिपूर्वं व्याकुलया त्वया घटः स्फोटित इति मया चेतितम् । तत् किमिति नाश्वसिषि तत् समीहितसिद्धये व्रज । अहं ते श्वश्रूनिकटे सर्वं साधयिष्यामीति द्वारस्पर्शव्याजेनेत्यपह्नुत्या वस्तु ।

जोह्लाए महुरसेण अ विइण्णतारुण्णऊसुअमणा सा ।
वुड्ढा वि णवोढा विअ परवहुआ अहह हरइ तुह हिअअम् ।। ६२ ।।

अत्र काव्यलिङ्गेन वृद्धां परवधूं त्वमस्मानुज्झित्वाभिलषसीति त्वदीयमाचरितं वक्तुं न शक्यमित्याक्षेपः परवधूपदप्रकाश्यः ।

एषु कविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरः । वाक्यप्रकाश्ये तु पूर्वमुदाहृतम् । शब्दार्थोभयशक्त्युद्भवस्तु पदप्रकाश्यो न भवतीति पञ्चत्रिंशद्भेदाः ।

प्रविशन्ती गृहद्वारं विवलितवदना विलोक्य पन्थानम् ।
स्कन्धे गृहीत्वा घटं हाहा नष्ट इति रोदिषि सखि किमिति ।।

विहलमिति ।

विह्वलां क्षणं त्वां सखि दृष्ट्वा घटेन तरलतरदृष्टिम् ।
द्वारस्पर्शमिषेण आत्मा गुरुक इति पातितविभिन्नः ।।

श्रान्तां भवतीं दृष्ट्वा गुरुकोऽस्मीति बुद्धया द्वारस्पर्शमिषेण घटः स्वात्मानं पातयित्वा विभिन्नः ।

जोह्लाए इति ।

ज्योत्स्नया मधुरसेन च वितीर्णतारुण्योत्सुकमनाः सा ।
वृद्धापि नवोढेव परवधूरहह हरति तव हृदयम् ।।

On entering the house, turning round your face you looked at the pathway and (then) putting the water-pot on your shoulder, why are you, O friend, lamenting. Oh, it is broken.

Here, by the figure *hetu* (reason) is suggested the fact that 'if, on finding your lover going to the place of mutual meeting, you desire to go there then takesome other water-pot and go there'. This is suggested by the word 'why'.

O friend, finding you anxious with eyes unsteady and regarding itself as heavy, the jar fell down and was broken under the pretext of having struck (itself) against the door. 91

Here, by the figure *apahnuti* (concealment) in (the expression) 'under the pretext of having struck (itself) against the door' is suggested the fact that 'when you could not see your lover, whom you had signalled to meet on the banks of the river, dense with creepers, and afterwards when you saw him coming at the time of your entrance in (your) house you, the anxious one, broke the jar deliberately to go back to the riverside—this I have guessed. But why don't you feel assured? Go ahead to realise your desire. I shall straighten all this before your mother-in-law'.

Oh! another man's gay wife to whom youth has been lent by the moonlight and the flavour of drink, though old, captivates your heart as a newly wedded wife. 92

Here, by poetical reason (*kāvyaliṅga*) is suggested paraleipsis (*ākṣepa*) through the word 'another man's wife' you desire ignoring us, the other woman, so your conduct is inexplicable.

In these (examples) the suggestion obtains its form merely by the imaginative expression of the character portrayed by the poet. The suggestion through the sentence has been already illustrated. But the one arising from the power of both word and meaning is not suggested by a word (*pada*); thus the kinds are thirty-five (in all).

अत्र काव्यलिङ्गेनेति । अत्रोत्सुकमनस्त्वे ज्योत्स्नादि लिङ्गम् । चतुष्कमुपसंहरति—**एषु कविनिबद्धेति** । इत्थं सप्तदश भेदाः । तानिमान् पूर्वभेदैः सह

प्रबन्धेऽप्यर्थशक्तिभूः ॥ ४२ ॥

यथा गृध्रगोमायुसंवादादौ । तथा च—

अलं स्थित्वा श्मशानेऽस्मिन गृध्रगोमायुसङ्कुले ।
कङ्कालबहुले घोरे सर्वप्राणिभयङ्करे ॥ ६३ ॥
न चेह जीवितः कश्चित् कालधर्ममुपागतः ।
प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी ॥ ६४ ॥

[Mahābhārata, Śāntiparvan]

इति दिवा प्रभवतो गृध्रस्य पुरुषविसर्जनपरमिदं वचनम् ।

आदित्योऽयं स्थितो मूढाः स्नेहं कुरुत साम्प्रतम् ।
बहुविघ्नो मुहूर्तोऽयं जीवेदपि कदाचन ॥ ६५ ॥
अमुं कनकवर्णाभं बालमप्राप्तयौवनम् ।
गृध्रवाक्यात् कथं मूढास्त्यजध्वमविशङ्किताः ॥ ६६ ॥

[Ibid.]

इति निशि विजृम्भमाणस्य गोमायोर्जनव्यावर्तननिष्ठं चेति प्रबन्ध एव प्रथते । अन्ये त्वेकादश भेदा ग्रन्थविस्तरभयान्नोदाहृताः, स्वयं तु लक्ष्यतोऽनुसर्तव्याः । अपिशब्दात् पदवाक्ययोः ।

पदैकदेशरचनावर्णेष्वपि रसादयः ।

राशीकर्तुमाह—**पञ्चत्रिंशदिति** । सप्तदशैते पदप्रकाश्याः पूर्वं वाक्यप्रकाश्यतया दर्शिता इति चतुस्त्रिंशत् । उभयशक्तिमूलस्तु वाक्यैकप्रकाश्य इति पञ्चत्रिंशद्भेदता ।

अथार्थशक्तिमूलस्य द्वादशकस्य प्रकारान्तरेणापि सम्भवं दर्शयति—**प्रबन्धेऽप्यर्थेति** ।

अलं स्थित्वेति । गृध्रगोमायुसङ्कुलत्वं स्थितिनिवर्तने हेतुः ।
पुरुषविसर्जनेति । मृतपुरुषविसर्जनपरत्वं ह्यत्र प्रतीयते ।

अथ गोमायोः—**आदित्योऽयमिति** । बहुविघ्न इति जीवितस्य प्रत्यागमशङ्कोत्थाप्यते ।

42d. The one arising from the power of meaning is in the *composition* also.

As for example in the (following) dialogue of vulture and the jackal—

Vulture : You ought not remain in this frightful cemetery crowded with vultures and jackals, abounding in skeletons and causing fear to all the beings. Here, none, whether beloved or despised, has been revived—such is the course of all living beings. 93-94

This utterance of the vulture, active during the day, is meant to send away the people (in daytime).

Jackal : The sun here, is still there. O fools, show your love now. This moment abounds in obstacles but perchance the boy might revive (later on). Why do you, O fools, on the vulture's word, leave thoughtlessly that boy shining like gold, who has not yet attained his youth. 95-96

This speech of the jackal, active at night, is meant to restrain people from going away. Such a suggestion manifests itself in composition only. The other eleven kinds (based on the power of word) are not illustrated due to the fear of prolixity of the treatise. But they may be followed independently from what has been defined. The term 'also' implies 'in word, and sentence'.

43ab. *Rasa* and the like are in the parts of inflected words, in style and in letter also.

निशीति । गोमायुर्हि निशि गृध्रमभिभवितुं क्षमते । अत्र युगविशेषस्य दिव्यानुभावशालित्वाद् गृध्रगोमायुसंवादः स्वतस्सम्भवी न तु प्रौढोक्तकल्पितः । प्रबन्धेऽपीत्यपिशब्द उक्तसमुच्चयपर इत्याह—**अपिशब्दादिति** ।

अथ रसध्वनेः सम्भवान्तरमाह—**पदैकदेशेति** ।

तत्र प्रकृत्या यथा—

रइकेलिहिअणिअसंणकरकिसळअरुद्धणअणजुअळस्स ।
रुद्दस्स तइअणअणं पव्वइपरिचुम्बिअं जइअ ॥ ६७ ॥

[Gāthāsaptaśatī, V. 55]

अत्र जयतीति, न तु शोभत इत्यादि । समानेऽपि हि स्थगनव्यापारे लोकोत्तरेणैव रूपेणास्य नयनस्य पिधानमिति तदेवोत्कृष्टम् । तथा—

प्रेयान् सोयमपाकृतः सशपथं पादानतः कान्तया
द्वित्राण्येव पदानि वासभवनाद् यावन्न यात्यात्मना ।
तावत् प्रत्युत पाणिसम्पुटलसन्नीवीनिबन्धं धृतो
धावित्वैव कृतप्रणामकमहो प्रेम्णो विचित्रा गतिः ॥ ६८ ॥

[cited in Vāmana's KASV.]

अत्र पदानीति न तु द्वाराणीति । तिङ्सुपोर्यथा—

पथि पथि शुकचञ्चूचारुराभाङ्कुराणां
दिशि दिशि पवमानो वीरुधां लासकश्च ।
नरि नरि किरति द्राक् सायकान् पुष्पधन्वा
पुरि पुरि च निवृत्ता मानिनीमानचर्चा ॥ ६९ ॥

[Amaruśataka, 7]

अत्र किरतीति किरणस्य साध्यत्वं निवृत्तेति निवर्तनस्य सिद्धत्वं तिङा सुपा च, तत्रापि क्तप्रत्ययेनातीतत्वं द्योत्यते । यथा वा—

पदैकदेशो हि प्रकृतिप्रत्ययात्मकतया द्विरूपः । तत्र प्राथम्यात् प्रकृति-प्रकाश्यमुदाहरति—**रइकेलीति ।**

रतिकेलिहृतनिवसनकरकिसलयरुद्धनयनयुगलस्य ।
रुद्रस्य तृतीयनयनं पार्वतीपरिचुम्बितं जयति ॥

अत्र प्रकृतेर्वैशिष्ट्यं दर्शयति—**जयति, न तु शोभत इत्यादीति ।** तत्र को विशेष इत्यत आह—**समानेऽपि हीत्यादि । लोकोत्तरेणैवेति ।** प्रस्तावोचित-त्वाच्चुम्बनरूपस्य स्थगनस्य लोकोत्तरत्वम् । तिङ्प्रकृतेरुदाहरणमिदम् ।

सुप्प्रकृतेरुदाहरति—**प्रेयान् सोयमिति ।** पादानतोऽपि सशपथमपाकृतः सन् द्वित्राण्येव पदानि वासभवनाद् यावन्न निर्याति, तावन्न केवलमियमस्य प्रार्थनां विना प्रसन्ना प्रत्युत तं प्रार्थनया प्रसादितवतीत्याविष्कर्तुमुक्तं—प्रत्युत धृत इति ।

There, to illustrate it by radical word :

Being kissed by Pārvatī the third eye of Śiva, whose two eyes were closed by leaf-like hands of Pārvatī, who was stripped of her robe in sports of love, is supreme. 97

Here, 'is supreme' and not 'shines' etc. is used. Though the action of being closed is similar but the closing of this (i.e. third eye) is done in an extraordinary way (i.e. by kissing), hence that (third eye) alone is supreme.

This very lover, who was lying swearing at her feet, has been rejected by the beloved; being dejected hardly had he gone two or three steps from her bedchamber when with her knot of the garment slipping from the fold of her hand and with a bow he is held by her running. Oh, strange are the ways of love ! 98

Here 'the steps' and not doorway is used. To illustrate (the suggestiveness of) that of inflection and declension (*tiṅ* and *sup*).

On every wayside is the beauty of the sprouts pretty like the beaks of the parrots; and in every direction is the wind who makes the creepers dance; on every man the God of love suddenly scatters his arrows; in every town has stopped the talk of pride of the resenting ladies. 99

Here, from 'scatters' the process of accomplishing the scattering and from 'has stopped' the accomplished state of 'stopping' are suggested by inflection and declension (respectively). There too (in the latter case) the pastness is suggested by the affix '*Kta*'.

Or as in :

न तु द्वाराणीति । पदात् पदान्तरसंचलनमपि विरहासहिष्णुतया न सोढमित्युक्ते यदौत्सुक्यं न हि तद् द्वारमित्युक्ते ।

अथ तिङ्सुपोः प्रत्यययोरुदाहरति—**पथि पथीति** । आभा प्रभा ।

अत्र किरतीत्यादि । लटा तिङ्प्रत्ययेन किरणव्यापारापरिसमाप्तिः, निवृत्तेति क्तेन सुप्प्रत्ययेन तत्कार्यभूतमानिनीमाननिवृत्तेरतीतत्वेन तदपेक्षया चिरसिद्धतेति शृङ्गारप्रकर्षः ।

लिखन्नास्ते भूमिं बहिरवनतः प्राणदयितो
निराहाराः सख्यः सततरुदितोच्छूननयनाः ।
परित्यक्तं सर्वं हसितपठितं पञ्जरशुकै-
स्तवावस्था चेयं विसृज कठिने मानमधुना ॥ १०० ॥

[Amaruśataka, 7]

अत्र लिखन्निति न तु लिखतीति, तथास्त इति न तु आसित इति अपि तु प्रसादपर्यन्तमास्त इति, भूमिमिति न तु भूमाविति न हि बुद्धिपूर्वकं किञ्चिल्लिखतीति तिङ्सुब्विभक्तीनां व्यङ्ग्यम् ।

गामारुहम्मि गामे वसामि णअरट्ठिइं ण आणामि ।
णाअरिआणं पइणो हरेमि जा होमि सा होमि ॥ १०१ ॥

अत्र नागरिकाणामिति षष्ठ्याः ।

'रमणीयः क्षत्रियकुमार आसीदि'ति कालस्य । एषा हि भग्नमहेश्वरकार्मुकं दाशरथिं प्रति कुपितस्य भार्गवस्योक्तिः ।

वचनस्य यथा—

ताणँ गुणग्गहणाणं ताणुक्कण्ठाणँ तस्स पेम्मस्स ।
ताणँ भणिआणँ सुन्दर ईरिसअं जाअमवसाणम् ॥१०२ ॥

लिखन्निति । एतत् तिङ्सुप्प्रत्ययान्तरोदाहरणम् ।
तद् विवृणोति—अत्र न लिखतीत्यादिना ।

गामारुहेति ।

ग्रामीणास्मि ग्रामे वसामि नगरस्थितिं न जानामि ।
नागरिकाणां पतीन् हरामि या भवामि सा भवामि ॥

कयाचिद् मत्सरिलया ग्राम्यासीत्यधिक्षिप्तायाः प्रतिनायिकाया उक्तिरेषा ।

षष्ठ्या इति । प्राधान्यं निराकर्तव्यत्वेन व्यङ्ग्यमित्यर्थः । व्यासे प्राधान्यं प्रतीयत इति भविष्यति ।

रमणीय इति कालस्य, आसीदिति लङ्वाच्यस्य । तस्यानद्यतनतालक्षणं विशेषमाविष्कर्तुमाह—एषा हि भग्नेत्यादिना । भार्गवो हि नाद्य क्षत्रियाः क्षितौ सन्तीत्यवर्तिष्ट ।

The dearest of your heart, with his head bowed down, sits outside scratching the ground; your friends, their eyes swollen by continuous weeping, are going without food. The parrots in the cage have given up all laughter and muttering and this is your condition. Give up now, O hard-hearted one, your anger. 100

Here, the suggestions from inflection, declension and case-termination are (respectively) in the following cases:

i. *Likhan*, scratching—but not 'scratches', *likhati*;

ii. Āste, sits—but not sat, *āsitaḥ* (the past form of the same verb) i.e. he will remain sitting till you are pleased; and

iii. *Bhūmim*, ground—but not *bhūmau* (on the ground), i.e. he is not drawing something (on the ground) consciously.

(Or as in the following example of genitive termination:)

I am a country woman, I live in the country and know not the ways of the town; whoever I am, I captivate the husbands of town women. 101

Here, the genitive case in 'of town women' (is suggestive).

'Charming was the warrior-prince"—this is (the example of the suggestiveness) of tense. It is the speech of enraged son of Bhṛgu (Paraśurāma) to the son of Daśaratha (Rāma) who had broken the bow of Śiva. (Here the use of past tense suggests that though living, he can be spoken of as dead because the anger of Paraśurāma is bound to kill him.)

The example of (the suggestiveness of) the number :

Of those appreciations of qualities; of those longings of that love, of those words, O pretty one, such is the end. 102

ताणँ गुणेति ।

तेषां गुणग्रहणानां तासामुत्कण्ठानां तस्य प्रेम्णः ।
तेषां भणितानां सुन्दर ईदृशं जातमवसानम् ॥

अत्र गुणग्रहणादीनां बहुत्वं प्रेम्णश्चैकत्वं द्योत्यम् । पुरुषव्यत्ययस्य यथा—

रे रे चञ्चललोचनाञ्चितरुचे चेतः प्रमुच्य स्थिर-
प्रेमाणं महिमानमेणनयनामालोक्य किं नृत्यसि ।
किं मन्ये विहरिष्यसे बत हतां मुञ्चान्तराशामिमा-
मेषा कण्ठतटे कृता खलु शिला संसारवारांनिधौ ॥ १०३ ॥

अत्र प्रहासः । पूर्वनिपातस्य यथा —

येषां दोर्बलमेव दुर्बलतया ते सम्मतास्तैरपि
प्रायः केवलनीतिरीतिशरणैः कार्यं किमुर्वीश्वरैः ।
ये क्ष्माशक्र पुनः पराक्रमनयस्वीकारकान्तक्रमा-
स्ते स्युर्नैव भवादृशास्त्रिजगति द्वित्राः पवित्राः परम् ॥१०४॥

अत्र पराक्रमस्य प्राधान्यं गम्यते । विभक्तिविशेषस्य यथा —

प्रथनाध्वनि धीर धनुर्ध्वनिभृति विधुरैरयोधि तव दिवसम् ।
दिवसेन तु नृवर भवानयुद्ध विधिसिद्धसाधुपदम् ॥ १०५ ॥

अत्र दिवसेनेत्यपवर्गे तृतीया फलप्राप्तिं द्योतयति ।

अत्र गुणेति । द्योत्यं वचनस्येत्यन्वयः । पुरुषस्तु व्यत्ययेनावस्थितः क्वचिद् व्यञ्जक इत्याह—**पुरुषव्यत्ययस्य यथेति** ।

रे रे चञ्चलेत्यादि । चञ्चललोचनाञ्चितरुचे ! कान्तासक्त ! स्थिर-प्रेमाणं स्थिरप्रेम्णा रक्षितं महिमानं विमुच्येत्यर्थः । **किं मन्ये विहरिष्यस** इति । विहरिष्य इति मन्यसे किं, न तथा विहरिष्यस इत्यर्थः । 'प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च' (१. ४. १०६) इति पुरुषव्यत्ययः । तत्र हेतुः—**एषा कण्ठत** (टे ? ट इ) इत्यादि ।

अत्र प्रहास इति । पुरुषव्यत्ययस्य द्योत्य इत्यनुषङ्गः । एषूदाहरणेषु वचनादिस्वार्थमुखात् प्रत्ययस्य व्यञ्जकता दर्शिता ।

येषां दोर्बलमिति । येषां दोर्बलमेवेति इयदेव वाक्यम् । केवलमस्तीति शेषः । ये केवलबलिनः, ये च केवलनीतिशरणाः, उभयेऽपि हि ते दुर्बला एव ।

Here the plurality of the appreciation and the like and the singleness (*denoting absoluteness*) of the love are suggested (by number).

To illustrate the change of (grammatical) person :

O one enamoured of the lady with tremulous eyes, O heart, why have you renounced the glory of abiding love and begin to dance at the sight of the gazzel-eyed ? Do you think that (thus) you will have fun ? Ah, give up this unfortunate inward desire;—this is, indeed, a stone fastened to the neck in the ocean of world. 103

Here, ridicule (is suggested by the use of first person singular in *manye*—I think—followed by the change into second person singular in *Viharişyase*—you will have fun).

To illustrate (the suggestiveness of) the irregular priority (of a word in a compound) :

Those that have only power of arms are regarded as weak, and what will those kings do who usually resort to the ways of mere diplomacy? But those supremely virtuous like you, O Indra on earth, whose actions are unique by acceptance of valour and diplomacy, may not be more than two or three in the three worlds. 104

Here, the pre-eminence of the valour is understood (from the priority of the word valour in the compound).

To illustrate (the peculiar use) of a particular case-termination :

In the battle-field, filled with the sounds of the courageous warriors, your foes fought all the day long; but O king, you fought *by the day*, becoming worthy to receive congratulations from the creator and the divinities. 105

Here '*divasena*'—*by the day*—this third case-termination in (the sense of) accomplishment of an action suggests the acquisition of fruit.

येषां पुनस्ते बलनीती समस्ते सम्भवतः ते भवादृशा दुर्लभा इत्यर्थः ।

अत्र पराक्रमस्येति । इतरथा अल्पतराच्कत्वाद् नयस्य पूर्वनिपातः स्यात् ।

प्रथनाध्वनीति । प्रथनं संग्रामः ।

अपवर्गे तृतीयेति । न पुनर्दिवसमित्यत्यन्तसंयोगद्वितीयावन्नैष्फल्यमिति भावः ।

भूयो भूयः सविधनगरीरथ्यया पर्यटन्तं
दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था ।
साक्षात् कामं नवमिव रतिर्मालती माधवं यद्
गाढोत्कण्ठालुलितलुलितैरङ्गकैस्ताम्यतीति ॥१०६॥
[Mālatīmādhava, I. 15]

अत्रानुकम्पावृत्तेः करूपतद्धितस्य ।

परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते ॥१०७॥
[Ibid., I. 30]

अत्र प्रशब्दस्योपसर्गस्य ।

कृतं च गर्वाभिमुखं मनस्त्वया
किमन्यदेवं निहताश्च नो द्विषः ।
तमांसि तिष्ठन्ति हि तावदंशुमान् ।
न यावदायात्युदयाद्रिमौलिताम् ॥ १०८ ॥

अत्र तुल्योगिताद्योतकस्य च इति निपातस्य ।

रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परा-
मस्मद्भाग्यविपर्ययाद् यदि परं देवो न जानाति तम् ।
वन्दीवैष यशांसि गायति मरुद् यस्यैकबाणाहृति-
श्रेणीभूतविशालसालविवरोद्गीर्णैः स्वरैः सप्तभिः ॥ १०९ ॥
[Rāghavānandanāṭaka]

अत्रासाविति भुवनेष्विति गुणैरितिसर्वनामप्रातिपदिकवचनानां, न त्वदिति न मदिति, अपि त्वस्मदित्यस्य सर्वाक्षेपिणः, भाग्यविपर्ययादिति अन्यथासम्पत्तिमुखेन न त्वभावमुखेनाभिधानस्य ।

भूयो भूय इति । दृष्ट्वा दृष्ट्वेति क्त्वाप्रत्ययस्योत्कण्ठापेक्षया पूर्वकालता ।

अत्रानुकम्पेति । अनुकम्पावृतेः अनुकम्पार्थस्य कप्रत्ययात्मनस्तद्धितस्येत्यर्थः ।

परिच्छेदेत्यादि । महामोहोपचये प्रकर्षेण विवेकध्वंसो हेतुः ।

When Mālatī, seated in the top window of the upper terrace of her house, repeatedly saw Mādhava, as Rati would see the young god of love, passing again and again by the adjacent lane of the city, she pines with her tender limbs grown wearied due to deep longing. 106

Here, nominal affix in the form of '*ka*' (in *aṅgakaiḥ*) denoting compassion (is suggestive).

Some feeling, boundless and unknown to all the words, which was never experienced before in this life and which is deep by great infatuation due to the lapse of discernment, deadens and torments me internally. 107

Here is the suggestiveness of the proposition '*pra*' used in the °*pradhvaṁsa*.

The mind was directed to pride by you and our foes were killed (immediately). What else could there be ? Because darkness prevails only so long as the sun does not ascend the crest of the eastern mount. 108

Here is the suggestiveness of the particle '*ca*' suggesting equal pairing (*tulyayogitā*).

This is Rāma who has acquired a great renown in the worlds by virtues of valour but if (O Rāvaṇa) Your Excellency does not know him it is because of our adverse fate. For it is his glories that the wind, like a bard, is singing in seven notes emanating from the holes of large palm trees formed into line by the piercing of a single arrow. 109

Here is the suggestiveness in the grammatical numbers of (i) the pronoun '*asau*'—this—and of (ii) the uninflected noun '*bhuvaneṣu*'— in the worlds; and (iii) '*guṇaiḥ*'—by the qualities. (There is suggestiveness of the use) of *asmat*—our—i.e. not only your or mine but implying every body; and of the mention of 'because of adverse fate' done by way of contrary appliance and not by way of direct negation.

कृतं चेति । त्वया गर्वाभिमुखं मनः कृतं च द्विषो निहताश्चेति चकाराभ्यां कार्यकारणसमकालत्वलक्षणोऽतिशयो व्यज्यते ।

रामोऽसाविति । को राम इति दशग्रीवेण पृष्टस्य चारस्योक्तिरेषा । रामोऽसाविति सर्वनाम्ना लोकातिशायिनी प्रसिद्धिः । भुवनेष्विति प्रसिद्धेः सार्व-

तरुणिमनि कलयति कलामनुमदनधनुर्भ्रुवोः पठत्यग्रे ।
अधिवसति सकलललनामौलिमियं चकितहरिणचलनयना ॥११०॥

अत्रेमनिजव्ययीभावकर्मभूताधाराणां स्वरूपस्य । तरुणत्व इति धनुषः समीप इति मौलौ वसतीत्यादिभिस्तुल्येऽप्येषां वाचकत्वेऽस्ति कश्चित् स्वरूपस्य विशेषो यश्चमत्कारकारी स एव व्यञ्जकत्वं प्राप्नोति । एवमन्येषामपि बोद्धव्यम् । वर्णरचनानां व्यञ्जकत्वं गुणस्वरूपनिरूपण उदाहरिष्यते । अपिशब्दात् प्रबन्धेषु नाटकादिषु । एवं रसादीनां पूर्वगणितभेदाभ्यां सह षड् भेदाः ।

भेदास्तदेकपञ्चाशत्

व्याख्याताः ।

तेषां चान्योन्ययोजनम् ॥ ४३ ॥

सङ्करेण त्रिरूपेण संसृष्टया चैकरूपया ।

न केवलं शुद्धा एवैकपञ्चाशद्भेदा भवन्ति यावत् तेषां स्वप्रभेदैरेकपञ्चाशता संशयास्पदत्वेनानुग्राह्यानुग्राहकतयैकव्यञ्जकानुप्रवेशेन चेति त्रिविधेन सङ्करेण परस्परनिरपेक्षरूपयैकप्रकारया संसृष्टया चेति चतुर्भिर्गुणने

त्रिकता । गुणैरिति प्रसिद्धिहेतोः श्लाघ्यता । परामिति, अत एव परमत्वम् । अस्मदिति राक्षसकुलस्यैव । यदि परं देव इति परमप्रवृत्तता । तस्यास्य प्रसिद्धिं परमोद्वेगजननपूर्वकमनुस्मारयितुं वन्दीवेत्युत्तरार्धम् । विवरसप्तकसद्भावात् स्वरसप्तकाविर्भावः ।

तरुणिमनीति । कलाम् एकदेशम् । किञ्चित् तरुणीभवतीत्यर्थः । अग्र इति । पाठक्रियायामग्रे क (र्मणि ? र्तरि) मदनधनुस्सकाशाद् भ्रूप्रान्तयोर्वक्रिमाणमभ्यस्यतीत्यर्थः ।

कर्मभूताधारस्येति । 'उपान्वध्याङ्—' (१.४.४८) इत्यादिना कर्मतां नीतस्याधिकरणस्येत्यर्थः । नन्वेषां त्वादिभ्यः को विशेष इत्यत आह—**तरुणत्व** इतीत्यादि । **कश्चिदिति** । निर्वक्तुमशक्यः सहृदयैकसंवेद्यः स एवातिशयो व्यञ्जकत्वं (प्राप्नोतीत्यर्थः) अथावसरप्राप्तोऽप्यर्थः प्रस्तावान्तर उपयोक्ष्यत इत्याह—**वर्णरचनानामित्यादि** । अपिशब्देनोक्तसमुच्चयं दर्शयति—**अपिशब्दादिति** । रत्नावल्यादिना हि शृङ्गार एव । वेणीसंहरादिना वीर एव । **पूर्वगणितभेदाभ्यामिति** । पदवाक्यप्रकाश्यौ पूर्वभेदौ ।

अथ शुद्धभेदान् निगमयति—**भेदास्तदिति** । तथाहि—अविवक्षितवाच्यस्तावद् द्विरूपः अर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति ।

On the rise of youth, and the brows having received instructions directly from the bow of Cupid, this woman, her tremulous eyes resembling the startled deer, overtops the head of all beautiful ladies. 110

Here is the suggestiveness of the form of (i) the (suffix) '*imanic*' (in '*taruṇimani*') (ii) of the *avyayībhāva*-compound (in '*anumadanadhanuḥ*') and (iii) of the locative used as objective (in '*maulim*'). Of these (uses) though the denotation is the same as that of *taruṇatva*, *dhanuṣaḥ samīpe*, and *maulau vasati* and the like, yet in the expression of these words used here, there is some distinction of form which lends charm, that, indeed, becomes suggestive. Thus the suggestiveness of other forms also should be grasped. The suggestiveness of the syllables and the style will be illustrated later in the treatment of the concept of qualities. The term 'also' (in Kārikā 43ab) implies compositions, drama and the like. Thus, the divisions of *rasa*, etc. are six, including the former two divisions (viz. the suggestion by a word and a sentence).

43c. Thus, the varieties are fiftyone.

They have been already explained.

43d., 44ab. These, when mutually combined by the three-fold commixture and single aggregation—

There are not only fiftyone pure forms but these multiplied by (i) fiftyone subdivisions of their own, being further multiplied by four i.e. (ii) threefold commixture on account of its existence being due to a doubt, to a relationship of principal and subordinate and to cosubstrateness in the same word; and by (iii) the *mutually* independent aggregation of one kind, make up the number indicated by—

विवक्षितान्यपरवाच्येषु असंलक्ष्यक्रम एकः, संलक्ष्यक्रमः शब्दशक्तिमूलो वस्तुरूपोऽलङ्काररूपश्चेति द्विधा, अर्थशक्तिमूलो द्वादशात्मकः, उभयशक्तिमूल एक इति वाक्यप्रकाश्या अष्टादश । उभयशक्तिमूलमन्तरेणान्ये पदप्रकाश्याश्चेति पञ्चत्रिंशत् । अर्थशक्तिमूलः प्रबन्धप्रकाश्योऽपीति सप्तचत्वारिंशत् । रसादयस्तु पदैकदेशेन रचनया वर्णैः प्रबन्धेन च प्रकाश्यन्त इत्येकपञ्चाशच्छुद्धा भेदाः ।

वेदखाब्धिवियच्चन्द्राः (१०४०४)

शुद्धभेदैः सह ।

शरेषुयुगखेन्दवः (१०४५५) ॥ ४४ ॥

तत्र दिङ्मात्रमुदाह्रियते—

खणपाहुणिआ देवर जाआए सुहअ किं पि दे भणिआ ।
रुअइ पडोहरवळहीघरम्मि अणुणिज्जउ वराई ॥१११॥

[Cited in Dhvanyāloka]

अत्रानुनयः किमुपभोगलक्षणेऽर्थान्तरे संक्रमितः, किमनुरणनन्यायेनोपभोग एव व्यङ्ग्ये व्यञ्जक इति सन्देहः ।

स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाता शीकरिणः पयोदसुहृदामानन्दकेकाःकलाः ।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्वं सहे
वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव ॥११२॥

[Cited in Dhvanyāloka]

अथ मिश्रभेदविवेचनं—**तेषां चान्योन्येत्यादि** । त्रिरूपेण द्वयोर्ध्वन्योः सन्देहास्पदत्वमनुग्राह्यानुग्राहकभावः एकव्यञ्जकानुप्रवेशश्चेत्येवमात्मना सापेक्षत्वलक्षणेन सङ्करेण, परस्परनिरपेक्षत्वलक्षणयैकरूपया च संसृष्टया तेषां शुद्धभेदानामन्योन्ययोजनम् । कर्तव्यमिति शेषः ।

तथा तु योजने कृते इयन्तो भेदा भवन्तीत्याह—**वेदखाब्धीति** । वेदाश्चत्वारः, खं शून्यम्, अब्धयश्चत्वारः, वियच्छून्यं, चन्द्र एक इति वैलोम्येन प्रस्तारक्रमः । अत्रायं योजनासंप्रदायः—अत्रार्थान्तरसंक्रमितवाच्योऽर्थान्तरसंक्रमितवाच्यान्तरेण त्रिधा संकीर्यते संसृज्यते चैकधा । एवमत्यन्ततिरस्कृतवाच्यादिभिः सर्वैरेव समं प्रत्येकं संकीर्यते संसृज्यते चेति चतुरुत्तरद्विशतभावमापद्यते । अनेनैव प्रकारेणात्यन्ततिरस्कृतवाच्यादिषु प्रत्येकमेकपञ्चाशता भेदैः सह सङ्करसंसृष्टिभ्यां चतुरुत्तरद्विशतभावमापद्यमानेषु वेदखाब्धिवियच्चन्द्राः चतुरुत्तरचतुश्शताधिका दशसाहस्रिका मिश्रभेदानां भवति ।

शुद्धभेदैरेकपञ्चाशता सह ।

शरेषुयुगखेन्दवः । शराः पञ्च, इषवश्च पञ्च, युगाश्चत्वारः, खं शून्यम्, इन्दुरेकः पञ्चपञ्चाशदुत्तरचतुश्शताधिका दशसहस्री ।

मिश्रभेदानिमान् शुद्धभेदज्ञानेनैव सुज्ञातत्वादतिविततत्वाच्च दिङ्मात्रे-

44c. Moon (1), sky (0), seas (4), sky (0), and the Vedas (4) (10404).

These with the pure forms make up the number indicated by—

44d. Moon (1), sky (0), age (4), arrow (5), and arrow (5) (10455).

There, to illustrate for mere direction :

O brother-in-law, the woman, invited to the function, was told something (improper) by your wife, is weeping in the terrace at the back of the house; go and console the poor soul. 111

Here, whether 'consolation' is transferred to another sense of the nature of 'enjoyment' or in the manner of an echo is it the suggester of the suggested sense of enjoyment itself ? This is the doubt.

There are the clouds which have smeared the sky with their glossy and black lustre and in which the cranes are disporting themselves; there are the dewy winds and the melodious joyful screams of the friends of the cloud (the peacocks)—let all these be. I am, indeed, the hard-hearted Rāma, I endure all that. But ah, how will the daughter of Videha be now ? Oh queen, take heart. 112

णोदाहरति—**खणपाहुणिएत्ति** ।

क्षणप्राघुणिका देवर जायया सुभग किमपि ते भणिता ।
रोदिति गृहपश्चाद्भा (गे ? ग) वलभीगृहेऽनुनीयतां वराकी ॥

क्षण उत्सवः । प्राधुणिका उत्सवार्थमाहूता बन्धुः । क्षणप्राधुणिका तव जायया किमप्यनुचितमुक्ता गृहपश्चाद्भागे कार्पासनीरुजके (?) रोदिति तामिमामनुनयेत्यत्रानुनयो वक्तृबोद्धव्यपर्यालोचनयानुपयुज्यमानः सन् किमुपभोगेऽर्थान्तिरे संक्रामति आहोस्विदनुरणनन्यायोदञ्चितेन व्यञ्जनव्यापारेणोपभोगमेव व्यनक्तीति साधकबाधकाभावात् सन्देहः । न च सन्देहो दोष इति मन्तव्यम् । शोभातिशयप्रतिपत्तये प्रतिभोत्थापितत्वात् । स्वरसा एव हि सन्देहभ्रान्त्यादयो दोषाः ।

एवमर्थान्तरसंक्रमितवाच्यशब्दशक्तिमूलानुरणनरूपवस्तुध्वनी सङ्करत्वेनोदाहृत्यात्यन्ततिरस्कृतवाच्ययोः संसृष्टिमुदाहरति—**स्निग्धश्यामलेति** । **वैदेही तु कथमिति** । कान्ताभिनिवेशदार्ढ्यात् पुरोवस्थितामिवैनां मत्वाह—हहा हा देवीति ।

अत्र लिप्तेति पयोदसुहृदामिति चात्यन्ततिरस्कृतवाच्ययोः संसृष्टिः। ताभ्यां सह रामोऽस्मीत्यर्थान्तरसंक्रमितवाच्यस्यानुग्राह्यानुग्राहकभावेन, रामपदलक्षणैकव्यञ्जकानुप्रवेशेन चार्थान्तरसंक्रमितवाच्यरसध्वन्योः सङ्करः। एवमन्यदप्युदाहार्यम्।

अत्र संसृष्टिं दर्शयति—**अत्र लिप्तेति पयोदसुहृदामिति चेति**। लेपनसुहृत्त्वयोरनुपपत्त्यात्यन्ततिरस्कार इत्यनयोः संसृष्टिः। इत्थं संकीर्णतया संसृष्टतया वा मिश्रस्यापि पुनर्भेदान्तरैः सह सङ्करादिरूपं वैचित्र्यं सम्भवति। तदप्युन्नेयमित्यभिप्रेत्याह—**ताभ्यां सह राम** इत्यादि। रामोऽस्मीत्ययं हि दुःखैकायतनत्वाद्यर्थान्तरसंक्रमितवाच्यः। स हि लेपनसुहृत्त्वादिरूपेणोद्दीपनेनानुगृह्यत इति अनुग्राह्यानुग्राहकभावसङ्करोऽयम्। अथ राम इति योऽयमर्थान्तरसंक्रमितवाच्यः यश्च रामोऽस्मीति द्योतितो विप्रलम्भशृङ्गारस्तयोरेकव्यञ्जकानुप्रवेशः सङ्करः, उभयोरपि रामपदव्यङ्ग्यत्वादित्याह—**रामपदलक्षणैकव्यञ्जकत्वादिना**। **एवमन्यदिति**। यथेह त्रिविधः सङ्करः संसृष्टिश्चार्थान्तरसंक्रमितवाच्यादिध्वनिविषयतयोदाह्रियते, तथास्य ध्वन्यन्तरविषतया सर्वमुदाहरणतोऽवधार्यमित्यर्थः।

अलौकिकं गभीरं च प्रमेयमतिविस्तृतम्।
यच्चतुर्थे तदस्माभिर्हस्तमुक्तामणीकृतम्॥
प्रासङ्गिकमिहावोचत् सान्धिविग्रहिको बहु।
व्याख्येयवस्तुनिष्कर्षः श्रीविद्याचक्रवर्तिनि॥

इति संस्कृतसार्वभौमप्राकृतपृथ्वीश्वरशौरसेनीशिरोमणिमागधीमकरध्वजपैशाचीपरमेश्वरापभ्रंशराजहंसालङ्कारिकचक्रवर्तिध्वनिप्रस्थानपरमाचार्यकाव्यमीमांसाप्रभाकरकविसहृदयशिरोमणिसहजसर्वज्ञपरमयोगीश्वर श्रीमत्त्रिभुवनविद्याचक्रवर्त्तिवंशावतंसमहाकविश्रीविद्याचक्रवर्त्तिकृतौ सम्प्रदायप्रकाशिन्यां काव्यप्रकाशबृहट्टीकायां चतुर्थ उल्लासः।

Here is the aggregation of the two expressed meanings altogether given up in '*lipta*'—smeared—and in the friend of the cloud (*Payoda-suhṛdāṁ*). And with these there is the commixture by the relation of subordinate and principal with 'I am Rāma' with its expressed meaning transferred to another meaning; and also the cosubstrateness in one suggestive word, Rāma, with the suggestion of the expressed meaning transferred into another sense and the *rasa* (i.e. love in separation). In the same manner the others (i.e. mixed varieties of *dhvani*) should also be illustrated.

Thus ends the Fourth Flash in the Poetic Light, namely, the Determination of *Dhvani*.

पञ्चम उल्लासः

एवं ध्वनौ निर्णीते गुणीभूतव्यङ्ग्यस्य प्रभेदानाह—

अगूढमपरस्याङ्गं वाच्यसिद्धयङ्गमस्फुटम्
सन्दिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ॥ ४५ ॥
व्यङ्ग्यमेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदाः स्मृताः ।

कामिनीकुचकलशवद् गूढं चमत्करोति। अगूढं तु स्फुटतया वाच्यायमानमिति गुणीभूतमेव। अगूढं यथा—

**यस्यासुहृत्कृततिरस्कृतिरेत्य तप्त-
सूचीव्यथाव्यतिकरेण युनक्ति कर्णौ ।
काञ्चीगुणग्रथनभाजनमेष सोऽस्मि
जीवन्न सम्प्रति भवामि किमालपामि ॥११३॥**

अत्र जीवन्नित्यर्थान्तरसंक्रमितवाच्यस्य ।

**उन्निद्रकोकनदरेणुपिशङ्गिताङ्गा
गायन्ति मञ्जु मधुपा गृहदीर्घिकासु ।
एतच्चकास्ति च रवेर्नवबन्धुजीव-
पुष्पच्छदाभमुदयाचलचुम्बि बिम्बम् ॥११४॥**

उल्लासयोः सङ्गतिमाह—**एवं ध्वनाविति ।**

अगूढमपरेत्यादि । स्मृताः ध्वन्याचार्येण । यद्धि वाच्यातिशायित्वेन निर्णीतं वस्त्वलङ्कारादिरूपं सावान्तरप्रभेदं व्यङ्ग्यं तद् यदा अगूढत्वादिना निमित्तेन गुणीभावं नीयते तदा अगूढव्यङ्ग्यमपराङ्गव्यङ्ग्यं वाच्यसिद्धयङ्ग-व्यङ्ग्यमस्फुटव्यङ्ग्यं सन्दिग्धप्राधान्यव्यङ्ग्यं तुल्यप्राधान्यव्यङ्ग्यं काक्वाक्षिप्त-व्यङ्ग्यमसुन्दरव्यङ्ग्यमिति गुणीभूतव्यङ्ग्याख्यस्य मध्यमकाव्यस्य भेदाष्टक-मुन्मीलयतीति कारिकार्थः ।

तदेतद् व्याचष्टे—**कामिनीकुचकलशवदित्यादिना। वाच्यायमानमितीति ।** इतिर्हेतौ । स्फुटायमानत्वाद् वाच्यकल्पस्य गुणीभाव एव। **अगूढं यथेति**। साहचर्येणोद्दिष्टस्य प्रतियोगिनो गूढस्य व्यावृत्त्यर्थमगूढमिति प्रकृतस्य सतोऽपि पुनरुपादानम् ।

FIFTH FLASH

Thus having determined the *dhvani* (the best type of poetry), the author now states the varieties of the poetry of subordinated suggestion.

45. (i) Non-concealed, (ii) subservient to another, (iii) subservient to the establishment of the expressed meaning, (iv) indistinct, (v) of doubtful prominence, (vi) of equal prominence, (vii) implied by intonation, and (viii) non-striking.

46ab. These are known to be the eight varieties of the suggested sense rendered subordinate.

The hidden (meaning) produces charm in the manner of the jar-like breasts of damsels. But the one not hidden, being obvious, becomes as if directly expressed. Hence it is subordinate only. To illustrate the non-concealed (i.e. explicit):

The insult inflicted upon me by enemies embroils the ears with a pain, caused by a hot needle. That I am here, good for knitting the strings of a girdle. Though living, I am now no more; what shall I say? 113

Here, 'though living', which has its meaning transferred to another (is explicit).

The black bees, their bodies made tawny by the dust of blossoming red lotus, are singing sweetly in the domestic lakes. And there shines the disc of sun beautiful as the fresh flower of the *Bandhujīva* (Pentapetes Phoenicea), kissing the eastern mountain. 114

यस्यासुहृदिति । कृततिरस्कृतिः, कृता तिरस्कृतिरनेनेति विग्रहः । जीवन्न भवामि न जीवामीत्यर्थः । अत्र जीवत एव न जीवामीत्युक्तिर्मरणसध्रीचीनदारुण-दुःखरूपे स्फुटतरे अर्थान्तरे संक्रामति । अतोऽर्थान्तरसंक्रमितवाच्यस्येहागूढता ।

उन्निद्रेति । अत्र चुम्बीत्यतो बिम्बस्योदयाचलस्पर्शरूपमर्थान्तरं पर्याय-कल्पतया प्रतीयत इत्यत्यन्ततिरस्कृतवाच्यस्येहागूढता ।

अत्र चुम्बीत्यत्यन्ततिरस्कृतवाच्यस्य ।

अत्रासीत् फणिपाशबन्धनविधिः शक्त्या भवद्देवरे
गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः ।
दिव्यैरिन्द्रजिदत्र लक्ष्मणशरैर्लोकान्तरं प्रापितः
केनाप्यत्र मृगाक्षि राक्षसपतेः कृत्ता च कण्ठाटवी ॥११५॥

[Bālarāmāyaṇa]

अत्र केनाप्यत्रेत्यर्थशक्तिमूलानुरणनरूपस्य । तस्याप्यत्रेति युक्तः पाठः ।

अपरस्य रसादेर्वाच्यस्य वा वाक्यार्थीभूतस्याङ्गं रसादि अनुरणनरूपं वा।

अयं स रशनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥११६॥

[Mahābhārata, Śtrīparva, xxiv.19.]

अत्र शृङ्गारः करुणस्य ।

अत्रासीदिति । इहायोध्यां प्रति प्रतिप्रयाणे समनन्तरव्यापादितदशाननस्य दिव्ययानेन सञ्चरमाणस्य सीतां प्रति दाशरथेः समरभूमिनिर्देशाभिनयव्यञ्जिकोक्तिः । अत्र दशास्यनिपातनेन रामभद्रसमाख्यामयत्रिभुवनप्रस्तावे यत् कविना सीतां प्रति रामभद्रस्य योऽयं स्वनिर्देशः केनापीत्युपनिबद्धः तद् वाच्यादपि वाच्यतरायत इत्यर्थशक्तिमूलानुरणनरूपस्य वस्तुध्वनेरगूढता ।

पाठान्तरप्रदर्शनेनागूढतां द्रढयति—**तस्याप्यत्रे**त्यादि ।

अथापराङ्गव्यङ्ग्यविवेचनं प्रस्तौति—**अपरस्य रसादे**रित्यादिना । अपरशब्दविवक्षामुद्घाटयति—**रसादेर्वाच्यस्य वेति** । अत्र हि गुणीभूतव्यङ्ग्यस्य द्वौ प्रतियोगित्वेन विवक्षितौ रसादिरर्थः वाच्यो वाक्यार्थश्चेति । यच्चैतद् गुणीभूतव्यङ्ग्यं तदपि द्विरूपं रसादिकमनुरणनरूपं च । अनुरणनरूपमिति सामान्यस्य वक्ष्यमाणन्यायेन संकोचाद् वस्तुमूलस्यालङ्कारध्वनेरिहासम्भवः ।

अथ रसवदादयोऽलङ्कारा गुणीभूतव्यङ्ग्याभिधाने वक्ष्यन्त इति यत् प्रतिज्ञातं तस्यायमवसर इत्यभिप्रेत्य क्रमेणोदाहरति—**अयं स रशनेति** । अयं स इति रणभूमिनिपतितस्य भूरिश्रवसो भुजप्रत्यभिज्ञा । रशनोत्कर्षी यो हि लौल्येन घणघणायमानमणिकङ्कणो मे रशनां ताच्छील्येनोदग्रथयत् सोऽयं, पीनस्तनविमर्दनः यो मे पीनौ स्तनौ पीनत्वादेव विशेषेणामृन्दात् सोऽयं, य एव नाभिमूरुं जघनमप्यस्पृशत् सोऽयं, य एव चातिचपलो नीवीमप्यपातयत् सोऽय-

Here, 'kissing', which has its meaning altogether abandoned (is explicit).

Here was trapped by the chains of serpents your younger brother-in-law (Lakṣmaṇa) deeply wounded in his chest by the missile. The Droṇa mountain was brought here by *Hanumat*; here by the divine arrows of Lakṣmaṇa the conqueror of Indra (Meghanāda) was sent to the other world, O deer-eyed one, the forest-like necks of the Demon-king (Rāvaṇa) were cut down by some one here. 115

Here, 'by some one here'—this makes the suggestion (of the speaker *Rāma*), which is of the nature of reverberation based on the power of sense, *obvious*. '*Tasyāpyatra*' (even his) would be a better reading (in place of *kenāpyatra*, which makes the suggestion of Rāma too obvious).

(*Aparāṅga* explained) : To another i.e. to rasa and the like or the expressed meaning which has become the purport of the sentence, is subservient the *rasa* and the like or the reverberation.* For example :

This is that hand which used to pull out (my) girdles, caress the plump bosoms, touch the navel, the thighs and the private parts and untie the knot of the (lower) garment. 116

Here the Erotic is subservient to the Pathetic.

मेवेदृशीं दशामनुप्रपन्न इति परित्यक्तलज्जं प्रियभुजमालिङ्ग्य विकलविकलं रुदन्त्या भूरिश्रवसो धर्मपत्न्याः प्रलापोऽयम् । अत्र सम्भोगशृङ्गारः करुणं प्रति भृत्यभूयमापद्यते ।

*In *Aparāṅga* the term '*apara*' refers to *Rasādi* and the expressed meaning principally denoted by a sentence. The term '*aṅga*' refers to the *Rasādi* and the reverberating suggestion. Thus, '*aparāṅga*' is that wherein the *Rasādi* or the reverberating suggestion becomes subservient to *Rasādi* and the expressed sense, principally denoted by a sentence.

कैलासालयफाललोचनरुचा निर्वर्तितालक्तक-
व्यक्तिः पादनखद्युतिर्गिरिभुवः सा वः सदा त्रायताम् ।
स्पर्धाबन्धसमिद्धयेव सुदृढं रूढा यया नेत्रयोः
कांतिः कोकनदानुकारसरसा सद्यः समुत्सार्यते ॥११७॥

अत्र भावस्य रसः ।

अत्युच्चाः परितः स्फुरन्ति गिरयः स्फारास्तथाम्भोधय-
स्तानेतानपि बिभ्रती किमपि न क्लान्तासि तुभ्यं नमः ।
आश्चर्येण मुहुर्मुहुः स्तुतिमिति प्रस्तौमि यावद् भुव-
स्तावद् बिभ्रदिमां स्मृतस्तव भुजो वाचस्ततो मुद्रिताः ॥११८॥
[Pañcākṣarī]

अत्र भूविषयो रत्याख्यो भावो राजविषयस्य रतिभावस्य ।

बन्दीकृत्य नृप द्विषां मृगदृशस्ताः पश्यतां प्रेयसां
श्लिष्यन्ति प्रणमन्ति लान्ति परितश्चुम्बन्ति ते सैनिकाः ।
अस्माकं सुकृतैर्दृशोर्निपतितोऽस्यौचित्यवारांनिधे
विध्वस्ता विपदोऽखिलास्तदिति तैः प्रत्यर्थिभिः स्तूयसे ॥११९॥

कैलासालयेति । गिरिभुवो देव्याः शिवायाः सा पादनखद्युतिः असामान्यानुभावगरिमा पादाङ्गुलीनखद्युतिर्वः सदा त्रायतां युष्मानविरतमभिरक्षतु । सेत्युक्तम् । सा कीदृशी, कैलासालयफाललोचनरुचा निर्वर्तितालक्तकव्यक्तिः कैलासालयस्य शिवस्य फाललोचनरुचा प्रणयापराधप्रणतस्य ललाटनेत्रप्रभापटलेन निर्वर्तितालक्तकव्यक्तिः निष्पादितयावकरसरञ्जनाभिव्यक्तिः । अनेनोत्तरार्धोपनिबध्यमानस्योत्प्रेक्षालङ्कारस्य सामग्री सम्पादिता । यया एतया स्पर्धाबन्धसमद्धियेव नेत्रकान्त्यभ्यसूयया ज्वलन्त्येव सुदृढं रूढा दृढतरं प्ररूढा अत एव कोकनदानुकारसरसा रक्तारवन्दसंवर्तिकासदृशत्वात् सुकुमारा सद्यस्समुत्सार्यते अविलम्बमपनीयते । शिवे प्रणमति प्रसन्ना देवीति वाक्यार्थः । अत्र मानोपबृंहितः सम्भोगशृङ्गारो देवताविषयस्य रतिभावस्याङ्गम् । अतो रसवदलङ्कारो द्विधोदाहृतः पूर्वोदाहरणे रसाङ्गतया इह तु भावाङ्गतयेति ।

अथ प्रेयोलङ्कारोदाहरणम्—अत्युच्चा इति । तथा तेऽपि परितः स्फुरन्तीत्यर्थः । इत्याश्चर्येणेति समन्वयः । अत्र भूविषयस्य भावस्य राजविषय-

May that splendour of the foot-nails of Pārvatī, which has its red paint shine by the light of the eye on the forehead of Śiva (kneeling at her feet) protect you for ever ! This (splendour), kindled as if by rivalry speedily dispels the firmly developed and red lotus-like delightful lustre of Pārvatī's eyes (red due to extreme anger). 117

Here *rasa* is subservient to the emotion (i.e. the poet's devotion to Pārvatī).

All around there rise lofty mountains and vast oceans, you bear all these, yet you don't feel any fatigue; all respects to you. While, with a sense of wonder I was thus repeatedly singing the glories of earth, I was reminded of your arm, O King, which bears it (i.e. which bears the burden of earth), thereupon my mouth was sealed. 118

Here the emotion in relation to earth, namely, loving admiration, is accessory to the emotion of loyalty for the king.

O King, your soldiers, having captured the deer-eyed wives of your foes, hug them, kneel down (to please them), carry them all around and kiss them, under the very nose of husbands and yet you are praised by those same foes thus : "O ocean of propriety, it is on account of good fortune that you have come before our eyes and all our misfortunes have been destroyed." 119

भावाङ्गतया प्रेयस्त्वम् । एवं रसाङ्गतयोदाहर्तव्यम् । यथा 'त्वं मुग्धाक्षी' त्यादौ सखीनां नायिकाविषयो रतिभावः शृङ्गारस्य । इत्थं प्रेयानपि द्विधा ।

अथोर्जस्विसमाहितालङ्कारावेकश्लोकेनोदाहरति—**बन्दीकृत्येति** । भो नृप ते सैनिकाः द्विषां मृगदृशो बन्दीकृत्य परितः श्लिष्यन्ति सोपहासं प्रणमन्ति केशाञ्चलादिषु बलाद् गृह्णन्ति । पश्यतामित्यनादरे षष्ठी । पश्यत एव द्विषोऽनादृत्येत्यर्थः । तैः प्रत्यर्थिभिस्तु सुकृतशतेन दृष्टोऽसि त्वद्दर्शनेन विध्वस्तविपदो वयमभूमेति स्तूयस इत्यत्र सैनिकानां यः सम्भोगशृङ्गाराभासः, यश्च द्विषां वर्ण्यनायकविषयो भावाभासस्तावुभावपि नायकविषयस्योपश्लोकयितृरतिभावस्याङ्गम् । अतो रसाभास इहोर्जस्वी, भावाभासः समाहित इति ज्ञेयम् ।

अत्र भावस्य रसाभासभावाभासौ प्रथमद्वितीयार्धद्योत्यौ ।

अविरलकरवालकम्पनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः ।
ददृशे तव वैरिणां मदः स गतः क्वापि तवेक्षणे क्षणात् ॥१२०॥

अत्र भावप्रशमः ।

साकं कुरङ्गकदृशा मधुपानलीलां
कर्तुं सुहृद्भिरपि वैरिणि ते प्रवृत्ते ।
अन्याभिधायि तव नाम विभो गृहीतं
केनापि तत्र विषमामकरोदवस्थाम् ॥१२१॥

अत्र त्रासस्योदयः ।

असोढा तत्कालोल्लसदसहभावस्य तपसः
कथानां विस्रम्भेष्वथ च रसिकः शैलदुहितुः ।
प्रमोदं वो दिश्यात् कपटवटुवेषापनयने
त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः ॥१२२॥

अत्रावेगधैर्ययोः सन्धिः ।

पश्येत् कश्चिच्चल चपल रे का त्वराहं कुमारी
हस्तालम्बं वितर हहहा व्युत्क्रमः क्वासि यासि ।

अथ भावशान्त्यादीनामपि गुणीभावेनालङ्कारता—**अविरलेति** । कम्पनैरित्यादिरुपलक्षणे तृतीया । तदुपलक्षितो मदस्तवेक्षणे सति क्षणात् पक्वापि गत इति मदरूपभावप्रशमो नायकविषयोपवर्णयितृरतिभावस्याङ्गमित्यलङ्कार एव ।

साकं कुरङ्गकेति । सुहृद्भिर्वधूभिश्चापि साकं मधुपानाय प्रवृत्ते वैरिणि केनचित् त्वत्सनामार्थान्तरप्रतिपादनायापि त्वन्नाम्नि गृहीते विषमावस्थाभूदिति योऽयं त्रासोदयः स रतिभावस्याङ्गम् ।

असोढा तत्कालोल्लसदिति । असहभावोऽशक्तता दौर्बल्यमित्यर्थः । तत्कालमुल्लसत्यविलम्बितमाविर्भवत्यसहभावो यत्र तस्य देव्युग्रतपसोऽसोढा । तां तथा शरीरनिरपेक्षं तपस्तप्यमानां सोढुमपारयन्नित्यनेन कपटवटुवेषापनयने त्वराहेतुरुक्तः । अथ शैलदुहितुः कथानां विस्रम्भे रसिक इति तु वेषापनयनमान्द्ये । युगपदभियुक्त इति वेषापनयनविषययोस्त्वरामान्द्ययोस्तुल्ययोगिता ।

अत्रावेगधैर्ययोरिति । आवेगस्त्वराभिव्यङ्ग्यः । धैर्यं शैथिल्याभिव्यङ्ग्यम् । सन्धिः सम्भूयवृत्तिता । स भावस्य गुणीभवति ।

Here, the semblance of *rasa* and the semblance of emotion, implied in the first half and the second half of the stanza (respectively) are subservient to the (poet's) emotion (of admiration for the king).

That pride of your enemies which repeatedly manifested itself in the continuous brandishing of swords, in frowns, in threats and in shouts of defiance, has instantly vanished at your sight. 120

Here, the *pacification of the emotion* (of pride is subservient to the poet's emotion of admiration for the king).

O Lord, even when your enemy was engaged in festivity of drinking in the company of deer-eyed woman and his friends, your name mentioned by some, though in a different sense, made the situation tense. 121

Here *the rise of fear* (is subservient to the poet's emotion of admiration for the king).

Impatient at the then enfeebling state of Pārvatī's penance and also delighted at her confident intimations of love, Śiva was seized simultaneously by both haste and languor in removing the apparel of a disguised *Brahmacārin*. May He, the Destroyer of Cupid, bestow happiness on you. 122

Here is the co-existence of excitement and steadiness (which is subservient to the poet's emotion).

"Oh, somebody might see us, Move off, O impetuous one; what is the hurry ? I am a maiden. Offer me the support of your arms. Alas ! Alas ! this transgression of propriety !

पश्येत् कश्चिदिति । भोः पृथ्वीपते भवद्विद्विषोऽरण्यवृत्तेः कन्या कञ्चिद-भिधत्ते एवमुक्तिप्रत्युक्तिपरिपाटीमारचयतीत्यर्थः । पश्येत् कश्चिदिति सन्त्रासन-परस्योक्तिः । त्वामरण्यवृत्तिं कश्चित् पश्येदित्युक्ता तु प्रतिवक्ति—**चल चपल रे** इति । यदि पश्येत् तर्हि चपल एहि पलायावह इत्यर्थः । अथ तस्यो-पहासपरस्योक्तिः—**का त्वरेति** । अहो ते भीरुतेति यावत् । सा प्रत्याह—**अहं कुमारीति** । भीरोर्मे त्वरैव स्वभावः क इहोपहास इति यावत् । स पुनर्धौ-र्त्येनाह—**हस्तालम्बं वितरेति** । यदि त्वरया चलितव्यं तर्हि देहि हस्तालम्ब-

इत्थं पृथ्वीपरिवृढ भवद्विद्विषोऽरण्यवृत्तेः
कन्या कञ्चित् फलकिसलयान्याददानाभिधत्ते ॥१२३॥

अत्र शङ्कासूयाधृतिस्मृतिश्रमदैन्यविबोधौत्सुक्यानां शबलता। एते च रसवदादयोऽलङ्काराः। यद्यपि भावोदयभावसन्धिभावशबलत्वानि नालङ्कारतयोक्तानि, तथापि कश्चिद् ब्रूयादित्येवमुक्तम्।

यद्यपि स नास्ति कश्चिद् विषयः यत्र ध्वनिगुणीभूतव्यङ्ग्ययोः स्वप्रभेदादिभिः सह सङ्करः संसृष्टिर्वा नास्ति, तथापि प्रधानेन व्यपदेशा भवन्तीति क्वचित् केनचिद् व्यवहारः।

जनस्थाने भ्रान्तं कनकमृगतृष्णाहृतधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम्।
कृतालङ्काभर्तुर्वदनपरिपाटीषु घटना
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ॥१२४॥
[Bhaṭṭa Vācaspati, acc. to Sūktimuktāvalī]

मित्युक्तायाः प्रत्युत्तरं—हहहा व्युत्क्रम इति। हस्तालम्बं दातुमर्हः सन् कुतो मां याचस इत्यर्थः। अथ चलिते तत्र सैवाह—क्वासि यासीति। असीति त्वमर्थे निपातः।

अत्र शङ्कासूयेति। पश्येदित्यनेन हि वाक्येन शङ्काभिव्यज्यते। चल चपलेत्यसूया। का त्वरेति धृतिः। अहं कुमारीति स्मृतिः। हस्तालम्बमित्यौत्सुक्यम् हहहेति श्रमदैन्ये। व्युत्क्रम इति विबोधः। क्वासि यासीत्यौत्सुक्यम्। अत्रैषां शबलता भावस्याङ्गम्। अथ रसवदादयोऽलङ्कारा वक्ष्यन्त इति यत् प्रतिज्ञातं तत् कृतमित्यनुस्मारयति—एते च रसवदादयोऽलङ्कारा इति। अतो रसभावादीनां यदा प्राधान्यं तदा ध्वनित्वं, यदा त्वङ्गभावस्तदालङ्कारत्वमेवेति सिद्धम्। ननु रसादिचतुष्टयस्य गुणीभावे रसवदाद्यलङ्कारत्वं प्रसिद्धं, भावोदयादयस्तु नालङ्कारतया प्रसिद्धाः, तत् कथमेवमुक्तमित्यत आह—यद्यपि भावोदयेत्यादि कश्चिद् ब्रूयादिति। उक्तं ह्यलङ्कारसर्वस्वकृता—"भावोदयभावसन्धिभावशबलताश्च पृथगलङ्कारा" इति। ननु यानि ध्वन्युदाहरणानि तत्रापि गुणीभूतव्यङ्ग्यत्वमनुपश्याम गुणीभूतव्यङ्ग्योदाहरणेषु च ध्वनित्वम्, अतः कथमियं विभागसिद्धिरित्यत आह—यद्यपि स नास्तीत्यादि। स्वप्रभेदादिभिरित्यादिशब्दाद् ध्वनेर्गुणीभूतव्यङ्ग्यप्रभेदैरलङ्कारैः सालङ्कारैः स्वप्रभेदैः सालङ्कारैर्गुणीभूतव्यङ्ग्यप्रभेदैश्चेत्यर्थः।

Where are you ? Whither are you going, O monarch of the earth ?—Thus the daughter of your forest-dwelling enemy speaks to somebody while plucking fruits and sprouts. 123

Here is the variegation of Misgiving, Envy, Steadiness, Recollection, Fatigue, Wretchedness, Awaking and Longing, (which are subordinate to the poet's admiration for the king). These are the *Rasavat* and other figures. Though the rise of emotion, the co-existence of emotions and the variegation of emotions are not spoken of as figures, yet some one might describe them as such, hence the above statement.

Though there is no single case where there is no commixture or collocation of dhvani and poetry of subordinated suggestion and their respective varieties, yet in accordance with the principle that names go by prominence, a particular name is given to a particular case.

I have wandered among men's haunts (in the Janasthāna of the Daṇḍaka forest), with my mind deluded with the mirage of gold (by the desire for the golden deer); at every step, with fearful eyes, I have cried "Please give me" (O Sītā); enough I have looked to the faces of meanly lords (I have hurled my arrows at serried heads of the king of Laṅkā); thus I have acquired Rāma-hood, and yet I have not obtained riches leading to future welfare (I have not obtained the mother of Kuśa and Lava). 124

अथ शब्दशक्तिमूलस्यालङ्कारध्वनेर्गुणीभावं दर्शयति—**जनस्थान** इति। जनस्थाने जनसन्निवेशे जनस्थानाख्ये दण्डकारण्यपरिसरे च। कनकमृगतृष्णा धनाशारूपो मोह इत्यर्थः, कनकमृगे जिघृक्षाकौतुकं च। वैदेहीति मैथिलीति, अन्यदा तु देहि वितर, वै इति प्रसिद्धो निपातः। लङ्काभर्तुर्दशग्रीवस्य, अलं पर्याप्तं काभर्तुर्दुष्प्रभोश्च। वदनपरिपाट्यामिषुघटना शरसंयोजनं, वदनपरिपाटीषु घटना याचनार्थं वदनसविधे वृत्तिश्च। कुशलवसुता कुशलमबाधितं वसु येषां तेषां भावः, कुशलवौ सुतौ यस्याः सा जानकी च।

अत्र शब्दशक्तिमूलानुरणनरूपो रामेण सहोपमानोपमेयभावो वाच्यतां नीतः ।

आगत्य सम्प्रति वियोगविसंस्थुलाङ्गी-
मम्भोजिनीं क्वचिदपि क्षपितत्रियामः ।
एतां प्रसादयति पश्य शनैः प्रभाते
तन्वङ्गि पादपतनेन सहस्ररश्मिः ॥१२५॥

अत्र नायकवृत्तान्तोऽर्थशक्तिमूलो वस्तुरूपो निरपेक्षरविकमलिनीवृत्तान्ताध्यारोपेणैव स्थितिः ।

वाच्यसिद्ध्यङ्गं यथा—

अभिमरतिमलसहृदयतां प्रलयं मूर्छां तमः शरीरसादम्
मरणं च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम् ॥१२६॥

[Cited in Dhvanyāloka, II and III Uddyotas]

अत्र हालाहलं व्यङ्ग्यं भुजगरूपणस्य वाच्यस्य सिद्धिकृत् ।

यथा वा—

गच्छाम्यच्युत दर्शनेन भवतः किं तृप्तिरुत्पद्यते
किन्त्वेवं विजनस्थयोर्हतजनः सम्भावयत्यन्यथा ।
इत्यामन्त्रणभङ्गिसूचितवृथावस्थानखेदालसा-
माश्लिष्यन् पुलकोत्कराञ्चिततनुर्गोपीं हरिः पातु वः ॥१२७॥

अनुरणनरूप इति, दाशरथिवृत्तान्तस्याप्राकरणिकत्वात् । वाच्यतां नीतः, मया रामत्वमिति शब्देनोपादानात् ।

अर्थशक्तिमूलस्य वस्तुध्वनेर्दर्शयति—**आगत्य सम्प्रतीति** । पादपतनं किरणावतारः प्रणामश्च ।

निरपेक्षेति । अङ्गभूतव्यङ्ग्यमन्तरेण वाच्यसिद्धिर्दर्शिता । सापेक्षत्वे हि वाच्यसिद्ध्यङ्गता स्यात् ।

एवमपराङ्गव्यङ्ग्यमसंलक्ष्यक्रमतया संलक्ष्यक्रमतया चोदाहृत्य क्रमप्राप्तमुदाहर्तुमाह—**वाच्यसिद्ध्यङ्गं यथेति** ।

अभिमरतिमिति । अभिरयथावद्दर्शिता । अरतिरनवस्था । प्रलयोऽक्षवृत्तिविलयः । मूर्छा तासामेव स्तम्भः । तमो व्यामोहः । अत्र जलदस्य भुजगत्वरूपणलक्षणं वाच्यं जलस्य भ्रम्यादिकारिहालाहलत्वप्रतीतिमन्तरेण **न** सिध्यतीति वाच्यसिद्ध्यङ्गता ।

गच्छामीति । भो अच्युत तव दर्शनेन तृप्तिरुत्पन्नेति **न** गच्छामि, अपि त्वेवं विजनस्थयोरावयोः सतोर्हतोऽयं जनोऽन्यथा सम्भावयेदिति गमनप्रश्नव्याजेन सूचितं यद् वृथावस्थानं सम्भोगमन्तरेण विफला स्थितिस्तन्निबन्धनेन

Here (speaker's) similitude with Rāma, implied by the resonance based on the power of words, has been made subordinate to the expressed sense.

O Slender bodied one, look, the thousand-rayed Sun, who has passed the whole night somewhere else, now returns to gently propitiate this lotus, (his lady-love), emaciated in separation, by falling at her feet in the morning. 125

Here the behaviour of the lovers, grounded in the force of meaning, is of the nature of subject-matter (*vastu*) which stands merely as an imposition upon the independent behaviour of the Sun and the lotus (i.e. from the fact of lotus blossoming on the sun-rise).

To illustrate the suggestion *subservient to the establishment of the expressed meaning* :

The rain-water (deadly poison) of the cloud-snakes perforce brings upon women in separation, reeling, disgust, lassitude, insensibility, swoon, stupor, sinking of the body and even death. 126

Here the suggested meaning of deadly poison merely serves to complete the expressed metaphor in (the term) serpent.

Or as in :

"I am leaving, O Acyuta (immovable one, Kṛṣṇa). Have I any pleasure merely by your sight ? But if we remain together in the solitary place, wretched people will construe it quite otherwise." Thus the young cowherdess, who was sunken in languor by her futile stay indicated by the special form of address, was being embraced by Kṛṣṇa, his body thrilled with joy.—May he protect you.* 127

खेदेनालसां गोपीमाश्लिष्यन् पुलकितो हरिः अभिरक्षतु व इत्यत्राच्युतादिपदैर्यद् व्यज्यतेरिरंसालक्षणं वस्तु, तद् वृथावस्थानादिलक्षणवाच्यसिद्धावङ्गम् ।

* The first half of the stanza is the speech of the cowherdess and the latter half is that of the poet.

अत्राच्युतादिपदव्यङ्ग्यमामन्त्रणेत्यादिवाच्यस्य। एतच्चैकत्रैकवक्तृगतत्वेनापरत्र भिन्नवक्तृगतत्वेनेत्यनयोर्भेदः।

अस्फुटं यथा—

अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता।
नादृष्टेन न दृष्टेन भवता विद्यते सुखम् ॥१२८॥

अत्रादृष्टो यथा न भवसि, वियोगभयं च यथा नोत्पद्यते, तथा कुर्या इति क्लिष्टम्।

सन्दिग्धप्राधान्यं यथा—

हरस्तु किञ्चित्परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥१२९॥

[Kumārasaṁbhava, IV. 67]

अत्र परिचुम्बितुमैच्छदिति किं प्रतीयमानं, किं विलोचनव्यापारणं वाच्यं प्रधानमिति सन्देहः।

तुल्यप्राधान्यं यथा—

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।
जामदग्न्यस्तु वो मित्रमन्यथा दुर्मनायते ॥१३०॥

[Mahāvīracarita, II. 10]

अत्र जामदग्न्यः सर्वेषां क्षत्रियाणामिव रक्षसां क्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यम्।

उदाहरणद्वयस्य गूढं प्रयोजनमुद्घाटयति—**एतच्चैकत्रेत्यादि**। अमिमरतिमित्यादावेकवक्तृगतत्वेन व्यङ्ग्यं वाच्यसिद्ध्यङ्गं, गच्छामीत्यादौ तु भिन्नवक्तृगतत्वेन।

अथास्फुटप्रस्तावः—**अदृष्टे दर्शनेति**। अत्र ह्युत्कण्ठोदयान्नादृष्टेन सुखं, विच्छेदभयसम्भवान्न दृष्टेन च त्वया सुखमित्युभयथापि दुःखहेतुरसीति स्फुटं प्रतीयते।

विवक्षितोऽर्थः पुनरस्फुट एवेति दर्शयति—**अत्रादृष्टो यथेत्यादि**। क्लिष्टं कष्टमस्फुटमित्यर्थः।

अथ सन्दिग्धप्राधान्यं—**हरस्त्विति**। अत्र बिम्बफलाधरत्वादिवाच्य-

Here the suggestion by the term *Acyuta* and the like merely *serves to complete* the expressed sense in 'who was . . . special form of address' (the idea expressed in the third line of the verse).

The difference between the two illustrations (cited above) is in the fact that in the former it relates to one speaker, while in the latter it relates to two different speakers.

To illustrate *the indistinct* :

When you are not seen, there is longing to see you, and while you are seen there is fear of separation. Thus, there is no happiness whether you are seen or not. 128

Here, you should act in such a way that you may not remain unseen, nor there may be any fear of separation—this is abstruse.

To illustrate the (suggestion of) 'doubtful prominence' :

But Śiva, his equipoise slightly disturbed, like the ocean when the moon is about to rise, turned his eyes on Umā's face whose lower lip resembled the *bimba* (the gourd of the Momordica Monadelpha). 129

Here it is doubtful whether the suggested meaning—he wished to kiss her—or the expressed meaning—the turning of eyes (towards Umā)—is prominent.

To illustrate the suggestion of *equal prominence* :

Avoiding insult of a Brāhmaṇa will be to your own well-being or else a friend like Paraśurāma becomes displeased. 130

Here the suggested sense, viz. Paraśurāma will destroy all the demons in the same manner as he did the *Kṣatriyas*, and the expressed sense have equal prominence.

महिम्ना किं विलोचनव्यापारेण चुम्बनेच्छा व्यज्यते, आहोस्विद् विलोचनव्यापारणलक्षणो वाच्य एव रत्यनुभाव उपनिबद्ध इति साधकबाधकाभावात् सन्देहः । अतो व्यङ्ग्यं सन्दिग्धप्राधान्यम् ।

तुल्यप्राधान्यं दर्शयति — **ब्राह्मणेति** । अत्र रावणचरं प्रति भार्गवोक्ता-वुत्तरार्धे यद् रक्षःक्षयसूचनलक्षणं व्यङ्ग्यं, यश्च प्रथमार्धवाक्यार्थरूपो ब्राह्मणानुसरणं श्रेयस इत्येवंरूपो वाच्योऽर्थः, द्वयोरप्यनयोर्हि प्राधान्यं तुलया वर्तते ।

काक्वाक्षिप्तं यथा—

मथ्नामि कौरवशतं समरे न कोपाद्
दुश्शासनस्य रुधिरं न पिबाम्युरस्तः ।
सञ्चूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन ॥१३१॥

[Veṇīsaṁhāra, I. 15]

अत्र मथ्नाम्येवेत्यादि व्यङ्ग्यं वाच्यनिषेधसहभावेन स्थितम् ।

असुन्दरं यथा—

वाणीरकुडुङ्गुड्डीणसउणिकोलाहलं सुणन्तीए ।
घरकम्मवावडाए वहुए सीअन्ति अङ्गाइ ॥१३२॥

[Cited in Dhvanyāloka, II]

अत्र दत्तसङ्केतः कश्चिल्लतागहनं प्रविष्ट इति व्यङ्ग्यात् सीदन्त्यङ्गानीति वाच्यं सचमत्कारम् ।

एषां भेदा यथायोगं वेदितव्याश्च पूर्ववत् ॥ ४६ ॥

यथायोगमिति ।

व्यज्यन्ते वस्तुमात्रेण यदालङ्कृतयस्तदा ।
ध्रुवं ध्वन्यङ्गता तासां काव्यवृत्तेस्तदाश्रयात् ॥

[Dhvanyāloka, II. 29]

इति ध्वनिकारोक्तदिशा वस्तुमात्रेण यत्रालङ्कारो व्यज्यते न तत्र गुणीभूतव्यङ्ग्यत्वम् ।

काक्वाक्षिप्तव्यङ्ग्यमुदाहरति—**मथ्नामि कौरवेत्यादि** ।

वाच्यनिषेधसहभावेनेति काक्वाक्षिप्तता दर्शिता । निषेधकाकुर्हीयम् । काक्वैव वाच्यनिषेध आक्षिप्यते ।

अथासुन्दरं—**वाणीरेति** ।

वानीरकुञ्जोड्डीनशकुनिकोलाहलं शृण्वन्त्याः ।
गृहकर्मव्यापृताया वध्वाः सीदन्त्यङ्गानि ॥

अत्रापि 'ग्रामतरुणमि'तिवद् व्यङ्ग्यस्यासुन्दरतेत्याह—**अत्र दत्तसङ्केतः कश्चिदिति** । त एते शुद्धा भेदाः । अनेन प्रायशः सप्रभेदस्य सर्वस्यैव ध्वनेर्गुणीभावो दर्शितः । तथा हि—अगूढप्रस्तावे लक्षणामूलावुभावर्थशक्तिमूलो वस्तुध्वनिश्चोपलक्षणत्वेन प्रदर्शितौ । अथापराङ्गव्यङ्ग्यप्रस्तावे रसादिको रसाद्यङ्गत्वेन, अनुरणनरूपं च वाच्याङ्गत्वेन सावान्तरवैचित्र्यप्रपञ्चमुदाहृतम् । तथा हि—रसो रसस्य, रसो भावस्य, भावो भावस्याङ्गत्वेनोदाहृतः । भावस्य रसाङ्गत्वं

To illustrate the suggestion *implied by intonation* :

I shall not wrathfully batter the hundred Kauravas in war; I shall not suck the blood of Duśśāsana from his chest; I shall not pound with my club the thighs of Duryodhana; let your king enter into a pact for peace. 131

Here the suggested sense (effected through the tonal change),--I will, indeed, batter—remains in intimate connection with the expressed denial (the suggestion is conveyed simultaneously with what is expressed).

To illustrate the *non-striking* :

As the daughter-in-law hears the twitter of the birds flying away from the *vetasa*-bower, being busy in her household work, her limbs begin to droop. 132

Here the expressed idea in the limbs begin to droop, is more striking than the suggested sense that some one (the lover) who was given an appointment to meet (her) has entered the thicket of creepers.

46cd. The Varieties of these (eight kinds of subordinated suggestion) should be understood, as far as applicable, in the manner of the former case (of the suggestive poetry).

'As far as applicable' means :

When figures are suggested only by the matter itself, then they are invariably the part of suggestion; for the very procedure of poetry rests upon those, i.e. the suggested poetic figures.

In the manner thus shown by the author of *Dhvani*, wherever the poetic figure is suggested only by the matter itself, there *is no subordination of* suggestion.

स्फुटमिति नोदाहृतम् । अथ भावस्य रसाभासभावाभासौ चेति रसवदाद्यलङ्कारत्वेन त एते दर्शिताः । भावप्रशमादयोऽपि पृथगलङ्कारत्वेन । अथ वाच्याङ्गव्यङ्ग्यादिषु वस्तुमूलालङ्कारध्वनिव्यतिरिक्ताः सर्व एवानुरणनरूपाः प्रदर्शिता इति ।

एषां संकरसंसृष्टी प्राग्वदेवेत्याह—**एषां भेदा** इति ।

ननु यथायोगमित्युच्यते, का योग्यतेति शङ्कित्वा योग्यतां ध्वनिकारसंवादं पुरस्कृत्य विवेचयति—**व्यज्यन्ते वस्तुमात्रेणे**त्यादिना । वस्तुमात्रेण शब्दशक्तिमूलतयार्थशक्तिमूलतया वा वस्तुमात्रेण व्यज्यमानानामलङ्कृतीनां ध्वन्यङ्ग-

सालंकारैर्ध्वनेस्तैश्च योगः संसृष्टिसङ्करैः ।

सालङ्कारैरिति तैरिवालङ्कारैः अलङ्कारयुक्तैश्च तैः । तदुक्तं ध्वनिकृता—

सगुणीभूतव्यङ्ग्यैः सालङ्कारैः सह प्रभेदैः स्वैः ।
सङ्करसंसृष्टिभ्यां पुनरप्युद्द्योतते बहुधा ॥

[Dhvanyāloka, III. 43]

इति ।

अन्योन्ययोगादेवं स्याद् भेदसंख्यातिभूयसी ॥ ४७ ॥

एवमनेन प्रकारेणावान्तरभेदप्रभेदगणनेति प्रभूततरा गणना तथाहि—शृङ्गारस्यैव भेदप्रभेदगणनायामानन्त्यं, का गणना सर्वेषाम् ।

सङ्कलनेन पुनरस्य ध्वनेस्त्रयो भेदाः, व्यङ्ग्यस्य त्रिरूपत्वात् । तथाहि—किञ्चिद् वाच्यतां सहते, किञ्चित् त्वन्यथा । तत्र वाच्यतासहमविचित्रं विचित्रमिति । वस्तुमात्रमविचित्रं, विचित्रं त्वलङ्काररूपम् । यद्यपि प्राधान्येन तदलङ्कार्यं, तथापि ब्राह्मणश्रमणन्यायेन तथोच्यते। रसादिलक्षणस्त्वर्थः स्वप्नेऽपि न वाच्यः । स हि रसादिशब्देन शृङ्गारादिशब्देन वाभिधीयते, न चाभिधीयते । तत्प्रयोगेऽपि विभावाद्यप्रयोगे तस्याप्रतिपत्तेः, तदप्रयोगेऽपि

तामन्तरेण काव्यतैव न स्यादिति ध्वनिकारनिरूपितनीत्या तेषु भेदेषु गुणीभूतव्यङ्ग्यता न संभवतीति तदपोहनाय यथायोगमित्युक्तमिति यावत् ।

तदितरेषां तु गुणीभूतव्यङ्ग्यप्रभेदानां सङ्करसंसृष्टिभ्यां भेदप्रपञ्च उन्मीलनीय इत्याह—**सालङ्कारैरिति ।**

सालङ्कारतां द्विधोपदर्शयति—**तैरिवालङ्कारैरलङ्कारयुक्तैश्च तैरिति ।** अत्रायमाशयः—य एते गुणीभूतव्यङ्ग्यास्तेषां शुद्धैः सङ्करसंसृष्टिरूपैश्च प्रभेदैर्ध्वनिभेदानां शुद्धानां सङ्करसंसृष्टिरूपाणां च सङ्करसंसृष्टिरूपाभ्यां च योगः । यथा च गुणीभूतव्यङ्ग्यैस्तथालङ्कारैरपि, अलङ्कारसंकीर्णैस्तत्संसृष्टैर्वा गुणीभूतव्यङ्ग्यैश्च ध्वनेर्योगोऽनुसर्तव्य इति ।

अत्र संवादः—**सगुणीभूतव्यङ्ग्यैरिति** । उद्द्योतत इति । अत्र ध्वनिभेदः कर्ता ।

यद्येवं किमत इत्याह—**अन्योन्ययोगादिति** । एवमन्योन्ययोगान्निमित्ताद् भेदप्रभेदानामतिभूयसी संख्या ।

प्रभूततरेति ईयसुनोऽर्थः । तामेवातिप्रभूततरतामनुस्मारयति—**तथा हीति सर्वेषामिति** । रसान्तराणां वस्त्वलङ्कारध्वनीनां चेत्यर्थः । तर्हि अनवच्छिन्नाः केनोपाधिनावच्छिद्य व्यवह्रियन्त इत्यत आह—**सङ्कलनेन पुनरिति** । सङ्कलना

47ab. There is a combination of *Dhvani* (or poetry with principal suggestion) with (i) figures as well as with (ii) those having figures, (iii) intermingled and (iv) collocated varieties of *Subordinated Suggestion.*

Sālaṅkāraiḥ—this means figures (*Vācyālaṅkāras*), and the figurative varieties of subordinated suggestion to which the former resemble. As it is stated by the author of *Dhvani* :

It (i. e. *Dhvani* or poetry with principal suggestion) appears in diverse ways with its several varieties of subordinated suggestion, figures, its own sub-varieties, their intermixture and collocation.

47 cd. Thus by mutual permutation the number of its varieties would be very large.

Thus—in the manner indicated above—by counting the divisions and their sub-divisions the number would be over-abounding. For example, even in counting the varieties and subvarieties of the Erotic sentiment itself there is endlessness, not to speak of the number of all others.

However, in brief, there are three kinds of this *Dhvani* (suggestive poetry) on account of the suggested sense being of three types (i. e. *Vastu*, *Alaṅkāra* and *Rasa*). To elucidate the point, some are such as can be directly denotated, while some are otherwise.

There, the denotable is non-fanciful and the fanciful. The bare face is non-fanciful, the fanciful is the poetic figure. Though it (i.e. suggested figure) is the embellished one (*alaṅkārya*) yet it is known by the same designation according to the maxim that a Buddhist monk, who was formerly a Brāhmaṇa is called a Brāhmaṇa-monk. The category designated as *rasa* etc. however, can never be denotated, even in a dream. It could be expressed either by (generic) words *rasa*, etc. or by particular words, erotic etc.; but it is never expressed thus.

संग्रहः । त्रिरूपत्वादिति संकलने हेतुः । तामेव त्रिरूपतां विविच्य दर्शयति—तथा हीत्यादिना । **वाच्यतां सहत** इति । यद् वस्तुरूपमलङ्काररूपं च व्यङ्ग्यं तद्धि

विभावादिप्रयोगे प्रतिपत्तेश्चेत्यन्वयव्यतिरेकाभ्यां विभावाद्यभिधानद्वारेणैव प्रतीयत इति निश्चीयते। तेनासौ व्यङ्ग्य एव, मुख्यार्थबाधाद्यभावान्न पुनर्लक्षणीयः।

अर्थान्तरसङ्क्रमितात्यन्ततिरस्कृतवाच्ययोर्वस्तुमात्ररूपं व्यङ्ग्यं विना लक्षणैव न भवतीति प्राक् प्रतिपादितम्।

शब्दशक्तिमूले तु नियन्त्रणेनानभिधेयतयार्थान्तरस्य, तेन सहोपमादेरलङ्कारस्य च निर्विवादं व्यङ्ग्यत्वम्।

अर्थशक्तिमूलेऽपि विशेषे सङ्केतः कर्तुं न युज्यत इति सामान्यरूपाणां

वाच्यतयापि निबन्धुं शक्यते। **किञ्चित् त्वन्यथेति**। यत्तु रसभावादिरूपं न हि तद् वाच्यतां सहते। तथापि कथं त्रिरूपतेत्यत आह—**तत्र वाच्यतासहमि**त्यादि। अत्रायं सम्प्रदायः—यद्धि लोके जातिगुणादि वस्तु तदेव कविकल्पितवैचित्र्यमन्तरेण प्रतीतं वस्तुमात्रमुच्यते, वैचित्र्यसध्रीचीनतया त्वलङ्कार इति। व्यङ्ग्यदशायामलङ्कार्यस्य सतोऽप्यलङ्कारव्यपदेशो भूतपूर्वगत्येत्यनुस्मारयति—**यद्यपि प्राधान्येनेति**। इत्थं व्यङ्ग्यस्य त्रैरूप्यात् त्रिधा ध्वनिभेदसङ्कलनेति यावत्। ननु रसादिरर्थो वाच्यतां न सहत इति कथमेतदित्यत आह—**स हि रसादिशब्देने**त्यादि। यदि रसादिरभिधीयते, सामान्यवाचिना रसभावादिशब्देन विशेषवाचिना वा शृङ्गाररतिभावादिशब्देनाभिधीयते, न चाभिधीयते, विभावादिप्रयोगैकान्वयव्यतिरेकानुविधानादित्यर्थः। यत इत्थं नाभिधीयते, तेनासौ व्यङ्ग्य एव। ननु जीवन्त्यां लक्षणायां कथं व्यङ्ग्यतैवेति प्रतिज्ञायत इत्यत आह—**मुख्यार्थेति**।

इत्थं रसादेर्व्यङ्ग्यतामविवादसिद्धामुपदर्श्य लक्षणामूलस्य वस्तुध्वनेरपि तथासिद्धिं दर्शयति—**अर्थान्तरसङ्क्रमिते**त्यादिना। **वस्तुमात्ररूपमिति**। प्रयोजनस्य वस्तुरूपत्वाल्लक्षणामूलध्वनौ वस्तुमात्रम्। **व्यङ्ग्यं विना लक्षणैव न भवतीति**। मुख्यपरित्यागामुख्याश्रयणादिप्रयासाश्रयणमपि लक्षणायां प्रयोजनाय। यदि तदेव प्रयोजनं नास्ति, तदा मुख्यपरित्यागादेरयुक्तत्वाल्लक्षणैव न भवतीति प्रतिपादितं विवेचितं, द्वितीय इति शेषः।

अथ शब्दशक्तिमूलानुरणनरूपे ध्वनौ वस्त्वलङ्काररूपतया यद् द्विरूपं व्यङ्ग्यं तस्य व्यङ्ग्यतायां विवाद एव नास्तीत्याह—**शब्दशक्तिमूले त्विति**। **नियन्त्रणेनेति**, अभिधाया इति शेषः। प्रकरणादिना अभिधाया नियन्त्रणादिति यावत्। अनभिधेयस्य अवाच्यस्य, उपलक्षणं चैतत्, मुख्यार्थबाधाद्यभावाल्लक्षयितुमप्यशक्यस्य। अर्थान्तरस्य प्राकरणिकेतरस्य। अनेन वस्तुध्वनावप्यविवादा सिद्धिर्दर्शिता। अथालङ्कारध्वनेरपि दर्शयति—**तेन सहोपमादेरि**त्यादि।

Even if these were used, in the absence of the use of determinants and the rest, it (i.e. *rasādi*) is not apprehended. On the other hand if these (words) are not used and the determinants etc. are employed there is (due) apprehension (of *rasa* etc.). Thus on the basis of considerations, both positive and negative, it follows that it (*rasādi*) is apprehended only through the expression of determinants, etc. Hence, it (*rasa* and the like) can be only suggested and not even indicated for want of incompatibility of the primary meaning and other conditions (required for Indication).

It has been already expounded that there cannot be Indication itself without the suggestion of bare fact in which the expressed is either transferred into another meaning or completely abandoned.

In the suggestion, based on the force of words, the Denotation being restricted (as it cannot proceed after it has yielded the contextual meaning), any other idea, which cannot be the denoted one, as well as the *upamā* and other figures, are undoubtedly suggested.

Owing to the inapplicability of the convention in a particular individual, it is the word-meanings of universal

---

तेन सह व्यङ्ग्येन वस्तुना सह। व्यङ्ग्येन सह वाच्यस्य सादृश्यक्लृप्ताविति शेषः। तथा सादृश्यक्लृप्तौ योऽयमुपमारूपकादिरलङ्कारवर्गः प्रथते, तस्य च निर्विवादं व्यङ्ग्यत्वमित्यर्थः। अत्रायमाशयः—शब्दशक्तिमूलानुरणनरूपो ध्वनिर्यदा सादृश्येतरेण सम्बन्धेन प्रवृत्तस्तदा वस्तुमात्रं व्यङ्ग्यं, यदा तु सादृश्यसम्बन्धेन तदोपमादिरलङ्कारो व्यङ्ग्यः, उभयत्राभिधाया नियन्त्रणाल्लक्षणावृत्त्यसम्भवाच्च। अतो द्विरूपमप्येतद् व्यङ्ग्यमविवादसिद्धमिति।

इत्थमलक्ष्यक्रमो लक्ष्यक्रमश्चेति ध्वनिं द्विधा राशीकृत्य रसादिकमक्रमं, सक्रमेषु लक्षणामूलौ वस्तुरूपौ अभिधामूलानुरणनरूपौ वस्त्वलङ्कारात्मकौ च यथाक्रममवाच्यत्वेनावस्थाप्य क्रमप्राप्तस्यार्थशक्तिमूलस्य ध्वनेरवाच्यतामभिहितान्वयदृशा समर्थयति तावत्—**अर्थशक्तिमूलेऽपि विशेष** इत्यादिना। अभिहितान्वयवादिनो ह्येवमाहुः—शब्दः सङ्केतसहाय एव ह्यर्थमवगमयति। स यदि सङ्केतः पदार्थान्तरान्वयाद् विशिष्टे पदार्थे क्रियेत तदा प्रतियोगिनामानन्त्यादानन्त्यादयो दोषाः प्रसजेयुः। अतः केवले पदार्थे संकेतो युज्यत इति सामान्यरूपा एव पदार्थाः। ते च सङ्केतज्ञानमात्रात् प्रतीयन्ते। अथाकाङ्क्षासन्निधियोग्यतावशात् संसर्गे विशेषरूपो वाक्यार्थो द्वितीयकक्ष्यायां समुल्लसतीति। अथ शब्दसङ्गत्यापि व्याकुर्मः—विशेषे विशेष्यत इति विशेषः, पदार्थान्तरान्वितत्वेन

पदार्थानामाकाङ्क्षासन्निधियोग्यतावशात् परस्परं संसर्गे यत्रापदार्थो विशेषरूपो वाक्यार्थस्तत्राभिहितान्वये का वार्ता व्यङ्ग्यस्याभिधेयतायाम् ।

येऽप्याहुः—

"शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति ।
श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया ॥
अन्यथानुपपत्त्या तु बोधेच्छक्ति द्वयात्मिकाम् ।
अर्थापत्त्यावबुध्येत सम्बन्धं त्रिप्रमाणकम् ॥"

इति प्रतिपादितदिशा 'देवदत्त गामानय' इत्यादावुत्तमवृद्धवाक्यप्रयोगे देशाद् देशान्तरं सास्नादिमन्तमर्थं मध्यमवृद्धे नयति सति अनेनास्माद् वाक्यादेवंविधोऽर्थः प्रतिपन्न इति तच्चेष्टयानुमाय तयोरखण्डवाक्यवाक्यार्थयोरर्थापत्त्या वाच्यवाचकभावलक्षणं सम्बन्धमवधार्य बालस्तत्र व्युत्पद्यते, परतः 'चैत्र गामा-

---

विशिष्टे पदार्थ इत्यर्थः । सङ्केतः कर्तुं न युज्यत इति आनन्त्याद् यतः संकेतः कर्तुं न युज्यते ततः । **सामान्यरूपाणामिति** । सामान्यरूपा एव पदार्थाः तेषां च । **आकाङ्क्षासन्निधीति** । आकाङ्क्षादिवशात् परस्परं संसर्गे । **अपदार्थो विशेषेति** । विशेषरूपत्वात् पदार्थातिरिक्तो वाक्यार्थो यत्राभ्युपगतस्तत्राभिहितान्वये वाक्यार्थानन्तरकक्ष्याभाविनो व्यङ्ग्यस्य वाच्यतायां वार्तैव का, यावता द्वितीयकक्ष्यापाती वाक्यार्थोऽप्यनभिधेय इत्युपालम्भनिष्कर्षः । यदाह—

"विशेषरूपं वाक्यार्थमपदार्थमपीच्छता ।
व्यक्तिरिष्टाभिधातोऽन्याभिहितान्वयवादिना ॥"

इति ।

अथान्विताभिधाननीत्याश्रयणेऽपि व्यङ्ग्यस्य वाच्यता न सम्भवतीत्युपक्रमते—**येऽप्याहुरित्यादिना** । अत्रेयमन्विताभिधानदर्शनस्थितिः—पदार्था एव पदार्थान्तरान्वितत्वेनाभिधीयमाना वाक्यार्थः, न तु सामान्यरूपाणां पदार्थानां पश्चात्समन्वयरूपवैशिष्ट्ये सति वाक्यार्थता । तथा हि—गृहीतसङ्केत एव शब्दोऽर्थमवगमयति । सङ्केतग्रहणं च वृद्धव्यवहारात् । वृद्धाश्च परस्येष्टानिष्टबोधनं प्रयोजनत्वेनोद्दिश्य प्रवर्तननिवर्तनक्षमैरेव शब्दैर्व्यवहरन्ति । प्रवृत्तिनिवृत्तिक्षमत्वं च वाक्यस्यैवेति वाक्यैरेव व्यवहरन्ति, न तु पदैः । अतो वृद्धप्रयोगसमवायिनां मिथोऽभिग्रथितानामेव पदानां तथाभूत एव स्वार्थे सङ्केतो गृह्यते इति ।

तामिमां प्रक्रियां प्रकृतार्थसिसाधयिषयोपन्यस्यति—शब्दवृद्धेत्यादि । शब्दं वृद्धौ अभिधेयं चेति विग्रहः । देवदत्त गामानयेति व्यवहारे हि सन्नि-

character being mutually co-ordinated by the force of expectancy, compatibility and proximity (of words) give rise to the meaning of sentence which is particular in and different from the meaning of individual words. How can the suggested sense, based on the power of meaning, can be spoken of as denoted according to this theory of *Abhihitānvaya* (held by the Bhāṭṭa School of Mīmāṁsā)?

And some others expound (the process of denotation) as follows :

"The word, the elderly men and the object denoted are directly perceived here (i.e. in the process of learning) by a child." "The listener's understanding of it is deduced (by the child) through inference and action. The two-fold power (of the word to denote and of the object to be thus denoted by that particular word) is cognised by presumption based on 'otherwise inexplicability'. Thus the relationship (between word and its meaning) is known through three means of cognition (i.e. perception, inference and presumption)."

According to what is stated above when a sentence, such as 'Devadatta, bring the cow,' is uttered by an elderly man, the younger man is seen to bring from one place to another an object with the dewlap etc., the child then infers from this action that such and such meaning has been understood by the younger man from such a sentence. Thereupon the child makes out the denotative relationship between the above sentence and its meaning as one indivisible whole, and thus the child himself comprehends its meaning. Later on when sentences such as 'Caitra, bring the cow'; 'Devadatta, bring the

---

कृष्टो व्युत्पित्सुर्व्यवह्रियमाणवाक्यात्मकं शब्दं, वृद्धौ नियोक्तृनियोज्यौ, अभिधेयं गवादि च प्रत्यक्षेण अत्र लोके पश्यति शब्दं श्रावणेन, वृद्धावभिधेयं च चाक्षुषेणावधारयति । **श्रोतुश्चेति** । अथ श्रोतुश्च प्रतिपन्नत्वं तच्चेष्टया लिङ्गभूतयाप्यनुमानप्रमाणेनावधारयति । वाक्यश्रवणसमनन्तरं वा नियोज्येनानीते गवि गवानयनलक्षणया चेष्टया नियोज्यस्यैवंविधार्थावगतिरतो वाक्याज्जातेत्यनुमिनोति । अथ तथाविधावगत्यन्यथानुपपत्त्या वाक्यवाक्यार्थयोः प्रतिपाद्यप्रतिपादकत्वसम्बन्धमर्थापत्तिप्रमाणेनावच्छिनत्तीति त्रिप्रमाणः सङ्केतग्रहः । तदेतत्

नय, 'देवदत्ताश्वमानय' 'देवदत्तगां नय' इत्यादिवाक्यप्रयोगे तस्य तस्य तं तमर्थमवधारयत्यन्वयव्यतिरेकाभ्यामिति प्रवृत्ति निवृत्तिकारि वाक्यमेव प्रयोगयोग्यमिति वाक्यस्थितानामेव पदानामन्वितैः पदार्थैरन्वितानामेव सङ्केतो गृह्यत इति विशिष्टा एव पदार्था वाक्यार्थः, न तु पदार्थानां वैशिष्ट्यम्। यद्यपि वाक्यान्तरप्रयुज्यमानान्यपि प्रत्यभिज्ञाप्रत्ययेन तान्येवैतानि पदानीति निश्चीयन्त इति पदार्थान्तरमात्रेणान्वितः पदार्थः सङ्केतगोचरः, तथापि सामान्यावच्छादितो विशेषरूप एवासौ प्रतिपद्यते व्यतिषक्तानां तथाभूतत्वादित्यन्विताभिधानवादिनः।

संवादयन्नेव व्याचष्टे—**देवदत्त गामानये**त्यादिना। सास्नादिमन्तमर्थमित्यभिधेयपदविवृतिः। नयति सतीत्यत्र शब्दवृद्धाभिधेयान् प्रत्यक्षेण पश्यतीत्यमुमर्थं सिद्धत्वेनानुसन्धाय श्रोतुश्च प्रतिपन्नेत्यादि व्याचष्टे—**अनेनास्मादि**त्यादि। एवंविधः गवादिरूपः। तच्चेष्टया गवानयनरूपया। अर्थापत्त्येत्येतद् व्याचष्टे—**तयोरखण्डवाक्ये**त्यादि। इयता खण्डशो व्युत्पत्त्यभावाद् अखण्डयोरेव वाक्यवाक्यार्थयोः। अर्थापत्त्या मध्यमवृद्धस्य तथाविधार्थप्रतिपत्त्यन्यथानुपपत्त्युत्थापितया। तत्र व्युत्पद्यते अखण्डमिदं वाक्यमस्याखण्डस्य वाक्यार्थस्य प्रतिपादकमिति गृहीतसङ्केतो भवति। अथ पदशोऽपि व्युत्पत्तिर्वाक्यादेवेत्याह—**परतश्चैत्रे**त्यादि। परतः अखण्डव्युत्पत्तिसमनन्तरं 'चैत्र गामानये' त्यादिषु वाक्येषु यस्य पदांशस्यावापाद् योऽर्थांश ओप्यते उद्धाराच्चोद्ध्रियते तस्य तस्य तं तमर्थमवधारयति। तथा हि—'देवदत्त गामानये'ति वाक्ये सामान्यतो व्युत्पन्नः 'चैत्र गामानये' त्यत्र पुरुषान्तरप्रवृत्तिमवधारयन् देवदत्तशब्दोद्धारात् तदर्थोद्धारं चैत्रपदावापात् तदर्थावापं च पश्यन् देवदत्तचैत्रपदयोर्व्युत्पद्यते। अनयैव नीत्या 'देवदत्ताश्वमानये' त्यत्र गोपदेऽश्वपदे च व्युत्पत्तिः। 'देवदत्त गां नये' त्यत्र तु आनय नयेति पदयोः। इत्थं वाक्यस्थितानामेव पदानां मिथोऽन्वितैः पदार्थैरन्वितानामेव खण्डशोऽखण्डशश्च सङ्केतो गृह्यते, अन्वयव्यतिरेकाभ्यां प्रवृत्तिनिवृत्तिकारिणो वाक्यस्यैव प्रयोगयोग्यत्वात्। यत इत्थम्, अतो विशिष्टा एव पदार्था वाक्यार्थः, न तु पदार्थानां पश्चादन्वयरूपं वैशिष्ट्यम्। ननु किं पदार्थसामान्यान्विते स्वार्थे पदानां सङ्केतग्रहः, उत पदार्थविशेषान्विते। यदि सामान्यान्विते, तदा सामान्यात्मको वाक्यार्थ इति विशेषतो व्युत्पत्तिर्न स्यात्। अथ यदि विशेषान्विते, तदा प्रतिवाक्यं स्वार्थस्य विशेषरूपत्वात् पदानि न प्रत्यभिज्ञायेरन् अस्यार्थस्यैतद् वाचकमिति। न च तथा न प्रत्यभिज्ञायन्ते। अतः कथमन्विताभिधाननयो निर्दोष इत्यत आह—**यद्यपि वाक्यान्तरे**त्यादि। प्रत्यभिज्ञाप्रत्ययेन प्रत्यभिज्ञारूपेण ज्ञानेन। इतिर्हेतौ। यतस्तान्येवैतानि निश्चीयन्ते,

horse" 'Devadatta, take away the cow' are used, he makes out a particular meaning from a particular word on the basis of positive and negative considerations. From this it follows that a sentence alone, that makes a man act or refrain from it, is fit for being used. Hence, the denotative convention is apprehended from the connected words occurring in a sentence only with the meanings of words (generally) connected with one another. To conclude, only the correlated meanings of words are the meaning of a sentence; it is not that there is correlation of (unconnected) word-meanings.

Though the individual words, found to be used in other sentences, are regarded to be the same by recognitive apprehension and thus convention of the word-meaning is found as connected with the other words (i.e. the denotative convention is comprehended as connected with particular word-meaning), yet, that particular form itself is comprehended as qualified by generic character because the intermixed word-meanings are of the said (i.e. of particular and not generic) character. (Since the particular and the generic cannot be divided the comprehension of the particular form is not without the apprehension of its generic character). This is the view of the theorists of correlated denotation (*anvitābhidhāna*).

अतः पदार्थान्तरमात्रेणान्वितः पदार्थः सङ्केतगोचरः । पदप्रत्यभिज्ञानात् सामान्यान्वितः पदार्थः संकेतविषय इति यद्यप्यभ्युपगन्तव्यं, तथापि सामान्यावच्छादितो विशेषरूप एवासौ प्रतिपद्यते पदप्रत्यभिज्ञानबलात् सामान्यावच्छादितः सन्नपि विशेषरूप एव वाक्यार्थावधारणकाले प्रतीयते । तत्र हेतुः—व्यतिषक्तानां तथाभूतत्वादिति । 'देवदत्त गामानये' त्यत्र हि देवदत्तपदमानयेत्यादिपदार्थान्तरसामान्यान्वितं स्वमर्थमर्पयति, आनयेति पदं च देवदत्तादिपदार्थान्तरसामान्यान्वितं स्वमर्थमिति व्यतिषङ्गदशायां सर्वेषां विशेषरूपत्वात् । अनेन प्रकारेण येऽभिदधत्यन्विताभिधानवादिनस्तेषामभिमते सामान्यविशेषरूपः पदार्थः सङ्केतगोचरः । येनान्वीयते स सामान्यरूपः, स्वार्थस्तु विशेषात्मकः । अतः सामान्य-

तेषामपि मते सामान्यविशेषरूपः पदार्थः सङ्केतविषय इत्यतिविशेषभूतो वाक्यानन्तर्गतोऽसङ्केतितत्वादवाच्य एव यत्र पदार्थः प्रतीयते तत्र दूरे अर्थान्तर-भूतस्य 'निश्शेषच्युते'त्यादौ विध्यादेश्चर्चा । अनन्वितोऽर्थोऽभिहितान्वये, पदार्थान्तरमात्रेणान्वितस्त्वन्विताभिधाने, अन्वितविशेषस्त्ववाच्य एवेत्युभय-नयेऽप्यपदार्थ एव वाक्यार्थः ।

विशेषरूप एव पदार्थः सङ्केतितत्वाद् वाच्यः, न तु वाक्यानन्तर्गतत्वादतिविशेष-भूतो व्यङ्ग्यो वाच्यतया शङ्कितुमपि शक्यते । यत्र वाच्यव्यङ्ग्ययोर्विरोधाभावे-नैक्यशङ्का सम्भवति, तत्रेयमुपदर्शिता भेदोपपत्तिः । यत्र तु स्वरूप एव विरोधः तत्रोपपत्तिं विनैव भेदः सिद्ध इत्याह—**यत्र पदार्थ** इत्यादि । पदार्थः अन्वितो वाक्यार्थ इत्यर्थः । प्रतिपद्यते पारिपूर्ण्येन प्रतीयते । तत्रार्थान्तरभूतस्य स्वभावत एव निषेधादतिविरोधिनो विध्यादेः । चर्चा विचारः । 'निश्शेषच्युतचन्दने'-त्यादौ हि तदन्तिकगमननिषेधो वाक्यार्थतया परिपूर्णः प्रतीयते । अथ वाक्या-नन्तर्गतो योऽयमतिविशेषरूपस्तदन्तिकमेव गतासीति विधिस्तस्य वाच्यतायां का चर्चा । इत्थमभिहितान्वयान्विताभिधानदर्शनयोर्यदेतद् व्यङ्ग्यस्यावाच्यत्वं चर्चितं तन्निष्कृष्योपन्यस्यति—**अनन्वितोऽर्थ** इत्यादिना । वाक्यार्थः व्यङ्ग्या-र्थात्मकः । अपदार्थ एव वाच्योऽर्थो न भवत्येवेत्यर्थः ।

अथान्विताभिधानवादिष्वेकदेशिमतमुपन्यस्य दूषयति—**यदप्युच्यते नैमि-त्तिके**त्यादिना । व्यङ्ग्याभिमत एव भवतु वाक्यार्थः । स हि शब्दनिमित्तकत्वाद् नैमित्तिकः । निमित्तभूताश्च शब्दा नैमित्तिकमप्रतिपाद्य न मध्ये विरमन्तीति किं वृत्त्यन्तरकल्पनाप्रयासेन । निमित्तानि हि नैमित्तिकार्थानुसारेण कल्प्यन्त इति यदुच्यते तदेतद् विकल्प्य खण्डयति—**तत्र निमित्तत्वमि**त्यादि । तत्रेति तच्छब्दो यच्छब्दविमृष्टामुक्तिं परामृशति । यदिदं व्यङ्ग्यप्रतीतौ शब्दा निमित्तानि कल्प्यन्त इत्युच्यते, किमिदं निमित्तत्वं नाम । किं कारकत्वम् उत ज्ञापकत्वम् । तत्र प्रथमं कल्पमनभ्युपगमेनैव निराचष्टे—**शब्दस्य प्रकाशकत्वादिति** । न हि घटादिशब्देन घटादिरर्थः क्रियते, अपि तु प्रकाश्यत एव । तर्हि ज्ञापकत्वमित्यत आह—**ज्ञापकत्वं त्विति । अज्ञातस्ये**ति । यो हि धूमादिरग्न्यादेर्ज्ञापकः, स हि नियतसम्बन्धतया ज्ञात एव ज्ञापकतामश्नुते । प्रकृते तु शब्दो व्यङ्ग्यार्थज्ञापने नियतसम्बन्धतया न ज्ञायत इति कथं ज्ञापकत्वम् । ननु कथं नियतसम्बन्धतया

In this view also the universal-particular word-meaning is the object of denotative convention; and so the extremely specific form (of suggested sense), which is not included in the sentence, would invariably be un-denoted because it could never be the object of denotative convention.* In such a view the sense of positive and the like, which is different than the expressed, as in (the former example) 'The slope of your breasts has its sandal completely washed off' etc., can scarcely be considered as denoted.

The meaning is not correlated according to the theory of 'the connection of the expressed' (*Abhihitānvaya*) and according to the theory of 'connected meaning' (*anvitābhidhāna*) it is correlated to the other meaning generically but the correlated particular (meaning) is never denoted, hence in both the above theories the sense of a sentence cannot be taken as the object of direct denotation by a word.

---

*The suggested and the expressed both may be similarly positive or negative in their content and meaning. In such a case there is no opposition in the nature of the two meanings. But the suggested is more than specific particular, it is not merely a generally connected particular of the *Anvitābhidhāna-theorists*. Moreover, the suggested is never mentioned in a sentence, it is never a 'given'. The denotative convention cannot give the meaning of the *not-given*. Hence the suggested meaning cannot be explained as the generally connected word-meaning. And then there are such cases where the suggested differs in its nature from that of the expressed. Ānandavardhana has explained this opposition in nature of the expressed and the suggested in various ways with apt illustrations in the first *Uddyota* of the Dhvanyāloka. According to him *Dhvani*, in all its three varieties, viz. the bare fact (*vastu*), figures and sentiments, differs from the expressed. To illustrate, even the first variety of a bare fact differs widely from the expressed. Sometimes the suggested is of the nature of an injunction and vice versa. Sometimes the expressed is neither a definite prohibition nor a definite injunction; sometimes the reference of the two differs from one another.

यदप्युच्यते 'नैमित्तिकार्थानुसारेण निमित्तानि कल्प्यन्ते' इति तत्र निमित्तत्वं कारकत्वं ज्ञापकत्वं वा। शब्दस्य प्रकाशकत्वान्न कारकत्वम्। ज्ञापकत्वं तु अज्ञातस्य कथम्। ज्ञातत्वं च सङ्केतेनैव। स चान्वितमात्रे। एवञ्च निमित्तस्य नियतनिमित्तत्वं यावन्न निश्चितं तावन्नैमित्तिकस्य प्रतीतिरेव कथमिति 'नैमित्तिकार्थानुसारेण निमित्तानि कल्प्यन्त' इत्यविचारिताभिधानम्।

ये त्वभिदधति 'सोऽयमिषोरिव दीर्घदीर्घो व्यापारः' इति 'यत्परः शब्दः स शब्दार्थः' इति च विधिरेवात्र वाच्य इति, तदतात्पर्यज्ञास्तात्पर्यवाचोयुक्तेर्देवानांप्रियाः। तथा हि—भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यत इति कारकपदार्थाः क्रियापदार्थेनान्वीयमानाः प्रधानक्रियाभिनिर्वर्तकस्वक्रियाभिसम्बन्धात् साध्यायमानतां प्राप्नुवन्ति। ततश्चादग्धदहनन्यायेन यावदप्राप्तं तावद्

न ज्ञायत इत्यत आह—**ज्ञातत्वं चे**ति। अस्यार्थस्यायं ज्ञापक इति शब्दस्य यदेतज्ज्ञापकत्वं तत् सङ्केतेनैव। स च सङ्केतः पदार्थान्तरमात्रान्विते वाच्य एव, न त्वन्वितविशेषे व्यङ्ग्य इति यावत्। अतो ज्ञापकता न सम्भवतीति सोपपत्तिकं निगमयति—**एवञ्च निमित्तस्ये**त्यादि। उक्तेन प्रकारेण व्यङ्ग्यार्थप्रतीतौ निमित्तत्वेनाभ्युपगतस्य शब्दस्य निमित्तत्वमेव यावन्नियततया न निश्चितं तावद् **'नैमित्तिकार्थानुसारेण निमित्तानि कल्प्यन्त'** इत्येतदविचारिताभिधानम्।

अथैकदेश्यन्तरमतमुपन्यस्य दूषयति—**ये त्वभिदधती**त्यादिना। **सोऽयमिति** (च?)। **'निश्शेषच्युते'** त्यादौ येन तदन्तिकमेव गतासीति विधिः प्रकाश्यते, सोऽयमिषोरिव दीर्घदीर्घोऽभिधाव्यापार एव न तु व्यापारान्तरमिति भावः। अनेन व्यञ्जकाभिमतस्य शब्दस्य वाचकत्वमेवेति दर्शितम्। अथ व्यङ्ग्याभिमतस्याप्यर्थस्य वाच्यतां दर्शयितुमाह—**यत्परः शब्द** इति। सर्वथा हि शब्दस्य व्यङ्ग्ये तात्पर्यमङ्गीकार्यम्। तदङ्गीकारे तु **'यत्परः शब्दः स शब्दार्थ'** इति नयेन व्यङ्ग्याभिमतोऽपि वाच्य एव स्यादिति भावः। यत इत्थमतो विधिरेवात्र वाच्यः। अत्र **'निश्शेषच्युते'**ति श्लोके। विधिः तदन्तिकमेव गतासीत्येवमात्मकः। तदेतद् दूषयति—**तदतात्पर्यज्ञा** इत्यादिना। **तदिति, ये** त्वेवमभिदधति, तदतात्पर्यज्ञा एवाभिदधतीत्यर्थः। तात्पर्यवाचोयुक्तेरित्यादिना सोल्लुण्ठमतात्पर्यज्ञत्वमेवानूदितं विशेषज्ञापनार्थम्। वाचोयुक्तिर्व्यापकता। देवानांप्रियाः पशवः।

अतात्पर्यज्ञा इति यत् प्रतिज्ञातं तदुपपादयति—**तथा हि भूतभव्ये**त्यादिना। भूतं सिद्धं कारकमित्यर्थः। तथा भव्यं साध्यं क्रियेत्यर्थः। क्रियाकारकात्मकवाक्यसमुच्चारणे हि कारकं क्रियार्थमुपदिश्यते। अतः कारकपदार्थाः क्रियापदार्थेनान्वीय-

It is also said that "causes are ascertained on the basis of their effects". (To this we reply) that to be a cause is either to be a generative (*kāraka*) or to be an indicator (*jñāpaka*). The word, on account of its being illuminator, cannot be of the nature, of a generative. And how can it be indicator of the unknown ? Knownness comes from the denotative convention only, which pertains to the correlated only. Therefore, so long as a cause is not determined to be precisely a cause, how can the cognition of the effect (i.e. meaning) arise from it (i.e. the word). Hence the view that "the causes are ascertained on the basis of the effect (i.e. the meaning)" is a thoughtless statement.

There are others who say : "The function (of the word or denotation), like that of an arrow, lasts for long" and "whatever is intended to be expressed by the word, that is the meaning of the word"; accordingly the positive sense itself is the denoted meaning here (i.e. in the verse. 'The slope of your breasts has its sandal completely washed off' etc.).—They (who have advanced the above view) also do not understand its real import, they are foolish in that they indulge in the argument of purport (i.e. the theory that whatever is intended to be expressed by the word is its meaning). To make it explicit : When the accomplished thing and what is to be accomplished are mentioned together, the accomplished is meant to subserve the one which is to be accomplished. Thus, the substantive meanings, on their being correlated to the verb-meaning, acquire the character of what is to be accomplished, on account of their being related to their own action which helps the principal action. Thus, following the maxim of burning the unburnt that alone is predicated which has not

---

मानाः प्रधानभूता या क्रिया आख्यातवाच्या तस्या अभिनिर्वर्तिकाया अभिव्याप्य निष्पादिकायाः स्वक्रियाया अभिसम्बन्धात् साध्यायमानतां प्राप्नुवन्ति, प्रधान-क्रियावत् स्वयमपि साध्यायन्ते। सर्वत्र हि वाक्ये क्रियाकारकाणां योऽयमन्वयः, स क्रियां प्रति कारकाणां कुर्वत्ता। तानि प्रति तु क्रियायाः कार्यता। इत्थं च सति सर्वेषामेव कारकाणां प्रधानक्रियाभिनिर्वर्तिकाः सन्त्येव स्वक्रियाः। तदभावे

विधीयते । यथा ऋत्विक्प्रचरणे प्रमाणान्तरतः सिद्धे 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' इत्यत्र लोहितोष्णीषत्वमात्रं विधेयं, हवनस्यान्यतः सिद्धेः 'दध्ना जुहोति' इत्यादौ दध्यादेः करणत्वमात्रं विधेयम् । क्वचिदुभयविधिः क्वचित् त्रिविधिरपि । यथा 'रक्तं पटं वये'त्यादौ एकविधिर्द्विविधिस्त्रिविधिर्वा ।

ततश्च यदेव विधेयं तत्रैव तात्पर्यमित्युपात्तस्यैव शब्दस्यार्थे तात्पर्यं, न तु प्रतीतमात्रे । एवं हि 'पूर्वो धावती'त्यादावपराद्यर्थेऽपि क्वचित् तात्पर्यं स्यात् ।

यत्तु 'विषं भुङ्क्ष्व मा चास्य गृहे भुक्था' इत्यत्र एतद्गृहे न भोक्तव्यमित्यत्र तात्पर्यमिति स एव वाक्यार्थ इत्युच्यते, तत्र चकार एकवाक्यतासूचनार्थः ।

कुर्वत् कारकमिति संज्ञैव न स्यात् । एताभिः स्वक्रियाभिः सह प्रधानक्रियायाः साध्याया योऽभिसम्बन्धस्तेन हेतुना स्वयमपि साध्यायन्ते । इत्थं सिद्धानामपि कारकाणां साध्यायमानत्वमुपपन्नं यतः, अतो यावदप्राप्तं तावद् विधीयते, अदग्धदहनन्यायात् । उपपादितमर्थमुदाहृत्य हृदयङ्गमीकरोति—**यथा ऋत्विक्प्रचरण** इति । **'लोहितोष्णीषा ऋत्विजः प्रचरन्ती'** त्यत्र वाक्ये ऋत्विक्प्रचरणस्य प्रमाणान्तरतः सिद्धौ लोहितोष्णीषत्वमात्रं विधेयत्वेन व्यवस्थाप्यते । अनेन कारकस्य विशेषणमपि साध्यतया दर्शितम् । कारकस्यापि साध्यतां दर्शयति—**हवनस्यान्यत** इत्यादि । इत्थमेकैकत्र वाक्ये कारकस्यैवैकैकस्य साध्यत्वं प्रदर्श्यैकस्मिन् वाक्ये अनेकेषां दर्शयितुमाह—**क्वचिदुभयविधिरि**त्यादि । तदुदाहरति—**यथा रक्तमि**त्यादि । **'रक्तं पटं वये'**त्यत्र हि वाक्ये यदि वानं तन्तुषु रक्तत्वं च प्रत्यक्षादिप्रमाणसिद्धं, तदा शाटिकादिव्यावृत्त्यै पटत्वमेव विधीयते, एवमेकविधिः । यदा वानमात्रं सिद्धं तदा रक्तत्वं पटत्वं चेति द्विविधिः । यदा पुनस्त्रितयमप्यसिद्धं, क्रेतृविक्रेतृसाम्मुख्यमात्रं सिद्धं, तदा त्रीण्यपीति त्रिविधिः । यदीत्थं प्रकृते किमायातमित्यत आह—**ततश्च यदेवे**त्यादि । यत इत्थं विधेयांश एव तात्पर्यं वाक्यस्य, अतो वाक्यत्वेनोपात्तस्यैव शब्दस्यार्थे तात्पर्यं, न तु शब्दबहिर्भूते प्रतीतमात्रे अर्थे । यदि प्रतीतमात्रे तात्पर्यं, तदायं दोष इत्याह—**एवं हि पूर्वं** इति । न तु **'पूर्वो धावती'**त्यस्य वाक्यस्य प्रतियोगित्वेन प्रतीतमात्रे अपरो न धावतीत्यर्थे तात्पर्यं, तदर्थमप्रयोगात् । ननूपात्तस्यैव शब्दस्यार्थे तात्पर्यमित्युक्तम् । न तदस्ति, क्वचिद् व्यतिरेकमनुपश्याम इत्यत आह—**यत्तु विषमि**त्यादि । **'विषं भुङ्क्ष्व मा चास्य गृहे भुक्था'** इत्यत्र हि वाक्ये सुहृदुपदेशात्मनि रिपोरस्य गृहे

been already accomplished. For example, when the walking about of the priests is established through some other injunction in a case like : 'The priests with red-turbans are walking about' the wearing of red turbans alone becomes the object of injunction.*

In cases like "He offers libation of curd" the offering of the libation being (known as) accomplished from elsewhere, the means alone is prescribed here. Sometimes the injunction, applies to two things and still in some other cases the injunction applies to three things. For example, in cases like "weave the red garment" it may be the injunction for one or two or three.

Thus whatever is prescribed there alone is the purport (of the word), therefore the purport relates to the given word only, and not to what is merely implied. If it were so then in cases like 'the former runs' the purport could be related to the sense of the latter too.

It is also stated that "eat the poison, but do not eat at his house"—here the purport is that "you should not eat in his house"; hence this alone is the meaning of the sentence. To this we reply—Here the conjunctive particle *ca* (and) is meant for indicating the unity of the (two) sentences.

न भोक्तव्यमित्यत्रार्थे तात्पर्यं, न पुनरनुपदेश्ये विषभक्षणरूपे । अतः प्रतीतमात्रः सन्नपि तात्पर्यविषयीभूतत्वा (न्न? न्ना) वाक्यार्थो भवितुमर्हतीति स एव वाक्यार्थ इत्युच्यते, सर्वैरिति शेषः । **न** ह्यव्युत्पन्नोऽप्यत्र सन्देग्धि । अत्र शब्दसामञ्जस्यायाह—**तत्र चकार** इत्यादि । अत्र हि '**मा चास्ये**'ति चकारोऽर्थद्वयमन्वाचिन्वन्नेकवाक्यतां सूचयति। एवमेकवाक्यतायां सिद्धायां '**विषं भुङ्क्ष्व मास्य गृहे भुक्था**' इत्याख्यातपदवाच्ययोर्विधिनिषेधयोराख्यातपदवाच्यत्वादेव नाङ्गाङ्गिभावो घटते । इत्थं न प्रधानयोर्मिथोऽन्वय इति नीत्या आख्यातवाच्ययोरङ्गाङ्गिभावाभावाद् विषं भक्षयेत्येतस्य वाक्यस्य विषभक्षणादिति कृद्वाच्यतापरिकल्पनम् । विषभोजनादपि कष्टमेतद्गृहे भोजनं यतः अतोऽस्य गृहे मा भुंक्था इत्युत्तरवाक्यत्वेनोपात्तस्य शब्दस्यार्थे तात्पर्यम् । सर्वथेत्यनेन पूर्ववाक्यविशिष्टतामाविष्करोति । इत्थं पूर्ववाक्यार्थविशिष्ट उत्तरवाक्यार्थे तात्पर्यव्यवस्थायामाख्याता-

*Redness alone of the turban is enjoined upon by this sentence.

न चाख्यातपदवाच्ययोर्द्वयोरङ्गाङ्गिभाव इति विषभक्षणवाक्यस्य क्रुद्वाक्यत्वेनाङ्गता कल्पनीयेति विषभक्षणादपि कष्टमेतद्गृहे भोजनमिति सर्वथा मास्य गृहे भुङ्क्था इति उपात्तशब्दार्थ एव तात्पर्यम् ।

यदि च शब्दश्रुतेरनन्तरं यावानर्थोऽवगम्यते तावति शब्दस्याभिधैव व्यापारः, तत् कथं 'ब्राह्मण पुत्रस्ते जातः कन्या ते गर्भिणी'त्यादौ हर्षविषादादीनामपि न वाच्यत्वम् । कस्माच्च लक्षणा, लक्षणीयेऽप्यर्थे दीर्घदीर्घाभिधाव्यापारेणैव प्रतीतिसिद्धेः। किमिति च 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां परदौर्बल्यमर्थविप्रकर्षाद्' इत्यन्विताभिधानवादेऽपि विधेरपि सिद्धं व्यङ्ग्यत्वम्।

र्थस्य क्रुद्वाच्यताकल्पनमात्रेण वाक्यबहिर्भूतेऽर्थे तात्पर्यमिति यदाशङ्कितं तत् तात्पर्यवाचोयुक्तेर्देवानांप्रियत्वमेवाविष्करोतीति भावः । **'यत्परः शब्दः स शब्दार्थ'** इति परमार्थपराङ्मुखं प्रलपन्त्येव ते, न पुनरुपात्तस्यैव शब्दस्यार्थे तात्पर्यमिति न्यायतः सविशेषमवगन्तुमीशते । कथमीशतां, द्विपाद्गणनाबहिर्भूता हि त इत्युपालम्भनिष्कर्षः ।

इत्थमविचलाभिरुपपत्तिभिः सुदृढमुपालभ्य विपक्षबाधोपन्यासेनापि भूयस्तरामुपालभते—**यदि च शब्दश्रुते**रित्यादि । शब्दश्रुतिसमनन्तरावगतस्य सर्वस्यैवार्थस्याभिधाव्यापारसमधिगम्यत्वं चेदभ्युपगम्येत, तदा **'ब्राह्मण पुत्रस्ते जात'** इत्यादौ वाक्ये यदिदं हर्षादि प्रतीयते तस्यापि वाच्यत्वं प्रसज्येत । न ह्येतदभिमतं, कार्ये व्युत्पत्तिवादिनस्त इति भावः । स्वाभ्युपगमविरोधमप्याविष्कृत्योपहसति—**कस्माच्च लक्षणे**त्यादिना । **गौणो** मुख्यश्च शास्त्रार्थ इत्युद्घोषयता लक्षणादिविवेचनाय च संरभमाणेन येयमविचलमङ्गीकृता लक्षणा सा तवेत्थं प्रलपतः कुतः प्रमाणात् सिध्यति । लक्षणीयेऽप्यर्थे इषुवद् दीर्घदीर्घोऽभिधाव्यापार एव धुरन्धरतासाम्राज्यमनुभवतु, म्रियतामियं वराकी लक्षणेति यावत् । इत्थमन्विताभिधानवादिनः प्रौढवादैरुपालभ्य तत्सिद्धान्तस्य मूलमेवोच्छेत्तुमाह—**किमिति च श्रुतिलिङ्गे**ति । द्वितीयातृतीयान्तयोरन्यतरत् पदं श्रुतिः । पदार्थसामर्थ्यं लिङ्गम् । वाक्यमवान्तरम् । कर्तव्यस्येतिकर्तव्यताकाङ्क्षा प्रकरणम् । यथासंख्यं स्थानम् । लौकिकी संज्ञा समाख्या । षड्भिरेभिर्हि प्रमाणैर्वाक्येषु यथायोगं प्रधानाङ्गत्वमापाद्यत इति तान्येतानि ते सिद्धान्ते प्रमाणत्वेनोपयुज्यन्ते । तत्र **'व्रीहीनवहन्ती'**त्यादौ श्रुतिः । **'बर्हिर्देवसदनं दामि'** इत्यादौ लिङ्गम् । **'श्वेतं छागमालभेते'**त्यादौ वाक्यम् । **'समिधो यजति' 'तनूनपातं यजती'**त्यादौ प्रकरणम् । याज्यानुवाक्यायुगले **'इन्द्राग्नी रोचना दिव'** इत्यादौ स्थानम् । **'आध्वर्यवं हौत्रम् औद्गात्रम्'** इत्यादौ समाख्या । एतैः प्रधानाङ्गत्वापादनरूपे विनियोगे यदा सन्निपातस्तदा परदौर्बल्यमुपर्युपर्यर्थविप्रकर्षात् । तदिदं ह्युद्घोषयस्यभिनिवेशेन—**'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां परदौर्बल्यमर्थविप्रकर्षादि'ति** । तदेतत् परदौर्बल्यं कथमुपपद्यतां, परदुर्बलत्वे हेतुर्योऽर्थविप्रकर्षः, महेषुवद् दीर्घदीर्घे तवास्मिन्नभिधाव्यापारे जीवति, तस्यैवासम्भवात् । तत्र श्रुत्यादीनां लिङ्गादिसन्निपाते परदौर्बल्यम् **'ऐन्द्र्या गार्हपत्यमुपतिष्ठत'**

Since there is no relation of the principal and subordinate between the two sentences having independent verbs ('eat' and 'do not eat', because the first verb gives the positive command and the other negative, these two verbs cannot be principal and subordinate) the sentence asking for taking the poison should be imagined to be subordinate by making it derivative (i.e. instead of 'eat' or *Bhuṅkṣva*, the word should be taken here as a derivative, 'eating' or *Bhakṣaṇa*. The former sentence is thus made subordinate to the second sentence. The meaning of the two sentences taken together would be that) : "Eating in the house of this man is worse than eating poison, therefore you should never eat in the house of this man." It follows from this that the import is in the meaning of a given only.

Moreover, if, on hearing a word, any meaning obtained were under only denotative function of the word, then why not joy and despair and the like be regarded as denoted meanings in cases such as O Brāhmaṇa, a son is born to you; your unmarried daughter is pregnant ? Why to admit of indication either ? For in the case of indicated meaning also the apprehension could be accomplished by the far reaching function of the denotation. Why again should the each preceding one be stronger from among the Direct Declaration, Indicative power, Syntactical connection, Context, Position and the Name ? To conclude, under the theory of 'connected meaning' also the affirmation (in the verse 'the slope of your breasts have its sandal completely washed off' etc.) must be regarded being of the nature of suggested.

इत्यादिषु घण्टापथत्वेन व्यवस्थितमुत्सन्नसंकथं स्यात् । इत्थमन्विताभिधान-दृशापि निरूप्यमाणं व्यङ्ग्यसिद्धिसाम्राज्यं निस्सपत्नमेव ।

इयता सन्दर्भेण साहित्यसरणिपरिशीलनपराङ्मुखतया पशुप्रायाः शुष्क-मीमांसवः प्रत्यवतिष्ठमाना निष्कासिताः । सम्प्रति तु येऽन्विताभिधानदर्शनानु-सारिणः साहित्यसरणिमनुप्रविष्टाः सचेतनम्मन्यास्तान् प्रति सन्नह्यते—**किञ्च कुरु रुचिमित्यादिना** । 'कुरु रुचिमि'ति पदे यदि व्यत्ययेन काव्यान्तरवर्तिनी स्यातां तदा दुष्टता येयमश्लीलत्वलक्षणा सम्मता, सान्विताभिधानाभ्युपगमे कथं

किञ्च 'कुरु रुचिमि'ति पदयोर्वैपरीत्ये काव्यान्तर्वर्तिनि कथं दुष्टत्वम् । न ह्यत्रासभ्योऽर्थः पदार्थान्तरैरन्वित इत्यनभिधेय एवेत्येवमाद्यपरित्याज्यं स्यात् ।

यदि च वाच्यवाचकत्वव्यतिरेकेण व्यङ्ग्यव्यञ्जकभावो नाभ्युपेयेत, तदसाधुत्वादीनां नित्यदोषत्वं कष्टत्वादीनामनित्यदोषत्वमिति विभागकरणमनुपपन्नं स्यात् । न चानुपपन्नं, सर्वस्यैव विभक्ततया प्रतिभासात् । वाच्यवाचकभावातिरेकेण व्यङ्ग्यव्यञ्जकताश्रयणे तु व्यङ्ग्यस्य बहुविधत्वात् क्वचिदेव कस्यचिदेवौचित्येनोपपद्यत एव विभागव्यवस्था । 'द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः' इत्यादौ पिनाक्यादिपदवैलक्षण्येन किमिति कपाल्यादीनां काव्यानुगुणत्वम् । अपि च वाच्योऽर्थः सर्वान् प्रतिपत्तॄन् प्रति एकरूप एवेति नियतोऽसौ । न हि 'गतोऽस्तमर्क' इत्यादौ वाच्योऽर्थः क्वचिदन्यथा भवति । प्रतीयमानस्तु तत्तत्प्रकरणवक्तृप्रतिपत्त्रादिविशेषसहायतया

वा उपपद्यताम् । न हि पदयोरनयोरन्त्याद्यक्षरसन्निकर्षमात्रादाभासमानो लौकिको ग्राम्योऽर्थोऽर्थान्तरेणान्वितः शब्दार्थ एव भवति । ततोऽशब्दार्थस्य दोषत्वेऽतिप्रसक्तिः स्यादित्येवमाद्यपरित्याज्य स्यात् । अयमन्विताभिधानदर्शनाश्रयणे दोषो भवताम् ।

अथ यद्वा तद्वास्तु दर्शनाश्रयणम् । व्यङ्ग्यव्यञ्जकभावानाश्रयणे वाच्यवाचकभावाश्रयणमात्रेण नैषां दोषाणां निष्कृतिरित्याह—**यदि च वाच्यवाचके**त्यादिना । असाधुत्वं व्याकरणविरोधः । कष्टत्वं श्रुतिकटुत्वम् । असाधुत्वादयो हि नित्यदोषत्वेन, कष्टत्वादयस्त्वनित्यदोषतया भवतामपि सम्मताः । तदिदं विभागकरणमनुपपन्नं स्यात् । न चानुपपन्नं, विभागव्यवस्थानात् । वाच्यः सर्वत्र वक्तृबोद्धव्यवैशिष्ट्यसद्भावेऽपि सर्वान् प्रत्येकरूप इति का तत्र दोषव्यवस्थेति भावः । नन्वयं दोषस्तवापि किं न समान इत्यत आह—**वाच्यवाचकभावे**त्यादिना । यदि वाच्यवाचकभावातिरेकिव्यङ्ग्यव्यञ्जकभाव आश्रीयेत तदा वक्त्रादिवैशिष्ट्याद् व्यङ्ग्यं बहुविधमिति क्वचिदेव किञ्चिदेवोचितं स्यात् न तु सर्वं सर्वत्र । अत उपपद्यत एव विभागव्यवस्था । यो हि 'वर्वष्टी' त्याद्यात्मकः कष्टत्वादिदोषः स वैयाकरणादौ वक्तरि तवापि गुणत्वेन सम्मतः, अन्यदा तु दोषत्वेन । सोऽयं विभागो वाच्यवाचकभावमात्राश्रयणे नोपपद्यते, तस्य सर्वस्यैकरूपत्वात्; तदतिरेकिव्यङ्ग्यव्यञ्जकभावाश्रयणे तु श्रुतिकटुत्वमपि प्रक्रियामात्रव्यवस्थितस्य वैयाकरणस्य वराकस्य न काककल्पतामाविष्करोति, प्रत्युत गुण एवेति विभागोऽयमुपपद्यत एव । तमिमं विभागमुदाहरणेन हृदयङ्गमयति—**'द्वयं गतं सम्प्रती'**त्यादि । तपस्तप्यमानां भगवतीं गिरिदुहितरं प्रति दयानिधेः कुहनाब्रह्मचारिणो देवस्य पशुपतेस्तदभिप्रायपरिज्ञानायेयमुक्तिः । अत्र कपालोपलक्षितत्वादमङ्गलस्वभावस्य कपालीत्येव **संज्ञित**स्य समागमाभ्यर्थनया

And again, why should the inverted order of '*kuru rucim*', appearing in a poem, be regarded as a poetic blemish ? Here the indecent meaning is not connected with meanings of other words so it should remain un-denoted (according to those who admit only one power of word, *abhidhā*) and thus there will be no reason to avoid such expression.

And if the reality of the suggester and the suggested, as distinct from the reality of the expressive and the expressed is not accepted, then the classification of grammatical mistake and the like into permanent poetic blemish and that of harshness etc. into impermanent poetic blemish would be rendered unjustifiable ? And it (i.e. this classification) is not unjustified because it shines distinctly to every body. If on the other hand, the reality of the suggester and the suggested is accepted as distinct from the reality of the expressive and the expressed, the suggested meaning being manifold, some meaning alone may be regarded as appropriate in a certain case; and thus, the system of classification would be quite justified.

Both these have now become pitiable due to their desire for association with the Holder of the begging bowl (Śiva).

In cases such as this why should the words, the Holder of the Begging bowl and the like, in preference to such other words as the 'Holder of the Pināka bow', be regarded poetically appropriate ? And again, the denoted meaning is one and the same for all cognisers; so that it is uniform. (For example) the denoted sense, in cases such as the sun has set, never varies. But its suggested meaning becomes manifold by accessory conditions, such as, the particular context, the speaker, the person addressed. For example, from (the

---

सा कर्पूरशलाकाश्लक्ष्णशीतलावदाता सुधादीधितेर्निष्कलङ्का कला, सर्वस्यैव जगतः सर्वदा लोचनशरच्चन्द्रचन्द्रिकायमाणा त्वं चेत्येतदुभयं सम्प्रति शोचनीयतां गतं, पूर्वं तु सैकैवेति, गोपिताकारस्य पशुपतेर्द्व्यभिप्रायपरिज्ञानाय स्वात्मगर्हण-प्रस्तावे वाच्यः कपालित्वादिर्व्यङ्ग्यदशायामौचित्यं लभते । अयमश्लीलाख्यो-

नानात्वं भजते। तथा च 'गतोऽस्तमर्क' इत्यतः सपत्नं प्रत्यवस्कन्दनावसर इति, अभिसरणमुपक्रम्यतामिति, प्राप्तप्रायस्ते प्रेयानिति, कर्मकरणान्निवर्तामह इति, सान्ध्यो विधिरुपक्रम्यतामिति, दूरं मा गा इति, सुरभयो गृहं प्रवेश्यन्तामिति, सन्तापोऽधुना न भवतीति, विक्रेयवस्तूनि संह्रियन्तामिति, नागत एव प्रेयानित्यादिरनवधिर्व्यङ्ग्योऽर्थस्तत्र प्रतिभाति।

वाच्यव्यङ्ग्ययोः 'निश्शेषे'त्यादौ निषेधविध्यात्मना,

मात्सर्यमुत्सार्य विचार्य कार्य-
मार्याः समर्यादमिदं वदन्तु।
सेव्या नितम्बाः किमु भूधराणा-
मुत स्मरस्मेरविलासिनीनाम् ॥१३३॥

[Śṛṅgāraśataka, 36]

इत्यादौ संशये शान्तशृङ्गार्यन्यतरगतनिश्चयरूपेण,

कथमवनिप दर्पो यन्निशातासिधारा-
दलनगलितमूर्ध्ना विद्विषां स्वीकृता श्रीः।
ननु तव निहतारेरप्यसौ किं न नीता
त्रिदिवमपगताङ्गैर्वल्लभा कीर्तिरेभिः ॥१३४॥

ऽर्थदोषः। कष्टत्वं शब्ददोषः। तस्यातिस्फुटत्वादादिशब्दोपसंहृतोऽयमेवोदाहृतः। पुनस्तरां वाच्यस्य सर्वप्रतिपत्त्रपेक्षयैकरूपतां, व्यङ्ग्यस्य तु प्रकरणादिवैशिष्ट्यात् प्रतिपत्तृभिन्नरूपतां च वितत्य दर्शयति—**अपि च वाच्योऽर्थ** इत्यादिना। न हि 'गतोऽस्तमर्क' इत्यत्र वाच्यस्यार्कास्तमयरूपस्य प्रतिपत्तृविशेषापेक्षया वैचित्र्यं किञ्चित्। अतो नियत एवासौ। व्यङ्ग्यस्तु समुचितप्रकरणवक्त्रादिवैशिष्ट्यसहायो नानात्वमापद्यते। **'गतोऽस्तमर्क'** इत्यतो वाक्याद्धि चौर्यादिप्रस्तावे सम्प्रत्यवस्कन्दनावसर इति व्यङ्ग्योऽर्थः। एवं तत्तत्प्रकरणवक्त्रादिवशादभिसरणमुपक्रम्यतामित्यादि। **तत्र तत्रे**ति। प्रकरणादिवैशिष्ट्यशालिनि विषयविशेषे।

इत्थं वाच्यव्यङ्ग्ययोर्भेदमुपपत्तिभिरवस्थाप्य प्रसिद्धैर्विरोधशतैरपि प्रबलयति—**वाच्यव्यङ्ग्ययोर्निश्शेषे**त्यादिना। तत्रानयोः **'निश्शेषच्युतचन्दने'**ति श्लोके निषेधविध्यात्मना स्वरूपस्य विरोधः। संशयनिश्चयात्मना च स्वरूपविरोधं दर्शयति—**मात्सर्यमुत्सार्ये**त्यादि। अत्र हि शान्तशृङ्गार्यन्यतरानिश्चये वाच्योऽर्थः संशयात्मा। तयोरन्यतरनिश्चये तु व्यङ्ग्यो निश्चयरूपः। तदेतत् व्याचष्टे—**संशये शान्तशृङ्गा** (रे ? री)ति। वाच्यस्य संशयरूपत्वाद्

expression) 'the sun has set' innumerable suggested meanings rise in different situations, such as : This is the time to invade the enemy; you should start to meet your lover; your lover is about to reach; we are going to stop our work; let us begin the twilight rite; do not go very far; bring the cows to their shed; there is now no heat; let us pack up the merchandise; the lover has not come even to-day.

There is distinction between the expressed and the suggested in point of character. For example, in the verse '*Niśśeṣa*' etc. (The slopes of your breasts have its sandal completely washed off) while the *expressed is* of the character of negation, the *suggested is* of the character of affirmation.

Having cast off passion, act with thought. O noble men, say, with due regard for bounds of morality, whether one should have recourse to the flank of the mountains or to the hips of the amorous women smiling with love. 133

In cases such as the above the *suggested is* definite in the choice between the Śānta and the Śṛṅgāra, while the expressed meaning poses doubt.

Why should there be pride in that you have taken the property of your enemies whose heads have been cut off by the sharp edge of this sword of yours who have destroyed the enemies ? For have they not taken away your beloved glory to heaven, even when their limbs were lost ? 134

व्यङ्ग्यस्य शान्तशृङ्गार्यन्यतरगतनिश्चयरूपत्वाच्च स्वरूपस्य विरोध इत्यर्थः। अथ निन्दास्तुतिरूपेणापि स्वरूपविरोधं दर्शयति—**कथमवनिपेति**। निशातासिधाराकरणकेन दलनव्यापारेण गलितमूर्ध्नां निपतितशिरसाम्। अत्र हि निन्दास्तुति-

इत्यादौ निन्दास्तुतिवपुषा स्वरूपस्य, पूर्वपश्चाद्भावेन प्रतीतेः कालस्य, शब्दाश्रयत्वेन शब्दशब्दैकदेशतदर्थवर्णसंघटनाश्रयत्वेन च आश्रयस्य, शब्दार्थशासनज्ञानेन प्रकरणादिसहायप्रतिभानैर्मल्यसहितेन तेन चावगम इति निमित्तस्य, बोद्धृमात्रविदग्धव्यपदेशयोः प्रतीतिमात्रचमत्कृत्योश्च करणात् कार्यस्य, 'गतोऽस्तमर्क' इत्यादौ प्रदर्शितनयेन संख्यायाः,

कस्स व ण होइ रोसो दट्ठूण पिआअ सव्वणं अहरम् ।
सब्भमरपदुमघाइरि वारिअवामे सहसु एहिं ण व ॥१३५॥

[Cited in Dhvanyāloka, I]

इत्यादौ सखीतत्कान्तादिगतत्वेन विषयस्य च भेदेऽपि यद्येकत्वं तत् क्वचिदपि नीलानीलादौ भेदो न स्यात् । उक्तं हि—"अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारणभेदश्च" इति ।

वपुषा स्वरूपस्यैव विरोधः । एवं स्वरूपविरोधं सोदाहरणं बहुधा संप्रदर्श्यातिस्फुटत्वात् कालतो विरोधं वाङ्मात्रेणाह—**पूर्वपश्चाद्भावेनेत्यादि** । आश्रयविरोधं दर्शयति—**शब्दाश्रयत्वेनेत्यादि** । वाच्यो हि शब्दाश्रयत्वेन प्रसिद्धः । शब्दशब्दैकदेशशब्दार्थाद्याश्रयत्वेन व्यङ्ग्यश्च पूर्वं ज्ञात इति निरुदाहरणं प्रदर्शितम् । एवमन्यत्र द्रष्टव्यम् । निमित्तभेदाद् भेदमाह—**शब्दार्थशासनेत्यादि** । वाच्यस्य हि व्याकरणमीमांसादिशास्त्रज्ञानमात्रेणावगमः । व्यङ्ग्यस्य तु न तावन्मात्रेण, अपि तु प्रकरणवक्त्रादिसहायं यत् प्रतिभानैर्मल्यं तत्सहितेन शब्दार्थशासनज्ञानेनेति निमित्तभेदः । अथाधिकारिभेदः कार्यभेदश्च—**बोद्धृमात्रेत्यादि** । व्युत्पन्नमात्रस्य हि प्रतीतिमात्रं करोति वाच्यः । व्यङ्ग्यस्तु विदग्धस्य चमत्कारं करोतीति । **'गतोऽस्तमर्क'** इत्यादौ संख्याभेदः प्रदर्शित एव । विषयभेदं दर्शयति **कस्स व ण होई**ति ।

कस्यैव न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम् ।
सभ्रमरपद्माघ्राणनशीले वारितवामे सहस्वेदानीम् ॥

अत्र व्रणिताधरदर्शनात् कुपिते कमितरि तत्कोपोपशमाय नायिकां प्रति विदग्धसख्या व्यपदेशेन साधिक्षेपोक्तौ वाच्यः सखीविषयः । निरागसं प्रति कोपो न कार्य इति व्यङ्ग्यस्तत्कामुकविषय इति विषयभेदः । एवंविधविविधभेदसद्भावेऽपि यद्यैक्यमङ्गीक्रियेत, तदा भेदस्य वार्तैवास्तमियादित्याह—**भेदेऽपि यद्येकत्वमिति** । भेदेऽपीति प्रतिवाक्यमभिसम्बध्यते । उक्तार्थे प्रामाणिकसंवादः—उक्तं हि **अयमेव** हीत्यादि । भेदो हि नामायमेव, यद् विरुद्धधर्मसम्बन्धः । भेदहेतुश्चायमेव, यत् कारणभेदः ।

In cases such as this the expressed meaning is reproach, while the suggested meaning is praise. (In all the examples cited above the suggested meaning differs from the expressed meaning in point of character).

The expressed and the suggested are distinct in point of time because of antecedence and subsequence of the cognition; in point of media : The word is the medium (for the expressed), while the word, its part, its meaning, letters, and their peculiar composition are the media (for the suggested); in point of instrumentality : the expressed is known by the knowledge of grammar, while the suggested is known with its help as also with that of context and other auxiliary conditions and with transparency of discriminative intellect; in point of effect: the expressed produces a mere comprehension in one who knows the meaning of words, while the suggested produces charm in men of taste alone; in point of number as it has been shown above in the instance 'the sun has set'.

Who is not enraged at the sight of his beloved's ulcerated lower lip? O you, who are habituated to smell the lotus with bees, did not heed my warning, suffer now. 135

In such an instance there is difference in point of the person addressed because the expressed relates to the companion (of the speaker) and the suggested relates to her husband etc.

Even when being distinct (on so many points) if the expressed and the suggested are taken as one, there could never be any difference even between the blue, and the not-blue and the like. It is said :

"The apprehension of the opposite attributes and the difference of cause, this, in fact, constitutes difference or the ground of difference."

वाचकानामर्थापेक्षा, व्यञ्जकानां तु न तदपेक्षत्वमपीति न वाचकत्वमेव व्यञ्जकत्वम् ।

किञ्च 'वाणीरकुडुङ्ग'त्यादौ प्रतीयमानमर्थमभिव्यज्य वाच्यं स्वरूप एव यत्र विश्राम्यति, तत्र गुणीभूतव्यङ्ग्ये अतात्पर्यभूतोऽप्यर्थः स्वशब्दानभिधेयः प्रतीतिपथमवतरन् कस्य व्यापारस्य विषयतामवलम्बताम् ।

ननु 'रामोऽस्मि सर्वं° सह' इति, 'रामेण प्रियजीवितेन तु कृतं प्रेम्णः प्रिये नोचितम्' इति, 'रामोऽसौ भुवनेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं पराम्' इत्यादौ लक्षणीयोऽप्यर्थो नानात्वं भजते, विशेषव्यपदेशहेतुश्च भवति, तदवगमश्च शब्दार्थायत्तः प्रकरणादिसव्यपेक्षश्चेति कोऽयं नूतनः प्रतीयमानो नाम । उच्यते । लक्षणीयस्यार्थस्य नानात्वेऽपि अनेकार्थशब्दाभिधेयवन्नियतत्वमेव । न खलु मुख्येनार्थेनानियतसम्बन्धो लक्षयितुं शक्यते । प्रतीयमानस्तु प्रकरणादिविशेषवशेन नियतसम्बन्धः अनियतसम्बन्धः सम्बद्धसम्बन्धश्च द्योत्यते ।

एवं वाच्यव्यङ्ग्ययोरर्थयोर्भेदमभिप्रसाध्य वाचकव्यञ्जकयोः शब्दयोरपि भेदं दर्शयति—**वाचकानामर्थे**त्यादि । वाचकानि हि पदानि वाच्यार्थमपेक्ष्यैव वाचकतां लभन्ते । व्यञ्जकानि तु पदानि वाच्यं क्वचिदपेक्ष्य क्वचिदनपेक्ष्यापि व्यञ्जकतां लभन्ते । अभिधामूले हि ध्वनौ वाच्यमपेक्ष्य । अत्यन्ततिरस्कृतवाच्यादौ त्वनपेक्ष्यैव ।

एवं ध्वनाविव व्यङ्ग्यस्य शक्त्यन्तरागोचरतां गुणीभूतव्यङ्ग्येऽपि दिङ्मात्रेण दर्शयति—**वाणीरे**त्यादिना । वाणीरकुडुङ्गुड्डीणेत्यत्र हि गुणीभूतव्यङ्ग्ये सचमत्कारो वाच्योऽर्थः स्वोपपादनाय व्यङ्ग्यमर्थमभिव्यज्य पुनस्तरां सचमत्कारस्वरूप एव विश्राम्यति । अतो वाच्य एव तात्पर्यविषय इति तत्रैव तात्पर्यशक्तिर्युक्ता, न तु व्यङ्ग्ये । अत्र व्यञ्जनं चेन्नाङ्गीक्रियेत, तदानभिधेयो व्यङ्ग्योऽर्थः शक्त्या प्रतीयमानः कस्य व्यापारस्य विषयोऽस्तु ।

इत्थमभिधातात्पर्यशक्त्योरगोचरत्वं व्यङ्ग्यस्य सप्रपञ्चमुपपाद्य लक्षणाशक्त्यगोचरतामपि युक्तिविशेषैरुपपादयति—**ननु रामोऽस्मी**त्यादिना । लक्षणीयो हि रामशब्दार्थो **'रामोऽस्मि** सर्वं सह' इत्यत्र कठिनहृदयत्वदुःखैकायतनत्वादिलक्षणेऽर्थान्तरे संक्रामति । **'रामेण प्रियजीवितेने'**त्यादौ कैतवस्नेहत्वादौ । **'रामोऽसौ भुवनेष्वि'**त्यादौ तु सकललोकातिशयितविक्रमत्वादौ । अतो लक्षणीयार्थस्य नानात्वं दृश्यते, वाच्यापेक्षया विशेषव्यपदेशहेतुत्वं च, शब्दार्थायत्तश्चैतदवगमः, वैविध्ये प्रकरणवक्त्रादिसव्यपेक्षश्चेति या या व्यङ्ग्ये सामग्री

The expressive words require the object of denotation, but the suggestive ones do not require that. Hence (also) the suggestiveness is not expressiveness.

And again, in such a case of subordinate suggestion as "on hearing the twitter of birds on the *vetasa*-bower etc." (verse 132 where the expressed sense having yielded the suggested meaning rests within itself, even unintended meaning, not denoted by the words, appears in our range of cognition. Under what function of words would such a meaning be included ?

It may be urged that in the instances such as—(i) 'I am Rāma and shall bear every thing,' (ii) 'By Rāma, who loves his (own) life, O beloved one, has not been done what befits love,' (iii) 'This is Rāma who has acquired great fame in the worlds by his excellences of valour'—even the indicated sense becomes manifold and the cause of particular nomenclature.* Its comprehension also is based on (both) words and their meanings and requires the aid of the context and other means (as does the suggested meaning). Why then admit of this new kind of meaning, namely, the suggested one ? To this our reply is as follows :

Even though indicated sense is manifold, yet just like the denoted meaning of homonymous words, its number is definite (and limited).

Moreover, a meaning (under indication) which has no definite relation with the primary meaning, cannot be indicated. But the suggested one, due to the context and other individual conditions, (i) may have a definite relation, (ii) may not have a definite relation, or (iii) may be only related to what is (directly) related (to the expressed meaning).

---

* In (i) the word Rāma indicates one who can suffer all kinds of pain. In (ii) it indicates one who has no pity for his distressed love; and in (iii) it indicates one who has killed great demons.

न च

अत्ता एत्थ णिमज्जइ एत्थ अहं दिअहअं पलोएहि ।
मा पहिअ रत्तिअन्धअ सेज्जाए महं णिमज्जसिहि ॥१३६॥

[Gāthāsaptaśatī, VII. 67]

इत्यादौ विवक्षितान्यपरवाच्ये ध्वनौ मुख्यार्थबाधः । तत् कथमत्र लक्षणा । लक्षणायामपि व्यञ्जनमवश्यमाश्रयणीयमिति प्रतिपादितम् । यथा च समयसव्यपेक्षाभिधा, तथा मुख्यार्थबाधादित्रयसमयविशेषसव्यपेक्षा लक्षणा । अत एवाभिधापुच्छभूता सेत्याहुः ।

न च लक्षणात्मकमेव ध्वननं, तदनुगमेन तस्य दर्शनात् । न च तदनुगतमेव, अभिधावलम्बनेनापि तस्य भावात् । न चोभयानुसार्येव, अवाचकवर्णानुसारेणापि तस्य दृष्टेः । न च शब्दानुसार्येव, अशब्दात्मकनेत्रत्रिभागावलोकनादिगतत्वेनापि तस्य प्रसिद्धेरिति अभिधातात्पर्यलक्षणात्मकव्यापारत्रयातिवर्ती व्यञ्जनध्वननादिपर्यायो व्यापारोऽनपह्नवनीय एव ।

तत्र 'अत्ता एत्थे' त्यादौ नियतसम्बन्धः । 'कस्स व ण होइ रोसो' इत्यादौ अनियतसम्बन्धः ।

दर्शिता, सा सर्वैव लक्ष्ये दृश्यत इति कोऽयं प्रतीयमानो नाम नूतनोऽर्थ इत्याक्षेपः । तदेतत् समाधत्ते--**उच्यते लक्षणीयस्ये**त्यादिना । यद्यप्युक्तोदाहरणेषु लक्षणीयोऽर्थो नानारूपः, अथापि अनेकार्थशब्दवाच्यवन्नियतत्वं न जहाति । ननु कथं नियतत्वमित्यत आह---**न खलु मुख्येने**त्यादि । ननु दोषोऽयं व्यङ्ग्येऽपि तुल्य इत्यत आह---**प्रतीयमानस्त्वि**त्यादि । यथा प्रतीयमानो मुख्येन नियतसम्बन्धोऽनियतसम्बन्धः सम्बद्धसम्बन्धश्च तदुदाहृत्य दर्शयिष्यति । लक्ष्यपक्षे स्फुटं दोषान्तरमाह —**न च अत्ता** एत्थेत्यादि ।

श्वश्रूरत्र शेते अत्राहं दिवसं प्रलोकय ।
मा पथिक रात्र्यन्ध शय्यायां मम निमाङ्क्षीः ॥

दिवसमित्यत्यन्तसंयोगे द्वितीया । अत्र हि न वाच्यबाधः, अन्यपरत्वेन विवक्षणात् । अतो लक्षणैव नास्ति । कथं लक्ष्यत्वं व्यङ्ग्यस्य सङ्गच्छताम् । ननु यत्र लक्षणा तत्रायं दोष इत्यत आह—**लक्षणायामपी**त्यादि । प्रतिपादितं, द्वितीय इति शेषः । नियतत्वादभिधालक्षणयोर्भेदोऽप्यल्पक इत्याह—**यथा** च **समये**त्यादि । अभिधाप्रायतायाः प्रामाणिकप्रसिद्धिं दर्शयति—**अत एवाभिधापुच्छे**त्यादि ।

इत्थमभिधालक्षणयोर्नियतत्वं प्रसाध्य व्यञ्जनस्यानियतत्वं नानामुखमुपपादयति—**न च लक्षणात्मकमेवे**त्यादिना । तर्ह्यभिधानुसारीति नियच्छाम इत्यत आह—**न च तदनुगतमेवे**त्यादि । तर्ह्युभयानुसारत्वेन नियम्यत इत्यत आह—**न चोभये**त्यादि । तर्हि शब्दानुगमेन नियम इत्यत आह—**अशब्दात्मके-**

Here sinks my mother-in-law (lost in sleep); and I here, mark this well while there is day-light (i.e. before it is dark). O night-blind traveller, do not tumble into our bed (at night).
136

In such an instance of suggestion, where the intended expressed is intent on the other meaning, there is no incompatibility of the primary meaning. Then how could there be indication here ? And then it has already been shown that in indication also, the suggestion is invariably to be taken into account. And just as denotation is dependent upon convention, so is indication dependent upon the particular convention related to the (three conditions of) incompatibility of the primary meaning and others. Therefore, it is described as the tail of denotation.

And the suggestion is not verily of the nature of indication because it (i.e. suggestion) is seen to follow that (i.e. indication). Nor does it invariably follow that (indication) because it may arise on the basis of denotation also. Nor again does it invariably follow both (i.e. Denotation and Indication), because it is seen on the basis of inexpressive letters also. The suggestion is not based on words (as also on letters and syllables) either, because it is known to be related to the side-long glance and the like, which are non-verbal in their character. Thus the function, which has many synonyms such as suggestion, reverberation, and which is beyond the three functions of the nature of Denotation, Import and Indication, cannot be denied.

There, in the instance, such as 'my mother-in-law sinks here (verse 136) the suggested meaning has a definite relation (with the expressed meaning); in 'who is not enraged' etc. (verse 135) the relation is not definite.

त्यादि । तदेतन्मतत्रयमुपसंहरति—**इत्यभिधातात्पर्येत्यादि** । **अत्ता एत्थेत्यादाविति** '**अत्ता एत्थ णिमज्जइ**' इत्यत्र हि व्यङ्ग्यो वाच्येन नियतसम्बन्धः । **कस्स व ण होई** इत्यादि । अत्र हि विषयभेदाद् अनियतसम्बन्धः ।

विवरीअरए लच्छी बह्मं दट्ठूण णाहिकमलत्थं ।
हरिणो दाहिणणअणं रसाउला झत्ति ढक्केई ॥१३७॥
[Vajjalaggam, 611]

इत्यादौ सम्बद्धसम्बन्धः । अत्र हि हरिपदेन दक्षिणनयनस्य सूर्यात्मकता व्यज्यते । तन्निमीलनेन सूर्यास्तमयः । तेन पद्मस्य सङ्कोचः । ततो ब्रह्मणः स्थगनम् । तत्र सति गोप्याङ्गस्यादर्शनेऽनिर्यन्त्रणं निधुवनविलसितम् ।

अखण्डबुद्धिनिर्ग्राह्यो वाक्यार्थ एव वाच्यार्थः, वाक्यमेव च वाचकमिति येऽप्याहुः, तैरप्यविद्यापदपतितैः पदपदार्थकल्पना कर्तव्यैवेति तत्पक्षेऽप्यवश्यमुक्तोदाहरणादौ विध्यादिर्व्यङ्ग्य एव ।

ननु वाच्यादसम्बद्धस्तावन्न प्रतीयते, यतः कुतश्चिद् यस्यकस्यचिदर्थस्य प्रतीतेः प्रसङ्गात् । एवञ्च सम्बन्धाद् व्यङ्ग्यव्यञ्जकभावोऽप्रतिबन्धेऽवश्यं न भवतीति व्याप्तत्वेन नियतधर्मनिष्ठत्वेन च त्रिरूपाल्लिङ्गात् लिङ्गिनि ज्ञानं यदनुमानं तद्रूपः पर्यवस्यति । तथा हि—

विवरीएत्यादि ।

विपरीतरते लक्ष्मीर्ब्रह्माणं दृष्ट्वा नाभिकमलस्थम् ।
हरेर्दक्षिणनयनं रसाकुला झटिति स्थगयति ॥

अत्र सम्बद्धसम्बन्धतां विविच्य दर्शयति—**अत्र हि हरिपदेने**त्यादि । अनेन वाच्यसम्बद्धैर्व्यङ्ग्यैरुत्तरोत्तरैर्व्यङ्ग्यैः सम्बन्ध इति सम्बद्धसम्बन्धता ।

ननु '**सत्यं ज्ञानमि**'त्यादिवाक्यनयेनाखण्डया बुद्ध्या निर्ग्राह्यो वाक्यार्थ एव वाच्यः, वाक्यमेव वाचकमिति मन्वानान् प्रत्याह—**अखण्डबुद्धी**त्यादिना । सत्यज्ञानादिषु हि वाक्येषु धर्मधर्मिभावाभावादखण्डो योऽयं परब्रह्मात्मको वाक्यार्थः, स एव वाच्यः । अखण्डं वाक्यमेव वाचकम् । अनया प्रक्रियया व्यङ्ग्योऽपि विध्यादिर्वाच्य एवेत्याक्षेपः । **तैरप्यविद्ये**त्यादि । अविद्यापदं व्यवहारदशा । योऽयमेषां समर्थनप्रयासस्तदेव ह्यविद्यापदं भवति । तत्पतितैः पदपदार्थकल्पना दुर्लङ्घ्या । विद्यापदे तु समर्थनादिसमस्तप्रपञ्चोपशमशालिनि तूष्णीम्भावोऽपि नावशिष्यत इति तेषामपि मते निर्विवादा व्यङ्ग्यसिद्धिः ।

अथ सर्वेषां ध्वनीनामनुमानेऽन्तर्भाव इत्युक्तवतो **व्यक्तिविवेककृ**तो मतमुपन्यस्यति—**वाच्यादसम्बद्धस्तावदि**त्यादिना । यद्यसम्बद्धः प्रतीयेत, ततः को दोष इत्यत आह—**यतः कुतश्चिदि**त्यादि । सम्बन्धाभ्युपगमे तु व्यङ्ग्यव्यञ्जकभावः सर्वथा प्रतिबद्ध एव भवती (त्यत आ? त्या)ह—**एवञ्च सम्बन्धादि**त्यादि ।

In the course of inverted sexual enjoyment Lakṣmī saw Brahman seated on the navel-lotus (of her husband); agitated by passion she at once closes the right eye of Viṣṇu. 137

In such an instance the relation (of the suggestion) is with the related (i.e. the suggested meaning is very indirectly related with the expressed meaning). Here by the word Hari is suggested that the right eye (of Viṣṇu) is the Sun itself; hence by its closing (is suggested) the sunset; and by that the closing of the lotus, and the consequent veiling of Brahman (seated upon the lotus which closes on sunset which itself is brought about by closing the right sun-eye of Viṣṇu). In such a condition, her private parts being invisible, the unrestricted sexual enjoyment is suggested.

Others (the grammatico-philosophers) have held that it is the sentence-meaning alone which, grasped through a single indivisible cognition, is the expressed sense (*vācya*), and it is the sentence alone that is expressive (*vācaka*). But these (theorists) also, when descending down to the realm of practical reality (*avidyā*), must make the assumption of the word and the word-meaning; so that even according to their view the idea of affirmation and the like, in the instances such as cited above (i.e. 'the slopes of your breasts have its sandal completely washed off' etc.), should necessarily be considered as thc suggested.

It may be urged (by the Logicians) that what is not connected with the expressed is not suggested, because in that case there would be contingency of cognition of any meaning from any word. Thus the relation being essential, the state of being the suggester and the suggested is, undoubtedly, not possible in the absence of a definite relation, therefore, on account of invariable concomitance (between the expressed, i.e. the suggester, and the suggested) and due to the existence in the definite subject, characterised by mark, *the suggestiveness* turns out to be of the character of inference, which is the cognition of the subject, characterised by the threefold mark*. To explain the same :

---

*A mark, for example, smoke in inferential cognition, is

भम धम्मिश्र वीसत्थो सो सुणश्रो श्रज्ज मारिश्रो देण ।
गोलाणइकच्छकुडुङ्गवासिणा दरिश्रसीहेण ॥१३८॥

[Gāthāsaptaśatī, II. 75]

श्रत्र गृहे श्वनिवृत्त्या भ्रमणं विहितं गोदावरीतीरे सिंहोपलब्धेरभ्रमणमनुमापयति । यद्यद् भीरुभ्रमणं तत्तद् भयकारणनिवृत्त्युपलब्धिपूर्वकम् । गोदावरीतीरे च सिंहोपलब्धिरिति व्यापकविरुद्धोपलब्धिः ।

प्रतिबन्धो नियतः सम्बन्धः । इत्थं व्याप्तिसिद्धावनुमानता ध्वनेः पर्यवस्यतीत्याह—**व्याप्तत्वेन नियतेत्यादि ।** सपक्षे सत्त्वं विपक्षाद् व्यावृत्तिश्च व्याप्तत्वम् । नियतधर्मिनिष्ठत्वं पक्षधर्मता । इत्थं त्रिरूपाल्लिङ्गाद् वाच्यरूपाल्लिङ्गिनि व्यङ्ग्याभिमते यदनुमानात्मकं ज्ञानं तद्रूपः पर्यवस्यति, तवायं व्यञ्जनाव्यापार इति शेषः । तामिमामनुमानतां प्रसिद्धे **ध्वनिकारोदाहरणे** योजयितुमाह—**तथा हि भम धम्मिश्र इति ।**

found to be present in the ground or subject of inference, say a hilltop. It is also known to be present in the similar instances, say the kitchen, and is never found in the negative instance, say the lake. Hence the mark has three forms or characteristics, known as *pakṣa-sattva, sapakṣasattva* and *vipakṣasattva* or *vipakṣavyāvṛtti* in Sanskrit Logic. According to some commentators of KP. like Māṇikyacandra and Śrīvidyācakravartin, the term '*vyāptatvena*' in the text stands for the existence of the mark in the similar instance (*sapakṣa*) and its absence from the negative instance (*vipakṣa*). The other term of the text, i.e. '*niyatadharmi-niṣṭhatvena*' implies the existence of the mark in the subject of inferential proposition (*pakṣa*). While according to some other commentators, like Bhaṭṭa Gopāla and Jhalakīkara, the term '*vyāptatvena*' implies merely the existence of the mark in the similar instance; the term '*niyata*' ensures its absence from the negative instance and the term *dharmaniṣṭhatvena* stands for the existence of the mark in the subject of proposiion, for example, hilltop. If we accept the latter view the term '*niyata*', which is expressly an epithet of the subject of inference, will have to be taken out and its linguistic form will have to be changed into '*niyatatvena*'. Hence my preference for the first interpretation.

O pious man, roam about freely; that dog has been killed today by that fierce lion living in the marshy dells of the Godāvarī. 138

Here the roaming about in the house,[1] which is enjoined upon due to the removal of the dog, leads to the inference of not roaming about because of the presence of the lion on the banks of the Godāvarī. Every case of the coward's roaming about is a case proceeding from the knowledge of disappearance of the cause of fear. But on the banks of the Godāvarī there is the presence of the lion; hence what is found is contrary to what is invariably concomitant.[2]

भ्रम धार्मिक विस्रब्धः स श्वाद्य मारितस्तेन ।
गोदानदीकच्छनिकुञ्जवासिना दृप्तसिंहेन ॥

इयं सङ्केतनिकुञ्जे कुसुमाद्यर्थिनो धार्मिकस्य भ्रमणनिवारणपरा स्वैरिण्युक्तिः। इह व्यङ्ग्यस्यानुमेयतां दर्शयितुमाह—**अत्र गृह** इत्यादिना । श्वा सिंहेन व्यापादित इति श्वनिवृत्त्या गृहे यदेतद् भ्रमणं विहितं तद् गोदावरीतीरे सिंहोपलब्धिमाविष्कुर्वद् भ्रमणनिषेधमनुमापयति । तत्र लिङ्गस्य व्याप्तिं दर्शयति—(**यद्यदित्यादि ।**) यद्यद् भीरुभ्रमणं तत्तद् भयकारणनिवृत्त्युपलब्ध्या प्रतिबद्धमिति यावत् । गोदावरीतीरे तु सिंह उपलभ्यत इति व्यापकविरुद्धोपलब्धिः । तदेतद् दूषयति—**अत्रोच्यते भीरुरपीत्यादिना** । यद्यद् भीरुभ्रमणं तत्तद भयकारणनिवृत्त्युपलब्धिपूर्वकमिति यदुक्तं तन्नास्ति । यतो भीरुरपि भयकारणे सत्यपि

1. The term *gṛhe* in the *Vṛtti* looks hardly relevant. Its explanation by the commentators is not convincing.
2. *Vyāpti* or invariable concomitance is the relation of the *Vyāpya* (Middle Term) and the *Vyāpaka* (Major Term). It is the universal accompaniment of the Middle Term by the Major Term. In the example of *Vyāpti*, such as wherever there is smoke, there is fire, the smoke is invariably pervaded by the fire. The smoke is *Vyāpya* and the fire is *Vyāpaka*. In the case of an invariable concomitance between the absence of danger and the coward's roaming about, the presence of the lion is contrary to the *Vyāpaka*, hence the expressed sense of roaming about leads to the inferential cognition of not roaming about.

अत्रोच्यते—भीरुरपि गुरोः प्रभोर्वा निदेशेन प्रियानुरागेण अन्येन चैवम्भूतेन हेतुना सत्यपि भयकारणे भ्रमतीत्यनैकान्तिको हेतुः। श्वतो बिभ्यदपि वीरत्वेन सिंहान्न बिभेतीति विरुद्धोऽपि। गोदावरीतीरे सिंहसद्भावः प्रत्यक्षादनुमानाद्वा न निश्चितः, अपि तु वचनात्। न च वचनस्य प्रामाण्यमस्ति, अर्थेनाप्रतिबन्धादित्यसिद्धश्च। तत् कथमेवंविधाद्धेतोः साध्यसिद्धिः। तथा 'निश्शेषच्युते'त्यादौ गमकतया यानि चन्दनच्यवनादीन्युपात्तानि, तानि कारणान्तरतोऽपि भवन्ति। अतश्चात्रैव स्नानकार्यत्वेनोक्तानीति नोपभोग एव प्रतिबद्धानीत्यनैकान्तिकानि। व्यक्तिवादिना चाधमपदसहायानामेषां व्यञ्जकत्वमुक्तम्। न चात्राधमत्वं प्रमाणप्रतिपन्नमिति कथमनुमानम्।

च गुरुनिदेशादिना भ्रमति। अतो हेतुः पक्षत्रयवर्तनादनैकान्तिकः। विरोधमुद्भावयति—**श्वतो बिभ्यदपीति**। न हि यः श्वतो बिभेति स नियमेन भीरुः, मृगेन्द्रमृगयोरपि क्वचिच्छुनो भयदर्शनात्। अतो हेतुर्विरुद्धः। असिद्धमुद्भावयति—**गोदावरीतीर** इत्यादि। येयं धार्मिकस्य गोदावरीतीरे सिंहोपलब्धिः, न हि सा प्रत्यक्षतोऽनुमानतो वा सिद्धा, अपि त्वस्मादेव स्वैरिणीवचनात्। न ह्यस्य प्रामाण्यमस्ति, प्रतारणपरत्वेनार्थाप्रतिबन्धात्। अतो हेतुरसिद्धश्च। दोषाणामचलत्वान्निरुत्तरं **महिमानमपहसति—तत् कथमित्यादि**। यथैव ध्वनिकारोदाहरणे निराकृतोऽनुमानपक्षस्तथा स्वोदाहरणेऽपि निराकर्तुमाह—**तथा निश्शेषच्युतेत्यादाविति**। गमकतया उपभोगलिङ्गतया। **कारणान्तरतोऽपीति**। नह्युपभोगव्यतिरिक्तं चन्दनच्यवनादेः कारणं नास्तीति प्रतीत्यपलापोऽपि दुश्शक इत्यभिप्रेत्याह—**अतश्चात्रैवेति**। अतोऽप्रतिबन्धाद् अनैकान्तिकमित्याह—**नोपभोग एवेति**। इत्थं पराजितस्य प्रतिबन्धपरिग्रहमपि प्रत्याचष्टे—**व्यक्तिवादिना चेत्यादिना**। **अधमपदेति**। सर्वथा तावदर्थवता भाव्यमधमपदेन। तेन स्वार्थसहितेन कृतसाहाय्यानां चन्दनच्यवनादीनामप्रतिबन्धेऽपि व्यञ्जकत्वं युक्तमुक्तं व्यक्तिवादिना। तर्ह्यधमपदसहकृतानां लिङ्गत्वेनानुमानं किं न स्यादित्यत आह—**न चात्राधमत्वमित्यादि**। अधमत्वस्य प्रमाणतोऽनवधारणाद् नानुमानमुपपद्यते। तर्ह्यधर्मत्वस्य निष्प्रमाणकत्वलक्षणो दोषस्त्वामपि किं नोपमृद्नीयादित्यत आह—**एवंविधादर्था**दित्यादिना। एवंविधाद् अधमपदसहकृतात् चन्दनच्यवनादिरूपाद् व्यञ्जकादर्थाद् एवंविधः उपभोगरूपो व्यङ्ग्योऽर्थ उपपत्त्यनपेक्षत्वेऽपि प्रकाशते, किमिदमधमत्वं प्रमाणिकमुताप्रामाणिकमित्युपपत्तिनैरपेक्ष्येण प्रतीयते। न हि '**निश्शेषच्युते**'त्यतः काव्यरूपाद् भवन्ती

To this our reply is as follows :

Even a coward, by the order of his teacher or the master, or due to love for his beloved, or by some such cause, roams about even when the cause of fear is present; hence the probans is non-conclusive * Even though afraid of the dog, he may not, being brave, fear the lion, hence the probans is adverse also. The presence of the lion on the banks of the Godāvarī is not ascertained either by perception or by inference but (merely) from the words (of the woman). There is no validity of (her) words as they might be unrelated to fact, hence the *probans* is unestablished also. Then, how, such a (defective) *probans* can prove the existence of the *probandum* ?

In the same manner, in cases like "the slope of her breasts has its sandal completely washed off. . ." the wash-off of the sandal and the like, which are taken as the marks, are such which can be effected by some other means also; as in fact, they have been described here in this very verse, as the effects of bathing; so that they are not definitely relatad to the dalliance only—hence these *probans* (marks) are descrepant.

By the suggestionist, on the other hand, such marks, with the aid of the word wretch, are described as suggestive. And here the wretchedness is not established by valid reason; so how can there be inference ?

---

* The *probans* that strays away or is discrepant is called '*savyabhicāra*'. It is referred to here as '*anaikāntika*', literally not unfailing in its association with the *sādhya* or *probandum*.

एवंविधादर्थादेवंविधोऽर्थ उपपत्त्यनपेक्षत्वेऽपि प्रकाशत इति व्यक्तिवादिनः पुनस्तदद्‌दूषणम् ।

इति काव्यप्रकाशे ध्वनिगुणीभूतव्यङ्ग्यसङ्कीर्णभेदनिर्णयो नाम

पञ्चम उल्लासः

कामुकोपभोगरूपार्थान्तरप्रतीतिः कामुकस्य दासीप्रधर्षकत्वमधमत्वमुपपन्नं व्यपेक्ष्य जायते । अतः उपपत्त्यनुपपत्तिचिन्ता तवानुमाने लक्षणशरीरं, व्यञ्जके तु लक्षणकोटिरेव न भवति । अतस्तवैतदनुपपन्नत्वदूषणमित्येतदुक्तप्रायमेवेत्यभिप्रायेणाह—**व्यक्तिवादिनः पुनस्तददूषणमिति** ।।

सम्यगत्र प्रमेयस्य हृदयोद्‌घाटनं कृतम् ।
प्रेक्षावन्तः परीक्षन्तां प्रीत्या वा स्पर्धयाथवा ।।

इति संस्कृतसार्वभौमप्राकृतपृथ्वीश्वरशौरसेनीशिरोमणिमागधीमकरध्वज-पैशाचीपरमेश्वरापभ्रंशराजहंसालङ्कारिकचक्रवर्त्तिध्वनिप्रस्थानपरमाचार्यकाव्य-मीमांसाप्रभाकरकविसहृदयशिरोमणिसहजसर्वज्ञपरमयोगीश्वरश्रीमत्त्रि-भुवनविद्याचक्रवर्त्तिवंशावतंसमहाकविश्रीविद्याचक्रवर्त्तिकृतौ
सम्प्रदायप्रकाशिन्यां काव्यप्रकाशबृहट्टीकायां
पञ्चम उल्लासः ।

From such a meaning such a sense flashes forth, without requiring any validity,—this again is no defect according to the suggestionist.

Thus ends the Fifth Flash in the Poetic Light, namely, the Determination of Collocated Divisions of Poetry of Principal Suggestion and Poetry of Subordinated Suggestion.

षष्ठ उल्लासः

शब्दार्थचित्रं यत् पूर्वं काव्यद्वयमुदाहृतम् ।
गुणप्राधान्यतस्तत्र स्थितिश्चित्रार्थशब्दयोः ॥ ४८ ॥

न तु शब्दचित्रेऽर्थस्याचित्रत्वम्, अर्थचित्रे वा शब्दस्य । तथा चोक्तं—

"रूपकादिरलङ्कारस्तस्यान्यैर्बहुधोदितः ।
न कान्तमपि निर्भूषं विभाति वनितामुखम् ॥
रूपकादिमलङ्कारं बाह्यमाचक्षते परे ।
सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम् ॥
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी ।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः ॥"

[Bhāmaha's KA. I. 13-15]

इति ।

क्रमप्राप्तं चित्रकाव्यं लिलक्षयिषुः शब्दार्थहेतुकतया द्वैविध्यं तावदनुस्मारयितुं सूत्रमेवावतारयति—**शब्दार्थचित्रमिति** । शब्दचित्रमर्थचित्रं चेति यत् प्रथमोल्लासे काव्यद्वयमुदाहृतम्, उभयत्रापि तत्र प्रत्येकमुभयवैचित्र्येऽपि गुणप्राधान्यतो विभागः । एकत्र शब्दस्य साक्षाद् वैचित्र्यम्, अर्थस्य तद्द्वारा, अन्यत्र पुनरर्थस्य साक्षात् शब्दस्य तद्द्वारेति गुणप्रधानभावेन निमित्तेनानुप्रासादि शब्दचित्रमुपमादिस्त्वर्थचित्रमिति शब्दार्थयोर्वैचित्र्यविभागेनावस्थानम् । यत एवं शब्दार्थयोश्चित्रा स्थितिरतश्चित्रं काव्यं द्विधोपदर्शनीयमिति कारिकार्थनिष्कर्षः ।

तदेतदुपपादयितुमुपक्रमते—**न तु शब्दचित्र** इति । प्रतिबद्धत्वादित्यर्थः ।

किं शब्दार्थयोर्मिलितयोरेव वैचित्र्यादविभागेन चित्रकाव्यमेकमाहोस्विद् विभागशो द्विरूपमिति सन्देह उद्भावितः, येन सन्दिग्धेऽर्थे प्रवर्तनार्हाणां पूर्वाचार्यन्यायकारिकाणामवतरणिका कृता भवतीति कारिकाः समवतारयति—**तथा चोक्तं रूपकादिरित्यादिना** । तिसृष्वेतासु कारिकासु लिलक्षयिषितस्य चित्रकाव्यस्य स्वरूपतः सिद्धिरर्थालङ्कारैकात्मकत्वं च प्रथमकारिकया दर्शितम् । अथ द्वितीयकारिकाप्रथमार्धेन तु शब्दार्थयोर्वैचित्र्यस्य मिथः प्रतिबन्धादविभाग इति, रूपकादिरलङ्कारोऽपि अनुप्रासादिवद् बाह्य एवेति प्रतिपादितम् । इत्थं पूर्वपक्षमुत्थाप्य समनन्तरया त्वर्धान्तरसहितया कारिकया बाह्याभ्यन्तरत्वेना-

SIXTH FLASH

48. The two kinds of poetry, (the one) striking in the word and (the other) striking in the meaning, have been mentioned before; the existence of the striking meaning or the word is by subservience or prominence (of either the meaning or the word).*

It is not that in word-portrait there is no strikingness of the meaning, or in the portrait of meaning that of the word. As it has been said :

"Its embellishment, *rūpaka* (metaphor) and the like, is expounded by others in several ways. Even the charming face of a beautiful woman does not shine without ornaments. Others say that the poetic figure, *rūpaka* and the like, is external. They deem the perfect use (*vyutpatti*) of nouns and verbs as the embellishment of speech."

"It is this that they call beautification of the word (*sauśabdya*); there is no such perfection of the meaning on account of the division of poetic figure into that of word and sense; both (i.e. beautiful words and beautiful ideas, *sauśabdya* and *arthavyutpatti*) are desired by us."

लङ्कारभेदः सोपपत्तिकं दर्शित इति कारिकात्रयस्य पिण्डितार्थः। अथ शब्द-
सङ्गत्या व्याकुर्मः—रूपकादिरर्थालङ्कारवर्गः। तस्य काव्यस्यान्यैराचार्यैर्बहुधोदितः

* The lowest kind of poetry known as *citra-kāvya* is either striking in the word or in the meaning. When the charm of meaning is more prominent it is called *arthacitra*, but in such a case also the charm of sound is not wholly absent, it is merely subservient to the charm of the sense; so also when the charm of sound is more prominent, the charm of fanciful meaning is not absolutely wanting, it is only subordinate to the former.

शब्दचित्रं यथा—

प्रथममरुणच्छायस्तावत् ततः कनकप्रभ-
स्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः ।
उदयति ततो ध्वान्तध्वंसक्षमः क्षणदामुखे
सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ॥१३९॥

[Sarasvatīkaṇṭhābharaṇa, I. 27]

अर्थचित्रं यथा—

ते दृष्टिमात्रपतिता अपि कस्य नात्र
क्षोभाय पक्ष्मलदृशामलकाः खलाश्च ।
नीचाः सदैव सविलासमलीकलग्ना
ये कालतां कुटिलतामिव न त्यजन्ति ॥१४०॥

नानाप्रकारमुपदर्शित इत्यनेन शब्दालङ्कारानभ्युपगमः सूचितः । ननु रसप्रकर्ष-शालिनस्तदनुगुणगुणसमवायोपशोभिनः संघटनासमुन्मीलितसौभाग्यातिशयस्य काव्यस्य किं रूपकाद्यलङ्कारयोगेनेति प्रत्यवतिष्ठमानान् व्यतिरेकदृष्टान्तेन प्रत्याचष्टे—**न कान्तमपीति** । न हि कान्तं सदपि वनितामुखमलङ्कृतवदनलङ्कृतं विशिष्य भाति । अनेन शोभापौष्कल्यसिद्धयर्थमलङ्काराणामवश्यपरिग्राह्यत्व-प्रदर्शनेनालङ्कारात्मनश्चित्रकाव्यस्यारम्भणीयत्वमुपपादितम्, उपपादयिष्यमाणस्य च गुणालङ्कारविभागस्य बीजमप्युपक्षिप्तम् । अथ शब्दचित्रमर्थचित्रं चेति विभागमसहमानैरन्यैरर्थालङ्कारवर्गापलापः पूर्वपक्ष उत्थाप्यत इत्याह—**रूपकादिमिति** । यो ह्ययं रूपकादिरर्थालङ्कारस्तमनुप्रासादिशब्दालङ्कारवत् केचिद् बाह्यमाचक्षते । तत्र मिथो वैचित्र्यप्रतिबन्धरूपो हेतुः स्फुटत्वात् कारिकया नोपात्तः । अथ सिद्धान्तयति—**सुपां तिङां चेति** । यदेतदाभ्यां मिथो वैचित्र्यप्रतिबन्धमात्रेण शब्दार्थचित्रयोरविशेषेण बाह्यत्वमाभ्यन्तरत्वमेव वाशङ्कितं, न तदुपपद्यते । शब्दार्थवैचित्र्ययोर्विजातीयत्वात् । वाचां वैचित्र्ये हि सुपां तिङां च व्युत्पत्तिः । सुपां तिङां च तत्तद्विच्छित्त्यनुगुणतया वाचि विनिवेशनं हि शब्दालङ्कारः । अतः शब्दधर्मत्वात् शब्दालङ्कार एवायम् । तमिमं शब्दधर्मत्वेनैवामनन्तीत्याह—**तदेतदाहुः सौशब्द्यमिति** । योऽयं सुप्तिङ्व्युत्पत्त्यात्मा शब्दालङ्कारस्तमिमं सौशब्द्यं सुशब्दत्वमेवामनन्ति । कविशब्दत्वमेव शब्दालङ्कार इति निष्कर्षः । न हि सुशब्दत्वमर्थधर्म इति कश्चित् सचेतनः शङ्कते । तर्ह्यर्थवैचित्र्यं कीदृगित्यत आह—**नार्थव्युत्पत्तिरीदृशीति** । नेदृशी

To illustrate the word-portrait :

At twilight the moon rises at first glowing reddish, then of golden line, later on resembling the gleam of the cheeks of slender-bodied ones, then impatient and capable of destroying the darkness the moon resembles the splendour of the bulbous root of the juicy lotus-stalk. 139

To illustrate the portrait of meaning :

Whom do the locks of the damsels with beautiful eye-lashes, and the mischievous persons not agitate ? The locks, curling over the eyes, hanging low and lying always playfully on the forehead, do not give up the blackness as also the curliness. (The mischievous persons also, fallen to the sight, mean and sportively devoted to telling lies, do not give up fraudulence and crookedness.) 140

शब्दव्युत्पत्तिरधर्मा न भवति । शब्दव्युत्पत्तिर्हि समुचिततिङ्सुब्व्युत्पत्तिरूपा । अर्थव्युत्पत्तिस्तु जातिगुणादिधर्मविशेषविच्छित्तिविवेचनरूपा । अतोऽनुप्रासादिरूपायाः शब्दधर्मविच्छित्तेरन्यैव ह्यौपम्यादिरर्थधर्मविच्छित्तिरिति सिद्धम् । यत इत्थं वैचित्र्यभेदः, ततः स्वसिद्धान्तं निगमयति—**शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः** इति । शब्दालङ्कारोऽर्थालङ्कारश्चेति भेदसम्भवादुभयमपि चित्रकाव्यमस्माकमभिमतम् ।

एतासु कारिकास्वर्थं परिच्छेत्तुमपारयन् ।
पदे पदे पलायिष्ट सान्धिविग्रहिकः स्खलन् ॥

प्रथममरुणेति । अत्र तावत् ततस्तदन्वित्यादौ केवलव्यञ्जनसाम्याद् वृत्त्यनुप्रास एवार्थवैचित्र्याद् विशिष्य भातीति शब्दचित्रम् ।

ते दृष्टीति । नीचाः अवाक्स्वभावाः तुच्छशीलाश्च । अलीकलग्नाः ललाटावलम्बिनः अनृताभिरताश्च । अत्र समुच्चयादेरर्थालङ्कारस्य प्राधान्यम् ।

यद्यपि सर्वत्र काव्येऽन्ततो विभावादिरूपतया रसपर्यवसानं, तथापि स्फुटस्य रसस्यानुपलम्भादव्यङ्ग्यमेतत् काव्यद्वयमुक्तम् । अत्र तु शब्दार्थालङ्कार-भेदाद् बहवो भेदाः । ते चालङ्कारनिर्णये निर्णेष्यन्ते ।

इति काव्यप्रकाशे शब्दार्थचित्रनिरूपणं नाम

षष्ठ उल्लासः

नन्वनयोरप्युदाहरणयोः सूक्ष्मेक्षिकया निरूपणे रसादिरूपं व्यङ्ग्यमस्त्येव । अतः कथं चित्रत्वमित्यत आह—**यद्यपीति** । ननु चित्रमपि ध्वनिगुणीभूतव्यङ्ग्य-न्यायेन निरवशेषं किं न प्रदर्शितमित्यत आह—**अत्र तु शब्दार्थे**त्यादि । अलङ्कार-रूपधर्ममात्रप्राणकं हि चित्रं धर्मिप्रस्तावादिह दिङ्मात्रेण दर्शितम् । अलङ्कार-निर्णये तु प्राप्तावसरतया निरवशेषं निर्णेष्यते ।

इति संस्कृतसार्वभौमप्राकृतपृथ्वीश्वरशौरसेनीशिरोमणिमागधीमकरध्वज-पैशाचीपरमेश्वरापभ्रंशराजहंसालङ्कारिकचक्रवर्तिध्वनिप्रस्थानपरमाचार्यकाव्य-मीमांसाप्रभाकरकविसहृदयशिरोमणिसहजसर्वज्ञपरमयोगीश्वरश्रीमत्त्रि-भुवनविद्याचक्रवर्तिवंशावतंसमहाकविश्रीविद्याचक्रवर्त्तिकृतौ सम्प्रदायप्रकाशिन्यां काव्यप्रकाशबृहट्टीकायां षष्ठ उल्लासः ।

Though everywhere in poetry ultimately the character being that of the determinant and the rest, there is culmination in the *rasa* (i.e. all poetry delineating the *vibhāvas*, etc. is ultimately posited in *rasa*) yet these two kinds of (portrait—) poetry, because of the absence of distinct sentiment, are devoid of the suggestion. But of this (portrait-poetry) there are many varieties on account of the divisions of the poetic figure into that of the word and the sense. These will be taken up at the time of elucidation of the figures.

Thus ends the Sixth Flash, namely, the Treatment of the Portrait of Word and Meaning.